THE
MRICHCHHAKATI:
A
COMEDY;
BY
SUDRAKA RÁJÁ

WITH A COMMENTARY EXPLANATORY
OF THE
PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE
OF
Public Instruction.

PRINTED AT THE EDUCATION PRESS.

1829.

Digitized by Google

BIBLIOTHECA
REGIA
MONACENSIS.

Digitized by Google

मृच्छकटिकनाटकस्य भूमिका।

अनेकदेशप्रचलितासु राजावलीषु कोऽपि राजा शूद्रको नाम विक्रमादित्यात् प्राचीनतरः प्रसिद्धः; सोऽपि आन्ध्रदेशोत्पन्नानां मगधदेशराजानां प्रथमोऽभवत्। मगधदेशस्य राजधानी पाटलिपुत्रनाम नगरं, किन्तु कामन्दकीग्रन्थकारेण शूद्रकस्य राजधान्यवन्ती निर्णीता, केषुचित् पुस्तकेषु च यत्र शूद्रकस्य नाम लिखितं तत्र शिप्रकः शूरकः सिन्धुकएव पाठो दृश्यते; तद्धेतुना शूद्रकस्य नामनगरयोर्निश्चयोनास्ति, केवलञ्चैतदनुष्ठितं यन्मृच्छकटिकस्य पूर्व्वरङ्गे निर्दिष्टं।

स राजा गुणवान् गुणवतां पालकश्च; तेन श्रीविक्रमादित्य समयपूर्व्वं सार्द्धशतवत्सरे मृच्छकटिकनामधेयमपूर्व्वं नाटकं विरचितं। अनन्तरं वक्रकालवशात्तन्नाटकं प्रायशोदुर्लभमेवाभीत्केवलं दृश्यरूपकादिग्रन्थेषु प्रमाणत्वेनोपन्यस्तस्य क्वचिदेकश्लोकस्य क्वचिदर्द्धश्लोकस्य वा पठनात्तन्नाम नहि विस्मृतं; किन्त्वल्पकाले गते श्रीमता उलिसेनसाहेबेन काश्मीपुरीमधिष्ठिता श्रीलक्षदीक्षितपण्डितसकाशादेकं पुस्तकमासादितं, पुनः कलिकातानगरमानीतं। इदानीञ्च मुद्राङ्कणेन तस्य बहुत्वं वक्रकालस्थायित्वञ्च संस्थापितं। अस्मिन् पुस्तके अतिप्राचीन समयस्य रीतयोद्रष्टव्याः यथा पूर्व्वं भरतदेशस्थैरनुष्ठिताः; एवञ्च रूपकाणां ये गुणाः प्रशंसनीयाः ते सर्व्वेऽत्र संगृहीताः सन्ति॥

Digitized by Google

विश्रामचिह्नानि।

पाठकवर्गाणां सुबोधनाय मुद्राकरणसमये नवीना रीति रनुसृता। यदा सन्धिः शिथिला भवति तदा पदानां किञ्चि दन्तरं क्षतं; एवञ्च यदा वाक्यानामर्थः सम्पूर्णः, किम्वा किञ्चि द्भवच्छिन्नोभवति, गद्यपद्यपठने च स्वरस्य विश्रामोयुज्यते, तदा तत्स्थाने विश्रामपरिमाणस्य चिह्नं मुद्रितमस्ति—यथा.

, एकमात्रं

; द्विमात्रं

। त्रिमात्रं किम्वा वाक्यसम्पूरणं

? प्रश्ने

! आवेगे

Digitized by Google

॥ मृच्छकटिकं ॥

॥ प्रथमाङ्कः ॥

॥ नान्दी ॥

पर्य्यङ्कबन्धनिबिडद्विगुणितभुजगाश्लेषसम्भोगजातो
रन्ध्रःप्राणावरोधव्युपरतसकलज्ञानदृङ्नेन्द्रियस्य;
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्वः पातु मूर्ध्नेक्षणघटितलयब्रह्मलग्नः समाधिः।

अपिच।

पातुवोनीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः
गौरीभुजलता यत्र विद्युल्लेखेव राजते।

॥ नान्द्यन्ते सूत्रधारः ॥

अलमनेन परिषत्कुतूहलविमर्दकारिणा परिश्रमेण। एवमहमार्य्यमिश्रान् प्रणिपत्य विज्ञापयामि; यदिदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः। एतत्कविः किल।

द्विरदेन्द्रगतिश्चकोरनेत्रः परिपूर्णेन्दुमुखः सुविग्रहश्च,
द्विजमुख्यतमः कविर्बभूव, प्रथितः शूद्रकदत्तगाधसत्त्वः।

Digitized by Google

अपिच।

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां,
ज्ञाला, सर्व्वप्रसादाद्व्युपगततिमिरे चक्षुषी चोपलभ्य;
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा,
लब्ध्वा चायुःशताब्दं दशदिनसहितं भूद्रकोऽग्निं प्रविष्टः।

अपिच।

समरव्यसनी प्रमादशून्यः ककुदं वेदविदां तपोधनश्च,
परवारणवाजियुद्धलुब्धः क्षितिपालः किल भूद्रकोबभूव।

अस्याश्च तत्कृतौ।

अवन्तिपुर्य्यां द्विजसार्थवाहोयुवा दरिद्रः किल चारुदत्तः,
गुणानुरक्ता गणिका च यस्य वसन्तसेभेव वसन्तसेना,
तयोरिदं सम्भुरतोत्सवाश्रयं, नयप्रचारं, व्यवहारदुष्टतां,
खलस्वभावं, भवितव्यतां, तथा चकार सर्व्वं किल भूद्रकोनृपः।

॥ परिक्रम्यावलोक्य च ॥ अये शून्येयमस्मत्सङ्गीतशाला। क्व नु गताः कुशीलवाभविष्यन्ति ॥विचिन्त्य॥ आः ज्ञातं।

शून्यमपुत्रस्य गृहं, चिरशून्यं नास्ति यस्य सन्निचयं,
मूर्खस्य दिशः शून्याः, सर्व्वं शून्यं दरिद्रस्य।

कृतश्च सङ्गीतकं मया। अनेन चिरसङ्गीतोपासनेन ग्रीष्म समये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलित तारके क्षुधा ममाक्षिणी खटखटायेते; तद्यावद्गृहिणीमाकृष्य पृच्छामि अस्ति किञ्चिन्मातराशोनवेति; एषोऽस्मि, भोः॥ कार्य्य वशात्प्रयोगवशाच्च प्राकृतभाषी संवृत्तः॥ अविद! भोः भोः

चिरसंगीदोवासणेण सुक्खपोक्खरणालादं विअ मे बुभुक्खाए मिलाणादं अङ्गादं। ता जाव गेहं गदुअ जानामि अत्थि किंवि कुटुम्बिणीए उववादिदं ण वेत्ति (१)॥ परिक्रम्यावलोक्य च॥ एदं त्तं अह्माणं गेहं, ता पविसामि (२)॥ प्रविश्यावलोक्य च॥ होमाणहे! किं णु खु अह्माणं गेहे अवरं विअ सम्बिहाणअं वट्टदि। आआमि तण्डुलोदअप्पवाहा रच्चा लोहकडाह परिअंतण कसणसाराकिदविसेसआ विअ जुअदी अहिअदरं सोहदि भूमी, सिणिद्धेण गन्धेण उद्दीवन्ती विअ, अधिअं बाधेदि मं बुभुक्खा। ता किं पुव्वविढत्तं णिहाणं उप्पन्नं भवे। आदु, अहं जेव्व बुभुक्खादो ओदणमअं जीअलोअं पेक्खामि। ण त्थि किल पादरासो अह्माणं गेहे। पाणचअं वाधेदि मं बुभुक्खा; दधसव्वं णवं विअ संविहाणं वट्टदि। एक्का वसअं पीसेदि; अवरा सुमणाउं गुम्फेदि (३)॥विचिन्त्य॥ किं णेदं; भोदु;

---

(१) कष्टं कष्टं भोः भोः चिरसङ्गोतोपासनेन शुष्कपुष्करनालानीव मम बुभुक्षया म्लानानि अङ्गानि; तत् यावत् गेहं गत्वा जानामि अस्ति किमपि कुटुम्बिन्या उपपादितं नवा; इति।

(२) एतत् तत् अस्माकं गेहं, तत् प्रविशामि।

(३) आश्चर्यं किं नु खलु अस्माकं गेहे अपरमिव सम्बिधानकं वर्त्तते। आयामि तण्डुलोदकप्रवाहा रम्या लोहकटाह

कुटुम्बिनिं ब्रह्मविश्र, परमत्थं आणिस्सं(१) ॥ णेपथ्यामिमुख मवलोक्य॥ अज्जे। दूदो दाव (२)।

नटी। प्रविश्य। अज्ज, दूअस्मि (३)।

सूच। अज्जे, सागदं दे (४)।

नटी। आणवेदु अज्जो; को णिओओ। अणुचिट्ठीअ दुत्ति (५)।

परिवर्त्तनतृष्णसारा कृतविशेषकादव युवती अधिकतरं शोभ ते भूमी स्निग्धगन्धेन उद्दीप्यमानेव अधिकं बाधते मां बुभुक्षा। तत्किं पूर्व्वार्जितं निधानं उत्पन्नं भवेत्। अथवा अहमेव बुभुक्षातः श्रोदनमयं जीवलोकं पश्यामि। नास्ति किल प्रात राशोऽस्माकं गेहे प्राणाधिकं मां बुभुक्षा बाधते दृष्ट सर्व्वं नवमिव सन्निधानकं वर्त्तते। एका वर्णकं कस्तूर्य्यादिकं समा लभ्यानं पिनष्टि अपरा सुमनसः गुम्फति।

(१) किं न्वेदं भवतु कुटिम्बिनीं ब्रह्मण्य परमार्थं आख्यामि।

(२) आर्ये दूतः तावत्।

(३) आर्य्य दूतं अस्मि।

(४) आर्ये स्वागतं ते।

(५) आज्ञापयतु आर्य्यः कः नियोगः अनुष्ठीयतामिति।

Digitized by Google

सूत्र। अज्जे; चिरसङ्गीदोवासणेण ॥ इत्यादि पठित्वा ॥ अत्थि किं वि अस्साणं गेहे अत्तव्वं ण वेत्ति (१)।

नटी। अज्ज सव्वं अत्थि (२)।

सूत्र। किं किं अत्थि (३)।

नटी। तं जधा। गुडोदनं पिअं दहीं, तण्डुलादं, अज्जेण अत्तव्वं रसाअणं, सव्वं अत्थित्ति। एअं ते देवा आसासेदु (४)।

सूत्र। अज्जे; किं अस्साणं गेहे सव्वं अत्थि; आदु, परिहसिं (५)।

नटी। ॥ स्वगतं ॥ परिहसिस्सं दाव ॥ प्रकाशम् ॥ अज्ज; अत्थि—आवस्से (६)।

---

(१) आर्ये; चिरसङ्गीतोपासनेन, पुष्करणाख्यानीव मे बुभुक्षया ज्ञानानि अङ्गानीति; पठित्वा; अस्ति किमपि अस्माकं गेहे अत्तव्यं नवा इति।

(२) आर्य्य; सर्व्वं अस्ति।

(३) किं किं अस्ति।

(४) तत् यथा। गुडौदनं प्रियं, दधि, तण्डुलाः, आयण अत्तव्यं रसायनं, सर्व्वं अस्ति इति। एवं ते देवा आश्वसन्तु।

(५) आर्ये; किं अस्माकं गेहे सर्व्वं अस्ति; अथवा, परिहसामि।

(६) परिहसिष्यामि तावत्। आर्य्य; अस्ति वणिग्वीथ्यां।

Digitized by Google

सूच। ॥सक्रोधम्॥ आः अणज्जे! एवं दे आसा छिज्जिस्सदि। अभावं अ गमिस्ससि। जं दाणिं अहं वरण्डलम्बुओ विअ दूरमुक्खिविअ पाडिदो (१)।

नटी। मरिसेदु अज्जो; परिहासो क्खु मए कदो (२)।

सूच। ता किं उण दूदं णवं विअ संविहाणअं वट्टदि; एक्का वण्णअं पीसेदि, अवरा सुमणाओ गुम्फेदि। दूअस्स पञ्च वर्णकुसुमोपहारसोहिदा भूमी (३)।

नटी। अज्ज उववासो गहिदो (४)।

सूच। किंणामधेओ अअं उववासो (५)।

---

(१) आः अनार्ये! एवं तव आशा छेत्स्यति। अभावं च गमिष्यसि। यत् इदानीं अहं वरण्डलम्बुकइव दूरं उत्क्षिप्य पातितः। वरण्डोदीर्घकाष्ठं तस्य लम्बुकः तस्मान्निबद्धोम्रुक्ति काम्रुणः।

(२) म्रुष्यतामार्यः परिहासः खलु मया कृतः।

(३) तत् किं पुनरिदं नवमिव संविधानकं वर्त्तते; एका वर्णकं पिनष्टि, अपरा सुमनसोगुम्फति। दूतस्य पञ्चवर्णकुसुमोपहारशोभिता भूमी।

(४) अद्य उपवासोगृहीतः।

(५) किंनामधेयोऽयमुपवासः।

Digitized by Google

नटी। अहिरूअवदी णाम (१)।

सूच। अज्जे, इहलोइओ, आदु पारलोइओ (२)।

नटी। अज्ज, पारलोइओ (३)।

सूच। ॥सरोषं॥ पेक्खन्तु पेक्खन्तु अज्जमिस्सा; मम केरकेण भत्तपरिव्वएण पारलोइओ भत्ता अण्वेसीअदि (४)।

नटी। अज्ज, पसीद पसीद; तुमं जेव्व मम जम्मन्तरेवि भत्ता भविस्ससित्ति उववसिदह्मि (५)।

सूच। अध अअं उववासो केण उवदिट्ठो (६)।

नटी। अज्जस्स जेव्व पिअवअस्सेण चुण्णवुड्ढेण (७)।

---

(१) अभिरूपपतिर्नाम।

(२) आर्य्ये इहलौकिकः अथवा पारलौकिकः।

(३) आर्य्य पारलौकिकः।

(४) प्रेक्षन्तां प्रेक्षन्तां आर्य्यमिश्राः; मदीयेन भक्तपरिव्ययेन पारलौकिकोभर्त्ता अन्विष्यते।

(५) आर्य्य प्रसीद प्रसीद त्वमेव मम जन्मान्तरेऽपि भर्त्ता भविष्यसीति उपोषितास्मि।

(६) अथ अयमुपवासः केन उपदिष्टः।

(७) आर्य्यस्यैव प्रियवयस्येन चूर्णवृद्धेन।

Digitized by Google

सूच। ॥सकोपं॥ आः दासीए पुत्ता चुण्णवुड्ढा; कदा णु ऊ तुमं कुविदेण रण्णा पालएण छेवव्वहकेअकलापं विअ वसुअन्धं कप्पिज्जं त्तं पेक्खिस्सं (१)।

नटी। पसीददु अज्जो; णं अज्जस्स जेअ पारलोइओ अअ उववासो अणुट्ठीअदि त्ति ॥ पादयोः पतति ॥ (२)।

सूच। अज्जे; उट्ठेहि, उट्ठेहि; कधेहि कधेहि दुध उववासेकेण कज्जं (३)।

नटी। अज्जादिसजणजोग्गेण बम्हणेण उवणिमन्तिदेण (४)।

सूच। तेण हि गच्छदु अज्जा; अहंपि अज्जादिसजणजोग्गं बम्हणं उवणिमन्तेमि (५)।

---

(१) आः (आक्षेपे) दास्याः पुत्र चूर्णवृद्ध; कदा ननु खलु त्वां कुपितेन राज्ञा पालकेन छेद्यमानं प्रेक्षिष्ये नव बधूकेशकलापमिव वसुगन्धं।

(२) प्रसीदत्वार्य्यः; ननु आर्य्यस्यैव पारलौकिकोऽयमुपवासः अनुष्ठीयते इति।

(३) आर्य्ये; उत्तिष्ठ, उत्तिष्ठ; कथय कथय अत्र उपवासेकेन कार्य्यं।

(४) अस्मादृशजनयोग्येन ब्राह्मणेन उपनिमंत्रितेन।

(५) तेन हि गच्छत्वार्य्या; अहमपि अस्मादृशजनयोग्यं ब्राह्मणं उपनिमन्त्रयामि।

Digitized by Google

नटी। जं अज्जो आणवेदि ॥ इति निष्क्रान्ता (१)॥

सूत्र। ॥परिक्रम्य॥ हीमाणहे! ता कधं मए एव्वं सुसमिद्धाए उज्जइणीए अण्णारिसजणजोग्गो बम्हणो अण्णेसिदव्वो ॥ विलोक्य ॥ एसो चारुदत्तस्स मित्तं मित्तेओ इदो जेव्व आअच्छदि; भोदु; पुच्छिस्सं दाव। अज्ज, मित्तेअ, अम्हाणं गेहे असिदुं अग्गणी भोदु अज्जो (२)।

नेपथ्ये ॥ भो अण्णं बम्हणं उवणिमन्तेदु भवं। वावडो दाणिं अहं (३)।

सूत्र। अज्ज सम्पण्णं भोअणं णीरवत्तणञ्च। अविअ दक्खिणा का वि दे भविस्सदि (४)।

---

(१) यत् आर्य्य आज्ञापयति।

(२) तस्मात् कथं मया ईदृश्यामुज्जयिन्यां समृद्धायां अस्मादृग्जनयोग्योब्राह्मणोऽन्वेषितव्यः। एष चारुदत्तस्य मित्रं मैत्रेयः इतएव आगच्छति; भवतु प्रच्छामि तावत्। अद्य, मैत्रेय, अस्माकं गेहे अत्तुं अग्रणीर्भवतु आर्य्यः।

(३) भोः अन्यं ब्राह्मणं उपनिमन्त्रयतु भवान्। व्यापृतोऽहं इदानीं।

(४) अद्य सम्पन्नं भोजनं निरुपद्रवञ्च (विघ्नशङ्काभावात्) अपिच दक्षिणा कापि ते भविष्यति।

॥ पुनर्नेपथ्ये ॥ भो; जं दाणिं पटमं जेव्व पच्चादिट्ठोसि, ता को दाणिं दे णिव्वन्धोममोपदेसं अणुसन्धिदुं (१)।

सूच। पच्चादिट्ठोम्हि एदिणा। भोदु; अण्णं बम्हणं उव णिमन्तेमि (२)।

॥ इति निष्क्रान्तः ॥ आमुखं ॥

॥ प्रविश्य प्रावारहस्तोमैत्रेयः ॥

॥ अण्णं बम्हणमिति पूर्व्वोक्तं पठित्वा ॥ अध वा; मए मित्तेएण परस्स आमन्तणआदुं भक्खिदव्वादुं। हा अवत्थे तुम्हीअसि, जो दाणिं अहं तत्थभवदो चारुदत्तस्स रिद्धीए अ हीरन्तं पेरन्तसिद्धेहिं उग्गारसुरहिगन्धेहिं मोदएहिं जेव्व आसिदो अभन्तरचदुस्साल अदुआरए उवविट्ठो गल्लक्कसद परिवुदो चित्तअरोविअ अङ्गुलीहिं छिविअ अवणेमि; एअ रचन्तरवुसहो विअ रोमन्थाअमाणो चिट्ठामि। सो दाणिं अहं तस्स दरिद्दाए जहिं तहिं चरिअ गेहपारावदो विअ आवासणिमित्तं दध आअच्छामि। एसो अज्ज चारुदत्तस्स पिअवअस्सेण चुण्णवुड्ढेण जादीकुसुमवासिदोपावारओ अणु

---

(१) भो यत् इदानीं प्रत्यादिष्टोऽसि तत्कः इदानीं ते निर्व्वन्धोममोपदेशं अनुसर्त्तुं।

(२) प्रत्यादिष्टोऽस्मि अनेन; भवतु; अन्यं ब्राह्मणं उप निमन्त्रयामि।

Digitized by Google

पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स उवणेदव्वोत्ति। ता जाव अज्जचारुदत्तं पेक्खामि॥ परिक्रम्यावलोक्य च॥ एसो चारुदत्तो सिद्धीकिददेवकज्जो गिहदेवदाणं बलिं करेन्तो दूरो जेव्व आअच्छदि (१)।

॥ततः प्रविशति यथानिर्दिष्टश्चारुदत्तः रदनिका च॥

चारु। ॥ऊर्द्धमवलोक्य सनिर्वेदं निःश्वस्य॥

यासां बलिः सपदि मद्गृहदेहलीनां,
हंसैश्च सारसगणैश्च विलुप्तपूर्व्वः;

---

(१) मया मैत्रेयेण परस्य आमन्त्रणानि भक्षितव्यानि; हा अवस्थे तुलयसि। यः इदानीमहन्तत्वभवतः चारुदत्तस्य कृत्वा अहोरात्रमयत्नसिद्धैः उद्गारसुरभिगन्धिभिर्मोदकैरेवाग्रितः अभ्यन्तरचतुःशालकद्वारे उपविष्टः गन्धकषायपरिवृतः चित्रकरइव अङ्गुलीभिः स्पृष्ट्वा अपनयामि। नगरवलरवृषभइव रोमन्थायमानः तिष्ठामि। सः इदानीं अहं तस्य दरिद्रतया यत्र कुत्रापि चरित्वा गेहपारावतइवावासनिमित्तमत्रागच्छामि। एष चारुदत्तस्य प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितोऽनुप्रेषितः प्रावारकः सिद्धीकृतदेवकार्यस्य आर्य्यचारुदत्तस्योपनेतव्यइति। तद्यावत् आर्य्यं चारुदत्तं पश्यामि। एष चारुदत्तः सिद्धीकृतदेवकार्यः गृहदेवतानां बलिं कुर्व्वन्नितएवागच्छति।

Digitized by Google

ताम्रेव संप्रति विरूढहरिताङ्कुरासु,
बीजाञ्जलिः पतति कीटमुखावलीढः।

॥ मन्दं परिक्रम्योपविष्टः ॥

विदू। एसो अज्ज चारुदत्तो ता जाव सम्मदं उवसप्पामि ॥ उपसृत्य। सोत्थि भो दे; वट्टदु भवं (१)।

चारु। अथे सर्व्वकालमिचं मैत्रेयः प्राप्तः। सखे स्वागतमास्यतां।

विदू। जं मवं आणवेदि ॥ उपविश्य ॥ भो वअस्स; एसो दे पिअवअस्सेण चुण्णवुड्ढेण जादीकुसुमवासिदो पावारओ अणुप्पेसिदो सिद्धोकिददेवकज्जस्स अज्जचारुदत्तस्स तुए उवणेदव्वोत्ति (२)॥ समर्पयति ॥

चारु। गृहीत्वा ॥ सचिन्तः स्मितः ॥

विदू। भो, इदं किं चिन्तीअदि (३)।

---

(१) एष आर्य्यचारुदत्तः तत् यावत् सम्मतं उपसर्पामि। स्वस्ति भवते; वर्द्धतां भवान्।

(२) यत् भवान् आज्ञापयति। भो वयस्य। एष ते प्रिय वयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकः अनुप्रेषितः सिद्धीकृतदेवकार्य्यस्य आर्य्यचारुदत्तस्य त्वया उपनेतव्य इति।

(३) भो किं इदं चिन्त्यते।

Digitized by Google

चारु। वयस्य!

सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनं;
सुखान्तु योयाति नरो दरिद्रतां,
धृतः शरीरेण मृतः स जीवति।

विदू। भो वअस्स! मरणादो दालिद्दादो वा कदरं रोअदि (१)।

चारु। वयस्य।

दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम्;
अल्पक्लेशं मरणं, दारिद्र्यमनन्तकं दुःखम्।

विदू। भो वअस्स; अलं सन्तप्पिदेण; पणइजणसंक्कामिद विहवस्स सुरअणपीदसेसस्स विअ पडिवचंदस्स परिक्खओ वि दे अहिअदरं रमणीओ (२)।

चारु। वयस्य; न ममार्थान्प्रति दैन्यम्। पश्य।

एतन्तु मां दहति यद्गृहमस्मदीयं,
क्षीणार्थमित्यतिथयः परिवर्जयन्ति;

---

(१) भो वयस्य। मरणात् दारिद्र्याद्वा कतरत् रोचते।

(२) भो वयस्य; अलं सन्तापितेन प्रणयिजनसंक्रामित विभवस्य सुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिचयोऽपि ते अधिकतरं रमणीयः।

Digitized by Google

संपूर्णशालिरसलेखमिव भ्रमन्तः
कालात्यये मधुकराः करिणः कपोलम्।

विदू। भो वअस्स; एदे खलु दासीए पुत्ता अत्थकज्ज वत्ता, वरडाभीदा विअ गोवालदारआ अरण्णे, अहिंअहिं ण खज्जंति तहिं तहिं गच्छंति (१)।

चारु। वयस्य;

सत्यं न मे विभवनाशकृताक्षि चिन्ता;
भाग्यक्रमेण हि धनानि भवन्ति यान्ति;
एतत्तु मां दहति नष्टधनाश्रयस्य,
यस्मादृदादपि जनाः शिथिलीभवन्ति।

अपिच।

दारिद्र्याद्भियमेति, ह्रीपरिगतः प्रभ्रश्यते तेजसो,
निस्तेजाः परिभूयते, परिभवान्निर्वेदमापद्यते;
निर्विण्णः शुचमेति, शोकपिहितोबुद्ध्या परित्यज्यते;
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्।

---

(१) एते खलु दासीपुत्राः अर्थरूपप्रातराशाः वरटा भीताः इव गोपालदारका अरण्ये यत्र यत्र न खादन्ति तत्र तत्र गच्छन्ति।

Digitized by Google

विदू। भो वयस्स; तं जेव्व अत्थकज्जवत्तं सुमरिअ अहं सन्नाथिदेण (१)।

चारु। वयस्स; दारिद्र्यं हि पुरुषस्य,

निवासश्चिन्तायाः परपरिभवोवैरमपरं,
गुणानां निर्वाणं, स्वजनजनविद्वेषकरणं,
वनं गन्तुंबुद्धिर्भवति च कलत्रात्परिभवो,
हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च।

तद्यस्य; कृतोमया गृहदेवताभ्यो बलिः; गच्छ त्वमपि चतुष्पथे मातृभ्योबलिमुपहर।

विदू। ण गमिस्सं (२)।

चारु। किमर्थम्।

विदू। जदो एव्वं पूइज्जन्ता, ण दे पसीदन्ति, ता को गुणो देवेसुं अच्चिदेसुं (३)।

---

(१) भो वयस्य; तमेव अर्थकार्यवर्त्तां स्मृत्वा अहं सन्तापितेन।

(२) न गमिष्यामि।

(३) यतएवं पूज्यमानाअपि न ते प्रसीदन्ति तत् कोगुणोऽर्चितेषु देवेषु।

Digitized by Google

चारु। वयस्य; मामेवम् गृहस्थस्य नित्योऽयं विधिः।

तपसा मनसा वाग्भिः पूजिता वलिकर्मभिः,
तुष्यन्ति ग्रमिनां नित्यं देवताः किं विचारितैः।

तद्गच्छ माढभ्योवलिमुपहर।

विदू। भो ण गमिस्सं; अण्णो कोवि पउञ्जीअदु। मम उण बम्हणस्स सव्वं जेव्व विपरीदं परिणमदि, आदंसगदा विअ च्छाआ, वामादो दक्खिणा, दक्खिणादो वामा। अण्ण; एदाए पदोसवेलाए इध राअमग्गे गणिआ विडा चेडा राअवल्लहा अ पुरिसा सञ्चरन्ति। ता मण्डूकलुद्धस्स विअ कालसप्पस्स मूसिओ विअ अहिमुहावलिदो वज्झो दाणिं भविस्सं। तुमं इध उवविट्ठो किं करिस्ससि (१)।

---

(१) भो न गमिष्यामि; अन्यः कोऽपि प्रयुज्यतां। मम पुनर्ब्राह्मणस्य सर्व्वमेव विपरीतं परिणमति, आदर्शगता इव च्छाया, वामतो दक्षिणा, दक्षिणतो वामा। अन्यच्च; एतस्यां प्रदोषवेलायां इह राजमार्गे गणिकाविटाश्चेड़ाश्च राजवल्लभाः पुरुषाः सञ्चरन्ति, तस्मात् मण्डूकलुब्धस्येव कालसर्पस्य अहिमुखापतितोमूषकइव वध्यः इदानीं भविष्यामि। त्वं इह उपविष्टः किं करिष्यसि।

Digitized by Google

चारु । भवतु; तिष्ठ, तावदहं समाधिं निवर्त्तयामि ।
नेपथ्ये ॥ तिष्ठ वसन्तसेने तिष्ठ तिष्ठ ॥
ततः प्रविशति विटश्चकारचेटैरनुगम्यमाना वसन्तसेना ॥
विटः । वसन्तसेने तिष्ठ तिष्ठ ।

किं त्वं भयेन परिवर्त्तितसौकुमार्य्या,
नृत्यप्रयोगविग्रहौ चरणौ क्षिपन्ती,
उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टि
र्व्याधानुसारचकिता हरिणीव यासि ।

चारुदत्तः । चिट्ठ वसन्तसेणिए चिट्ठ ।

किं यासि, धावसि, पलायसे, प्रस्खलन्ती
वा मूर्च्छसे, ण मरीहिसि, चिट्ठ दाव;
कामेण दय्यदि ज्ज मे हृदअं तवस्सी
अङ्गारराशिपतितं इव मंसखण्डं (१)।

---

(१) तिष्ठ वसन्तसेनिके तिष्ठ ।

किं यासि, धावसि, पलायसे, प्रस्खलन्ती
वासु प्रसीद न मरिष्यसि, तिष्ठ तावत् ।
कामेन दह्यते खलु मे हृदयं तपस्वि
अङ्गारराशिपतितं इव मांसखण्डं ।

Digitized by Google

चेटः। अज्जए चिट्ठ चिट्ठ।

उत्तासिता गच्छसि अन्तिका मे,
संपुण्णपुच्छा विअ गिम्हमोरी;
आवग्गदी आमिअ भट्टके मे,
वणे गडे कुक्कुडआवके व्व (१)।

विटः। वसन्तसेने तिष्ठ तिष्ठ।

किं यासि बालकदलीव विकम्पमाना,
रक्ताम्शुकं पवनलोलदग्रं वहन्ती;
रक्तोत्पलप्रकरकुड्मलमुत्सृजन्ती,
दृष्टैर्मनःश्रिलगुहेव विदार्य्यमाणा।

अकारः। चिट्ठ वसन्तसेणिए चिट्ठ।

मम मअणमणङ्गं बन्धणं वट्टअन्ती
णिग्घिण अ अयणके मे णिहअं पक्खिवन्ती;

---

(१) आर्य्यके तिष्ठ तिष्ठ।

उत्त्रासिता गच्छसि अन्तिका मम
संपूर्णपुच्छेव ग्रीष्ममयूरी;
संभ्रममागच्छति स्वामी भट्टारको मम
वने गतः कुक्कुरशावकइव।

Digitized by Google

पश्यसि भग्नभीदा पस्खलन्ती खलन्ती;
मम वशमणुजादा रावणस्सेव कुन्ती (१)।

विटः। वसन्तसेने।

किं त्वं पदैर्मम पदानि विशेषयन्ती
व्यालीव यासि पतगेन्द्रभयाभिभूता;
वेगाद्दहं प्रविसृतः पवनं निरुन्ध्यां
लज्जियहे तु वरगात्रि न मे प्रयत्नः।

अकारः। भावे भावे।

एआ णाणकमूशिकामकशिका, मच्छाशिका, खाशिका;
णीआशा, कुलणाशिका, अवशिका, कामाहमञ्जूशिका,
एआ वेशवह्न, शुवेशणिलआ, वेशङ्कणा, वेशिआ;
एशे शे दशणामके मयि कले अज्जाविमं णेच्छदि (२)।

---

(१) तिष्ठ वसन्तसेने तिष्ठ।

मम मदनमनङ्गं मन्मथं वर्द्धयन्ती
निशि च शयनीये मे निर्दयं प्रक्षिपन्ती;
प्रसरसि भयभीता प्रस्खलन्ती खलन्ती।
मम वशमनुयाता रावणस्येव कुन्ती।

(२) शिवाङ्कटंकानाम्नोषिकामस्य ताड़नी, मत्स्यभक्षिका, नर्त्तकी, निम्ननासिका, वंशणाशिणी, अनायत्ता, कामस्य पात्रविशेषः। एषा वेशवह्न वेशस्य वेश्याजनाश्रयस्य वधः

विटः। प्रस्खलसि भयविह्वला किमर्थं
प्रचलितकुण्डलघृष्टगण्डपार्श्वा;
विटजननखघट्टितेव वीणा;
जलधरगर्जितभीतसारसीव।

शकारः। म्राणज्झूणमवज्जभूसणसद्दमिस्सं,
किं दोवदी विअ पलाअसि रामभीदा;
एसे हरामि मडिअत्ति जधा हणूमे
विस्सावसुस्स वहणिं विअ तं सुभद्दं (१)।

चेटः। रामेहि अ रामवल्लहं?
तो, खादिहिसि मह्मंसकं;
एदेहिं मह्मंसकेहिं,
मुणआ मलअं ण सेवन्ति (२)।

सुवेषाणां भूषणानां आश्रयः वेषोऽस्याश्रयीति वेशिका; एतान्यस्या इत्र नामकानि मया कृतानि अद्यापि मां नेच्छति।

(१) म्राणज्झूणमिति वज्रभूषणशब्दमिश्रं
किं द्रौपदी इव पलायसे रामभीता;
एष हरामि मुटिति यथा हनूमान्,
विस्रावसोर्भगिनीमिव तां सुभद्रां।

(२) रमस्व राजवल्लभया;
ततः, खादिष्यसि मत्स्यमांसकं,
एताभ्यां मत्स्यमांसाभ्यां
कुक्करा मृतं न सेवन्ते।

Digitized by Google

विटः। भवति वसन्तसेने।

किं तं कटीतटनिवेशितमुद्दहन्ती
तारावितानरुचिरं रजनीकलापम्;
वक्षोरुहेण निर्मथितचूर्णमनःशिलेन
पक्षाहृतं नगरदैवतवत्प्रयासि।

अकारः। अक्खेहि चण्डं अहिआलिअन्ती
वणे मिआणी विअ कुक्कुरेहिं;
पलाअसि अिग्घं तुलिदं अवेगं
अवेढणं मे हलअं हरन्ती (१)।

वसं। पल्लविए, पल्लविए; परभुदिए, परभुदिए (२)।

अकारः। ॥ सभयम्॥ भावे, भावे; मणुस्से, मणुस्से (३)।

विटः। न भेतव्यम्, न भेतव्यम्।

वसं। माहविए, माहविए (४)।

---

(१) अक्षाभिः शीघ्रं अभिसार्य्यमाणा
वने मृगाङ्गीव कुक्कुरैः।
पलायसे शीघ्रं त्वरितं सवेगं
समूलबन्धं मम हृदयं हरन्ती।

(२) पल्लविके, पल्लविके, परभृतिके परभृतिके।

(३) हे विद्वन्, हे विद्वन्, मनुष्या, मनुष्याः।

(४) माधविके, माधविके।

Digitized by Google

विटः। ॥ सहासम् ॥ मूर्ख; परिजनोऽन्विष्यते।

शकारः। भावे, भावे; दृत्थिआमच्चेशदि (१)।

विटः। अथकिम्।

शकारः। दृत्थिआणं शदं मोडेमि शूलें हगे (२)।

वसं। ॥ शून्यमवलोक्य ॥ हद्धी, हद्धी; कधं परिअणोवि परिभट्ठो; एत्थ मए अप्पा सअं जेव्व रक्खिदव्वो (३)।

विटः। अन्विष्यताम्।

शकारः। वशन्तशेणिए, विलव, विलव; परउदिअं वा पल्लविअं वा, शव्वं वा वशन्तमाशं; मए अहिशालिअंतीं तुमं कोपलित्ता दृश्शदि।

किं भीमशेणे जमदग्गपुत्ते,
कुन्तीशुदे वा, दशकन्धले वा।
एशे हगे गेह्हिअ केशहत्थे
दुश्शाशणश्शाणुकिदिं कलेमि।

---

(१) विदन्, विदन्; स्त्रियमन्विच्छति।

(२) स्त्रीणां शतं हन्मि शूलेनाहं।

(३) हाधिक्, हाधिक्, कथं परिजनोऽपि परिभ्रष्टः; अत्र मयात्मा स्वयमेव रक्षितव्यः।

Digitized by Google

णं पेक्ख, णं पेक्ख;

अग्गी मुत्तिक्खे वलिदे अ मत्थके

कप्पेध मीग्गं उअ मालएध वा।

अअं तवेदेण पलाइदेण; मुमुक्खु जे होदि, ण से कज्जु जीअदि (१)।

---

(१) वसन्तसेनिके विलप विलप, परभृतिकां वा पल्लविकां वा, सर्व्वं वा वसन्तमासं, मया अभिसार्य्यमाणां त्वां कः पवित्रा यिष्यते।

किं भीमसेनोजमदग्निपुत्रः,

कुन्तीसुतोवा, दशकन्धरोवा।

एषोहं केशपाशं गृहीत्वा,

दुःशासनस्यानुकृतिं करोमि।

ननु प्रेक्षस्व, ननु प्रेक्षस्व;

असिः सुतीक्ष्णः वलितश्च मस्तकं

छिनत्ति शीर्षं उत मारयामि वा।

अअं तवैतेन पलायितेन मुमूर्षुर्यो भवति न स खलु जीवति।

वसं। अज्ज; अबला क्खु अहं (१)।

विटः। अत एव म्रियसे।

प्रकारः। अदो जेव्व ण मालीअसि (२)।

वसं। ॥ स्वगतं॥ कधं, अणुणओ विसे भअमुप्पादेदि, भोदु एव्वं दाव ॥ प्रकाशं ॥ अज्ज, दुमादो किंपि अलङ्करणं तक्कीअदि (३)।

विटः। शान्तं! भवति वसन्तसेने न पुष्पमोषमर्हत्युद्यान स्वता; तत्कृतमलङ्करणैः।

वसं। ता किं खु दाणिं (४)।

प्रकारः। हगे देवपुलिशे मणुश्शे वाशुदेवके कामइ दव्वो (५)।

वसं। ॥ सक्रोधं॥ मन्तं! मन्तं! अवेहि; अणज्जं मन्तेशि (६)।

---

(१) आर्य्य; अबला खल्वहं।

(२) अतएव न मार्य्यसे।

(३) कथं अनुनयोऽप्यस्य भयमुत्पादयति; भवत्येवंतावत्। आर्य्य, अस्मात् किमपि अलङ्करणं तर्क्यते।

(४) तत्किं खलु इदानीं।

(५) अहं देवपुरुषः मनुष्यो वासुदेवः कामयितव्य

(६) शान्तं! शान्तं! अपेहि? अनार्य्यं मन्त्रयसि।

Digitized by Google

शकारः ॥ सहस्रतालं विहस्य॥ भावे, भावे, पेक्खदाव; मं अन्तलेण सुहिणिद्धा एशा गणिआ दालिआ णं, जेण मं भणादि; एहि शन्तोशि किलिन्तोशित्ति। हगे ण गामन्तलं, ण णगलन्तलं वा, गदे; अज्जके, शवामि भावशश शीशं अत्तण केहिं पादेहिं, तव जेव्व पच्चाणुपच्चिआए आहिंडन्ते, शन्ते किलिन्तोश्शि शम्बुत्ते (१)।

विटः ॥ स्वगतम्॥ अये, कथं शान्तमित्यभिहिते आन्त इत्यवगच्छति मूर्खः ॥ प्रकाशम्॥ वसन्तसेने, वेशवासविरुद्धम भिहितं भवत्या, पश्य;

तरुणजनसहायश्चिन्यतां वेशवासो,
विगणय, गणिका त्वं, मार्गजाता स्तवैव।
वहसि हि धनहार्य्यं पण्यभूतं शरीरं,
सममुपचर, भद्रे, सुप्रियं चाप्रियञ्च।

---

(१) विदन् विदन् प्रेक्षस्व तावत्; मां अन्तरेण सुस्निग्धा एषा गणिका दारिका ननु, येन मां भणति; एहि, शान्तोऽसि क्लान्तोऽसीति। अहं न ग्रामान्तरं, न नगरान्तरं वा, गतः। भद्रालिके, शपामि विटस्य शीर्षेण आत्मीयाभ्यां पादाभ्यां, तवैव पृष्ठानुपृष्ठिकया उद्भ्राम्यन् श्रान्तः क्लान्तोऽस्मि संवृत्तः।

अपिच।

वाण्यां स्नाति विचक्षणोद्विजवरोमूर्खोऽपि वर्णाधमः,
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा;
अह्लाचत्रविशस्त्यन्ति च यया नावा तथैवेतरे;
त्वं वापीव, लतेव, नौरिव, जनं वेश्यासि सर्व्वं भज।

वसं। गुणो क्खु अणुराअस्स कारणं, ण उण वलक्कारो (१)।

अकारः। भावे, भावे; एआ गब्भदासी कामदेवाअदणु ज्जाणादो पउदि, ताह दलिद्दचालुदत्ताह अणुलत्ता, ण मं कामेदि; वामदो तस्स घलं; जधा तव मम हत्थादो एआ ण पलिब्भंसदि तधा करेदु भावे (२)।

विटः ॥ खगतं॥ यदेव परिहर्त्तव्यं तदेवोदाहरति मूर्खः। कथं; वसन्तसेना आर्यचारुदत्तमनुरक्ता; सुष्ठु,

---

(१) गुणः खलु अनुरागस्य कारणं, न पुनर्व्वलात्कारः।

(२) एषा गर्भदासी कामदेवायतनोद्यानात् प्रभृति, तस्य दरिद्रचारुदत्तस्य अनुरक्ता, न मां कामयते; वामतस्य गृहं; यथा तव मम हस्तात् न एषा प्रभ्रश्यति, तथा करोतु भावः।

Digitized by Google

खल्विदमुच्यते, रत्नं रत्नेन सङ्गच्छतइति; तङ्गच्छतु, किमनेन मूर्खेण ॥ प्रकाशं॥ काणेलीमातः! वामतस्तस्य सार्थवाहस्य गृहं?

शकारः। अधदं; वामदो तस्स घडं (१)।

वसं ॥ स्वगतं॥ अह्महे! वामदो तस्स घलं ति; अं सचं, अवरज्झन्तेण वि दुज्जणेण उवकिदं, जेण पिअसङ्गमं पाविदा (२)।

शकारः। भावे, भावे; बलिए क्खु अन्धआले, माघला अग्गिपविट्ठाविअ मसिगुडिआ दीसन्दी जेव्व, पणट्ठा वसन्त सेणिआ (३)।

विटः। अहोबलवानन्धकारः। तथाहि।

आलोकविज्ञाला मे सहसा तिमिरप्रवेशविक्षिप्ता;
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण।

अपिच।

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः,
असत्पुरुषसेवेव, दृष्टिर्विफलतां गता।

---

(१) वाढं; वामतस्तस्य गृहं।

(२) आर्य्ये; वामतस्तस्य गृहमिति यत्सत्यं, अपराध्यतापि दुर्जनेन उपकृतं, येन प्रियसङ्गमं प्रापिता।

(३) भाव, भाव; बलवति अन्धकारे, माघराग्निप्रविष्टेव मसीगुटिका दृश्यमानेव प्रणष्टा वसन्तसेना।

Digitized by Google

अकारः। भावे, भावे; अन्वेषामि वसन्तसेनिकां (१)।

विटः। काणेल्लीमातः! अस्ति किंचिद्भं यदुपलक्षयसि।

अकारः। भावे, भावे, किं विअ (२)।

विटः। भूषणशब्दं सौरभ्यानुविद्धं माल्यगन्धं वा।

अकारः। गुणामि मल्लगन्धं, अन्धआलपूलिदाए उण णासिआए गुव्वंत्तं, उण ण पेक्खामि भूषणशद्दं (३)।

विटः ॥ जनान्तिकं॥ वसन्तसेने।

कामं प्रदोषतिमिरेण न दृश्यसे त्वं,
सौदामिनीव जलदोदरसन्धिलीना।
त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं;
गच्छस्व, भीरु, मुखराणि च नूपुराणि।

श्रुतं, वसन्तसेने!

वसं ॥ स्वगतं॥ सुदं, गहिदञ्च ॥ नाट्येन नूपुराणि उत्सार्य्य, माल्यानि चापनीय, किञ्चित्परिक्रम्य, हसेन परा

---

(१) भाव, भाव, अन्वेषयामि वसन्तसेनिकां।

(२) भाव, भाव, किमिव।

(३) गृणोमि माल्यगन्धं, अन्धकारपूरितया पुनर्नासिकया सुव्यक्तं, पुनर्न पश्यामि भूषणशब्दं।

Digitized by Google

मत्थ ॥ अम्मो! भित्तिपरामरिअमूहदं पक्खदुआरअं क्ख एदं; जाणामि अ संजोएण गेहस्स संवुदं पक्खदुआरअं (१)।

चारु। वयस्स समाप्तजपोऽस्मि; तत्सांप्रतं गच्छ, माहभ्यो बलिमुपहर।

विदू। भो ण गमिस्सं (२)।

चारु। धिक्कष्टं।

दारिद्र्यात्पुरुषस्य बान्धवजनोवाक्ये न सन्तिष्ठते;
सुस्निग्धा विमुखीभवन्ति सुहृदः स्कारोभवन्त्यापदः;
सत्त्वं ह्रासमुपैति, ग्लायति तनुः कान्तिः परिम्लायते,
पापं कर्म च यत्परैरपि कृतं, तत्तस्य सम्भाव्यते।

अपिच।

सङ्गं नैव हि कश्चिदस्य कुरुते, सम्भाष्यते नादरा
त्संप्राप्तोगृहमुत्सवेषु धनिनां सावज्ञमालोक्यते;
दूरादेव महाजनस्य विहरत्यल्पच्छदोलज्जया;
मन्ये, निर्धनता प्रकाममपरं षष्ठं महापातकं।

---

(१) आश्चर्यं; भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत्, जानामि च संयोगेन गेहस्य संवृतं पक्षद्वारकं।

(२) भो न गमिष्यामि।

Digitized by Google

अपिच।

दारिद्र्य! शोचामि भवन्तमेवमसच्छरीरे, सुहृदि, लुषिता; विपन्नदेहे मयि मन्दभाग्ये, ममेति चिन्ता क्व गमिष्यसि त्वम्।

विदू ॥ सवैलक्ष्यं॥ भो, वअस्स; जइ मए गन्तव्वं, ता एसा वि मे सहाइणी रदणिआ होदु (१)।

चारु। रदनिके; मैत्रेयमनुगच्छ।

चेटी। जं अज्जो आणवेदि (२)।

विदू। भोदि रदणिए; गेण्ह बलिं, पदीवञ्च; अहं अवावुदं पक्खदुआरअं करेमि (३)॥ तथा करोति॥

वसं। मम अब्भुववत्तिणिमित्तं अवावुदं पक्खदुआरअं ता जाव पविसामि॥ हद्धा॥ हद्धी! हद्धी; कधं! पदीवो॥ पटाञ्चलेन निर्वाप्य प्रविष्टा (४)॥

चारु। मैत्रेय, किमेतत्।

---

(१) भो, वयस्य; यदि मया गन्तव्यं, तस्मादेषापि मम सहायिनी रदनिका भवतु।

(२) यत् आर्य्य आज्ञापयति।

(३) भवति रदनिके, गृहाण बलिं, प्रदीपञ्च; अपावृतं पक्षद्वारकं करोमि।

(४) मम अभ्युपपत्तिनिमित्तं अपावृतं पक्षद्वारकं; तत् यावत् प्रविशामि। हा धिक्! हा धिक्! कथं, प्रदीपः।

Digitized by Google

विदू। अवावुदपक्खदुआरेण पिण्डीकदेण वादेण, णिव्वा विदो पदीवो। भोदि रदनिए, णिक्कम तुमं पक्खदुवारएण; अहंपि अब्भन्तरचदुस्सालादो पदीवं पज्जालिअ आअच्छामि (१)॥ इति निष्क्रान्तः॥

अकारः। भावे, भावे; अण्णेआमि वसन्तसेणिअं (२)।

विटः। अन्विष्यतां, अन्विष्यतां।

अकारः॥ तथा कृत्वा॥ भावे, भावे; गहिदा, गहिदा(३)।

विटः। मूर्ख; नन्वहं।

अकारः। इदो दाव भविअ एअन्ते भावे चिट्ठदु॥ पुन रन्विष्य चेटं गृहीत्वा॥ भावे, भावे; गहिदा, गहिदा (४)।

---

(१) अपावृतपक्षद्वारेण पिण्डीकृतेन वातेन, निर्व्वापितः प्रदीपः। भवति रदनिके, निष्क्रम त्वं पक्षद्वारकेण; अहमपि अभ्यन्तरचतुःशालके प्रदीपं प्रज्वाल्य आगच्छामि।

(२) भाव, भाव; अन्वेषयामि वसन्तसेनां।

(३) भाव, भाव; गृहीता, गृहीता।

(४) इतस्तावत् भूत्वा एकान्ते भावस्तिष्ठतु। भाव, भाव; गृहीता, गृहीता।

Digitized by Google

चेटः। भट्टके, चेडे म्हगे (१)।

अकारः। दूदोभावे, दूदोचेडे; भावे चेडे, चेडे, भावे; तुम्हे दाव एअन्ते चिट्ठ॥ पुनरन्विष्य रदनिकां केशेषु गृहीत्वा॥

भावे, अम्मदं गहिदा वसन्तसेणिआ;
अन्धआले पलाअन्ती, मअणगन्धेण सूइदा,
केशविन्दे पलामिट्ठा, चाणक्केणेव्व दोवदी (२)।

विटः। एषासि वयसोदर्पात्कुलपुत्रानुसारिणी,
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता।

अकारः। एआसि वासूशिरसि गहीदा।
केशेसु, वालेसु, शिरोरुहेसु,
आकोश, विकोश, लवाऽहिचण्डं,
अम्भुं, शिवं, अङ्करमीश्वरं वा (३)।

---

(१) भट्टारक चेटोऽहं।

(२) दूतोभाव, दूतश्चेटः; भावश्चेटः, चेटोभावः; युवां तावत् एकान्ते तिष्ठतं। भाव साम्प्रतं गृहीता वसन्तसेनिका।

अन्धकारे पलायमाना माल्यगन्धेन सूचिता,
केशवृन्दे परामृष्टा, चानक्येनेव द्रौपदी।

(३) एषासि वाला शिरसि गृहीता,
केशेषु, वालेषु, शिरोरुहेषु;
आकोश, विकोश, लपाधिचण्डं,
अम्भुं, शिवं, अङ्करमीश्वरं वा।

Digitized by Google

रद ॥ सभयं ॥ किं अज्जमिस्सेहिं ववसिदं (१)।

विटः। काणेलीमातः! अन्यएवैष स्वरयोगः।

शकारः। भावे, भावे; जधा दहिभक्खलुद्धाए मज्जालीए शब्दपलिवत्ते होदि, तधा दासीए शब्दपलिवत्ते कडे (२)।

विटः। कथं स्वरपरिवर्त्तः कृतः। अहो चित्रं। अथवा; किमत्र चित्रं।

दूयं रङ्गप्रवेशेन, कलानां चोपशिक्षया,
वञ्चनापण्डितत्वेन, स्वरनैपुण्यमाश्रिता।

॥ प्रविश्य विदूषकः ॥ हीही! भोः, पदोषमन्दमारुतेन, पशुबन्धोपनीतस्य छागस्य हृदयं, फुरफुरायदि पदीवो ॥ उपसृत्य रदनिकां, तथा दृष्ट्वा (३) ॥ भो रदणिए।

शकारः। भावे; मणुश्शे, मणुश्शे (४)।

---

(१) किं आर्य्यमिश्रैर्व्यवसितं।

(२) भाव, भाव; यथा दधिभक्षलुब्धायामार्जारिकायाः स्वरपरिवृत्तिर्भवति, तथा दास्याः स्वरपरिवृत्तिः कृता।

(३) आश्चर्य्यं! भोः, प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागस्य हृदयं, फरफुरायते प्रदीपः। भो रदनिके।

(४) भाव, भाव, मनुष्यो; मनुष्यः।

Digitized by Google

विदू। जुत्तं णेदं; सरिसं णेदं; जं अज्जचारुदत्तस्स दरिद्दाए तधा साअदं परपुरिसा गेहं पवेसीअन्ति (१)।

रद। अज्ज मित्तेअ पेक्ख मे परिहवं (२)।

विदू। किं तव परिहवो। आदु अम्हाणं (३)।

रद। णं तुम्हाणं जेव्व (४)।

विदू। किं एसो बलक्कारो (५)।

रद। अधदं (६)।

विदू। सच्चं (७)।

रद। सच्चं (८)।

---

(१) युक्तं नेदं, सदृशं नेदं, यत् आर्यचारुदत्तस्य दरिद्रतया साध्वतं परपुरुषा गेहं प्रवेक्ष्यन्ते।

(२) आर्य मैत्रेय, प्रेक्षस्व मे परिभवं।

(३) किन्नव परिभवः, अथवा अस्माकं।

(४) ननु युष्माकमेव।

(५) किमेष बलात्कारः।

(६) बाढं।

(७) सत्यं।

(८) सत्यं।

Digitized by Google

विदू ॥ सकोधं, दण्डकाष्ठमुद्यम्य ॥ मा दाव। भो; सके गेहे कुक्कुरोवि दाव षण्डा भोदि; किं उण अहं बम्हणो; ता एदिणा अम्हारिसजणभाअधेअकुडिलेण दण्डकट्ठेण, दुट्ठस्स विअ सुक्खाणवेणुअस्स, मत्थअं दे पहारेहिं कुट्टइस्सं (१)।

विटः। महाब्राह्मण! मर्षय, मर्षय।

विदू ॥विटं दृष्ट्वा॥ ण एत्थ एसो अवरज्झदि ॥अकारं दृष्ट्वा॥ एसो क्खु एत्थ अवरज्झदि। अरे, रे, राअसालअ संठाणअ, दुज्जण, दुम्मणुस्स; जुत्तं णेदं; जद्द वि णाम तत्त भवं अज्जचालुदत्तो दलिद्दो सम्वुत्तो, ता किं तस्स गुणेहिं णा लङ्किदा उज्जइणी, जेण तस्स गेहं पविसिअ परिअणस्स ईदिसो उवमद्दो करीअदि।

मा दुग्गदोत्ति परिहवो णत्थि कअंतस्स दुग्गदो णाम;
चारित्तेण विहीणो अट्ठो विअ दुग्गदो होइ (२)।

---

(१) मा तावत्; भोः; स्वके गेहे कुक्कुरोऽपि षण्ढो भवति; किं पुनरहं ब्राह्मणः। तत एतेनास्मादृशजनभागधेय कुटिलेन दन्तकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टिष्यामि।

(२) नाच एष अपराध्यति। एष खलु अचापराध्यति। अरे रे राजश्यालक, संस्थानक, दुर्जन, दुर्मनुष्य; युक्तं नेदं; यद्यपि नाम तत्रभवान् आर्य्यचारुदत्तोदरिद्रः संवृत्तः, तत् किं, तस्य गुणैर्नालङ्कृता उज्जयिनी, येन तस्य गृहं प्रविश्य परिज

विटः ॥ सवेलज्जं॥ महाब्राह्मण! मर्षय, मर्षय। अन्यजन श्रद्धया खल्विदमनुष्ठितं, न दर्पात्। पश्य। सकामाभिष्यते ऽस्माभिः।

विदू। किं दूअं (१)।

विटः। शान्तं, पाप! काचित्स्वाधीनयौवना। सा नष्टा; श्रद्धया तस्याः प्राप्तेयं शीलवज्जना। सर्व्वथा दूरमनुनय सर्व्वस्वं गृह्णतामिति ॥ खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति॥

विदू। मण्णुरिस, उट्ठेहि, उट्ठेहि; अआणन्तेण मए तुमं उवालद्धे; सम्मदं उण जाणन्तो अणुणेमि (२)।

विटः। ननु भवानेवाचानुनेयः तदुत्तिष्ठामि समयतः।

विदू। भणादु भवं (३)।

विटः। यदि दूरं वृत्तान्तं चारुदत्तस्य नाख्यास्यसि।

नस्य दृष्टस्योपमर्दः क्रियते। मादुर्गतदृति परिभवोनास्ति कृतान्तस्य दुर्गतोनाम, चारित्र्येण विहीन आढ्योऽपिच दुर्गतो भवति।

(१) किमियं।

(२) सत्पुरुष; उत्तिष्ठ, उत्तिष्ठ। अजानता मया त्वमुपालब्धः सात्मतं पुनर्जानन्ननुनयामि।

(३) भवतु भवान्।

Digitized by Google

विदू। ण कधइस्सं (१)।

विटः। एष ते प्रणयोविप्र शिरसा धार्य्यते मया;
गुणग्रस्तैर्वयं येन ग्रस्तवन्तोऽपि निर्ज्जिताः।

ग्रकारः ॥सासूयं॥ किं णिमित्तं उण भावे, एदस्स दुट्ठवडुकस्स, विणग्रञ्जलिं कदुग्र, पाएसु णिवडिदे (२)।

विटः। भीतोऽस्मि।

ग्रकारः। कस्स तुमं भीदे (३)।

विटः। तस्य चारुदत्तस्य गुणेभ्यः।

ग्रकारः। के विग्र तस्स गुणा, जस्स गेहं पविसिग्र ग्रसि दव्वं पि णत्थि? (४)

विटः। मामैवं।

सोऽस्मद्विधानां प्रणयैः क्रयीकृतो,
न तेन कश्चिद्विभवैर्विमानितः।
निदाघकालेष्विव सोदकोह्रदो,
नृणां स तृष्णामपनीय शुष्कवान्।

---

(१) न कथयिष्यामि।

(२) किं निमित्तं पुनर्भाव, एतस्य दुष्टवटुकस्य, विनया ञ्जलिं कृत्वा, पादयोर्निपतितः।

(३) कस्मात् त्वं भीतः।

(४) के इव तस्य गुणा, यस्य गृहं प्रविश्य भोक्तव्यमपि नास्ति।

Digitized by Google

प्रकारः ॥ सामर्षम् ॥ के ते गब्भदासे गब्भदासीए पुत्ते थूले विक्कन्ते? पण्डवे, सेदकेदू, पुत्ते राधाए, रावणे, इन्द्रदत्ते; आहो कुम्भीए तेण रामेण जादे अग्गत्थामा, धम्मपुत्ते, वडाऊ (१)।

विटः। मूर्ख; आर्यचारुदत्तः खलसौ।

दीनानां कल्पवृक्षः स्वगुणफलनतः, सज्जनानां खटुम्बी,
आदर्शः शिक्षितानां, सुचरितनिकषः, श्रीलवेलासमुद्रः,
सत्कर्त्ता, नावमन्ता, पुरुषगुणनिधिः, दक्षिणोदारपक्षो,
श्लेकः श्लाघ्यः; स जीवत्यधिकगुणतया योकुसम्भीव चान्ये।

तदितोगच्छामः।

प्रकारः। अगेण्हिअ वसन्तसेणिअं (२)।

विटः। नष्टा वसन्तसेना।

प्रकारः। कथं विअ (३)।

---

(१) कः स गर्भदासो गर्भदासस्याः पुत्रः स्थूरोविक्रान्तः पाण्डवः, सेनकेतुः, पुत्रोराधायाः, रावणः, इन्द्रदत्तः, आहो कुन्त्यास्तेन रामेण जातः अश्वत्थामा धर्मपुत्रो जटायुः।

(२) अगृहीत्वा वसन्तसेनां।

(३) कथमिव।

Digitized by Google

विटः। अन्धस्य दृष्टिरिव, पुष्टिरिवातुरस्य,
मूर्खस्य बुद्धिरिव, विद्धिरिवालसस्य;
स्वप्नस्मृतेर्व्यसनिनः परमेव विद्या;
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा।

अकारः। अगेण्हिअ वसन्तसेणिअं ण गमिस्सं (१)।

विटः। एतदपि न श्रुतं त्वया।
आलाने गृह्यते हस्ती, वाजी वल्गासु गृह्यते,
हृदये गृह्यते नारी, यदिदं नास्ति गम्यता।

अकारः। यदि गच्छसि, गच्छ तुमं; हगेण गमिस्सं (२)।

विटः। एवं गच्छामि ॥ इति निष्क्रान्तः ॥

अकारः। गदे खु भावे अभावं ॥ विदूषकमुद्दिश्य ॥ अले काकपदशीर्षमस्तका दुष्टवटुअका, उववित्र, उववित्र, (३)।

विदू। उववेसिदा जेव्व अम्हे (४)।

अकारः। केण (५)।

---

(१) अगृहीत्वा वसन्तसेनां न गमिष्यामि।

(२) यदि गच्छसि, गच्छ त्वं, अहं न गमिष्यामि।

(३) गतः खलु भावोऽदर्शनं।

(४) अरे काकपदशीर्षमस्तकादुष्टवटुका, उपविशत, उपविशत।

(५) उपविष्टाएव वयं।

Digitized by Google

विदू। कम्मणेण (१)।

प्रकारः। उट्ठेहि (२)।

विदू। उट्ठिस्सामो (३)।

प्रकारः। कदा (४)।

विदू। जदा पुणोवि देव्वमणुकूलं भविस्सदि (५)।

प्रकारः। अले खोद्द, खोद्द (६)।

विदू। रोदाविदा जेव्व अम्हे (७)।

प्रकारः। केण (८)।

विदू। दुग्गदीए (९)।

प्रकारः। अले हस, हस (१०)।

---

(१) केन।

(२) उत्तान्तेन।

(३) उत्तिष्ठ।

(४) उत्थास्यामि।

(५) कदा।

(६) यदा पुनरपि दैवमनुकूलं भविष्यति।

(७) अरे रोदिहि, रोदिहि।

(८) रोदिताएवं वयं।

(९) केन।

(१०) अरे हस, हस।

Digitized by Google

विदू। हसिस्सामी (१)।

अकारः। कदा (२)।

विदू। पुणोवि चट्टीए चारुदत्तस्स (३)।

अकारः। अले, ले, टुट्ठबडुका; भणेमि मम वअणेण तं दरिद्दचारुदत्तकं। एआ अणुवणा, अहिलसा, णवणाडअ दंअणुट्ठिदा मुत्तधालिव्व, वअन्तरेण णाम, गणिआ दासि आ, कामदेवाअदणुज्जाणादो पडदि, तुमं अणुलत्ता, अन्नेहिं वलक्कारागुणीअमाणा, तुअ गेहं पविट्ठा; ता, अद मम हत्थे अअं जेव्व पट्ठाविअ एणं अमर्पेमि, तदो अधिअखणे, ववहारं विणा, लडुं खिव्वादमाणाह तव, मए अणुबद्धा पोदी ऊवि अदि; आदु, अखिव्वादमाणाह, आमलणन्तिके वेले ऊवि अदि। अविअ, पेक्ख, पेक्ख।

कक्कालुका गोकडलित्तवेण्हा,
आके अ मुक्खे तलिदे ऊ मंजे,
भत्ते अ हेमन्तिअलत्तिभिद्धे,
लीणे अ वेले ण ऊ होदि पूदी।

गोट्ठिकं भणेमि, लडुकं भणेमि; तथा भणेमि, अथा हमे

---

(१) हसिष्यामः।

(२) कदा।

(३) पुनरपि चट्टायाः चारुदत्तस्य।

अत्तणो केलिकाए पासादवालायकवोदवालिआए उवविट्ठे, भणामि; अण्णधा, जदि ण भणेमि, ता कवाडतलपविट्ठं कवित्थगुलिअं विअ मत्थअं दे मडमडादइस्सं (१)।

---

(१) अरे, रे, दुष्टवटुक, भणिष्यसि मम वचनेन तं दरिद्र चारुदत्तं। एषा सुवर्णा, सहिरण्या, नवनाटकदर्शनोत्थिता सूत्रधारिणीव, वसन्तसेना, गणिकादारिका, कामदेवायतनोद्यानात् प्रभृति, त्वामनुरक्ता अस्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा; तद्यदि मम हस्ते स्वयमेव प्रस्थाप्य एनां समर्पयसि, ततोऽधिकरणे, व्यवहारं विना, शीघ्रं निर्यातयत-स्त्वं मयानुबद्धा प्रीतिर्भविष्यति। अथवा, अनिर्यातयत आमरणान्तिकं वैरं भविष्यति। अपिच प्रेक्षस्व, प्रेक्षस्व।

कुष्माण्डीगोमयलिप्ततटाग्राकक्ष,
शुष्कांतलितं खलु मांसं;
भक्तस्य हैमन्तिकराजिसिद्धं,
क्षीणाद्यास्य वेलायां न खलु भवति पूतिः।

शोभनं भणिष्यसि, लघुकं भणिष्यसि, तथा भणिष्यसि यथा इमात्मनः केलिकायां प्रासादवालायकपोतपालिकायामुपविष्टः शृणोमि। अन्यथा, यदि न भणसि, तदा कपाटतले प्रविष्टं कपित्थगुलिकमिव मस्तकन्ते मडमडदिति शब्दं कृत्वा भक्षयिष्यामि।

Digitized by Google

विदू। भणिस्सं (१)।

प्रकारः ॥ अपवार्य्य॥ चेडे, गडे अज्जकं जेव्व आवे (२)।

चेटः। अधदं (३)।

प्रकारः। ता शिग्घं अवक्कमस्सु (४)।

चेटः। ता गेण्ह भट्टके अग्गिं (५)।

प्रकारः। तव ज्जेव्व हत्थे चिट्ठदु (६)।

चेटः। एशे भट्टारहके गेण्हदु णं भट्टके अग्गिं (७)।

प्रकारः ॥ विपरीतङ्गृहीत्वा॥

णिव्वक्खलं मूलकपेशिवण्णं,
खम्भेण बेल्लूण अ कोशमुत्तं;

---

(१) भणिष्यामि।

(२) हे चेट, गतः सत्यमेव भावः।

(३) वाढं।

(४) तत् शीघ्रमपक्रमावः।

(५) तत् गृह्णातु भट्टारकोऽग्निं।

(६) तवैव हस्ते तिष्ठतु।

(७) एष भट्टारकस्वामिकः गृह्णात्वेनं भट्टारकोऽग्निं।

Digitized by Google

कुक्केहिं कुक्कीहिं अ वुक्कअन्ते,
जधा शिआले, शरणं पवामि (१)।

॥ परिक्रम्य निष्क्रान्तौ ॥

विदू। भोदि रदणिए, ण ख्लु दे अअं अवमाणो तत्थ भवदो चारुदत्तस्स णिवेदइदव्वो; दोग्गचपीडिअस्स मन्ने दि उणदरा पीडा उविस्सदि (२)।

रदनिका। अज्ज मित्तेअ; रअणिआ क्खु अहं संजद मुही (३)।

विदू। एवं णेदं (४)।

चारु ॥ वसन्तसेनामुद्दिश्य॥ रदनिके, मारुताभिलाषी प्रदोषसमयभीतार्त्तो रोहसेनः। ततः प्रवेश्यतामभ्यन्तरमयं। अनेन प्रावारकेण छादयैनम्॥ इति प्रावारकमयकृति॥

---

(१) निर्व्वल्कलं मूसलमग्रपर्णं
स्कन्धेन गृहीत्वा च कोषसत्वं।
कुक्कुरैः कुक्कुरीभिश्च शब्दायमानो,
यथा शृगालः, शरणं प्रयामि।

(२) भो रदनिके, न खलु ते अयं अपमानः तत्रभवत श्चारुदत्तस्य निवेदयितव्यः; दौर्गत्यपीडितस्य मन्ये द्विगुण तरा पीडा भविष्यति।

(३) आर्य्य मैत्रेय, रदनिका खल्वहं संयतमुखी।

(४) एवमेव।

Digitized by Google

वसं ॥ स्वगतं ॥ कधं परिजणोत्ति मं अवगच्छदि ॥ प्रावारकमुद्गृह्य समाघ्राय च ॥ स्वगतं ॥ सच्चहं ॥ अम्हे जादीकुसुमवासिदो पावारओ, अणुदासीणं से जोव्वणं पडिहासेदि (१)।

॥ अपवारितकेन प्रावृणोति ॥

चारु। ननु रदनिके, रोहसेनं गृहीत्वाभ्यन्तरं प्रविश।

वसं ॥ स्वगतं॥ मन्दभाइणी क्ख अहं तुअ अभन्तरस्स (२)।

चारु। ननु रदनिके प्रतिवचनमपि नास्ति। कष्टं।

यदा तु भाग्यक्षयपीडितान्द्रशं
नरः कृतान्तोपहितां प्रपद्यते;
तदास्य मित्राण्यपि यान्त्यमित्रतां,
चिरानुरक्तोऽपि विरज्यतेजनः।

॥ उपसृत्य रदनिका विदूषकस्य ॥

विदू। भो दृश्यं सा रत्नणिआ (३)।

---

(१) कथं परिजनइति मामवगच्छति। आश्चर्यं! जातीकुसुमवासितः प्रावारकः; अनुदासीनं अस्य यौवनं प्रतिभासते।

(२) मन्दभागिनी खल्वहं तवाभ्यन्तरस्य।

(३) भो दृश्यं सा रदनिका।

Digitized by Google

चारु। दूयं खा रदनिका; दूयमयरा का,

अविज्ञातावसरेन दूषिता मम वासया।

वसं ॥ खगतं ॥ णं; भूषिदा (१)।

चारु। छादिता मरदभेण चन्द्रलेखेव दृश्यते। अथवा, न युक्तं परकलत्रदर्शनं।

विदू। भो, अलं परकलत्तदंसणसङ्काए; एसा वसन्तसेणा कामदेवाअदनुज्जाणादो पडिणिअत्ता भवन्तमणुरत्ता (२)।

चारु। अये, दूयं वसन्तसेना ॥ खगतं॥

यया मे अनितः कामः क्षीणे विभवविस्तरे,

क्रोधः कुपुरुषस्येव खगाचेष्वेव वीदति।

विदू। भो वअस्स। एसो क्खु राअवालो भणादि (३)।

चारु। किं।

विदू। एसा वसुवत्ता, सहिलत्ता, णवणाअअदंसणुट्ठिदा सुत्तधालिअ वसन्तसेणा काम, णक्खिआ दालिआ, कामदेवा

---

(१) ननु भूषिता।

(२) भो, अलं परकलत्रदर्शनशङ्कया; एषा वसन्तसेना, कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ता।

(३) भोवयस्य एष खलु राजश्यालो भणति।

अदणुच्चाणादो पउदि तुमं अणुलत्ता, अम्हेहिं बलक्कारा णुणीअमाणा तुह गेहं पविट्ठा (१)।

वसं ॥ खगतं॥ बलक्काराणुणीअमाणेति, जं सच्चं; अलं किदत्थि एदेहिं अक्खरेहिं (२)।

विदू। ता जइ मम हत्थे सअं जेव्व पट्ठाविअ इअं वसन्तसेणि, ता अधिअरणे ववहारं विणा सअंअं णिव्वादमाणाह तव मए अणुबद्धा पीडी ऊविस्सदि; अलधा, आमलणं वेसं ऊविस्सदि (३)।

चारु ॥ सावअं॥ अज्जोऽयं॥ खगतं॥ अये कथन्देवतो बलात्कारचोम्या युवतिरियं। तेन खलु तस्यामेवासावां—

प्रविश गृहमिति प्रतोद्यमाना
न चलति भाग्यहतान्दशामवेक्ष्य।
पुरुषपरिचयेन च प्रगल्भं
न वदति यद्यपि भाषते वह्नि।

॥ प्रकाशं॥ भवति वसन्तसेने, अनेनाविज्ञानादपरिज्ञात परिजनोपचारेणापराद्धोऽसि, शिरसा भवतीमनुनयामि।

---

(१) एषा बलात्कारानुनीयमानेति।

(२) बलात्कारानुनीयमानादिति, यत्सत्यं, अलङ्कृतास्मि एतैरक्षरैः।

(३) तद्यदि मम हस्ते स्वयमेव प्रस्थाप्य एनां समर्पयसीति।

Digitized by Google

वसं। एदिणा अणुचिदभूमिआरोहणेणावराद्धा अज्जं शीशेण पणमिअ पसादेमि (१)।

विदू। भो, दुवेवि तुम्हे सुखं पणमिअ, कलमकेदारा अन्नोन्नं सीसेण सीसं समागदा, अहंपि इमिणा करहजाणुसे रिसेण सीसेण, दुवेवि तुम्हे पसादेमि, उट्ठेधत्ति (२)।

चारु। भवतु, तिष्ठतु प्रणयः।

वसं ॥ खगतं॥ चदुरो मधुरोअ अअं उवण्णासो; ण जुत्तं अज्ज ईदिसेण दुध आअदाए, मए पडिवसिदुं; भोदु, एवं दाव भणिस्सं॥ प्रकाशं॥ अज्ज, जदू एवं अहं अज्जस्स अणुगेण्हा, ता इच्छे अहं इमं अलंकारअं अज्जस्स गेहे णिक्खिवि विदुं; अलङ्कारस्स णिमित्तं एदे पावा अणुसरन्ति (३)।

---

(१) एतेनानुचितभूमिकारोहणेनापराद्धा, आर्य्यं शीर्षेण प्रणम्य, प्रसादयामि।

(२) भो, द्वावपि युवां सुखं प्रणम्य, कलमकेदारौ अन्योन्यं शीर्षेण शीर्षं समागतौ; अहमपि अमुना करभजानु सदृशेन शीर्षेण, द्वावपि युवां प्रसादयामि, उत्तिष्ठतमिति।

(३) चतुरोमधुरः अयं उपन्यासः न युक्तं अद्य ईदृशेन दुष्ट आगतया मया प्रतिवसितुं; भवतु, एवं तावत् भणिष्ये। आर्य्य, यदि एवं अहं आर्य्यस्य अनुगृहीता, तदिच्छामि अहं, इमं अलङ्कारकं आर्य्यस्य गेहे निक्षेपुं; अलङ्कारस्य निमित्तं एते पापा अनुसरन्ति।

Digitized by Google

चारु। अयोग्यमिदं न्यासस्य गृहम्।

वसं। अज्ज, अलिअं; पुरुसेसु णासा णिक्खिविअन्ति, ण उण गेहेसु (१)।

चारु। मैत्रेय, गृह्यतामयमलङ्कारः।

वसं। अणुगहिदम्हि (२)॥ इत्यलङ्कारानर्पयति॥

विदू ॥ गृहीता॥ सोत्थि भोदीए (३)।

चारु। धिङ्मूर्ख; न्यासः खल्वयं।

विदू ॥ अपवार्य्य॥ जइ एवं ता चोरेहिं अवहरीअदुत्ति (४)।

चारु। अचिरेणैव कालेन।

विदू। एसो से अम्हाणं विस्सासो (५)।

चारु। निर्यातयिष्ये।

---

(१) आर्य्य, अलीकं; पुरुषेषु न्यासानिःक्षिप्यन्ते न पुनर्गेहेषु।

(२) अनुगृहीतास्मि।

(३) स्वस्ति भवत्यै।

(४) यद्येवं तदा चौरैरपहृियतामिति।

(५) एषोऽस्माकं विन्यासः।

वसं। अज्ज, इच्छे अहं, इमिणा अज्जेण अणुगच्छिज्जन्ती, सकं गेहं गन्तुं (१)।

चारु। मैत्रेय, अनुगच्छ तत्र भवतीं।

विदू। तुमं जेव्व एदं कलहंसगामिणीमणुगच्छन्तो राअहंसो विअ सोहसि; अहं उण बम्हणो; जहिं तहिं जणेहिं चउप्पहोवणीदो विअ उवहारो कुक्कुरेहिं विअ, खज्जमाणो विवज्जिस्सं (२)।

चारु। एवं भवतु; स्वयमेवानुगच्छामि तत्र भवतीं। तद्राज मार्गविश्वासयोग्याः प्रज्वालयन्तां प्रदीपिकाः।

विदू। वद्धुमाणअ, पज्जालेहि पदीविआओ (३)।

चेटः ॥ जनान्तिकं ॥ अले, तेल्लेण विणा, पदीविआओ पज्जालीयन्ति? (४)।

---

(१) आर्य्य, इच्छाम्यहं, अनेन आर्य्येण अनुगम्यमाना, स्वकं गेहं गन्तुं।

(२) त्वमेव एतां कलहंसगामिनीं अनुगच्छन् राजहंस इव शोभसे; अहं पुनर्ब्राह्मणः; यत्र तत्र जनैश्चतुष्पथोपनीत इव उपहारः कुक्कुरैरिव खाद्यमानः विपत्स्ये।

(३) वर्द्धमानक, प्रज्वालय प्रदीपिकाः।

(४) अरे, तैलेन विना, प्रदीपिकाः प्रज्वाल्यन्ते?

Digitized by Google

विदू ॥ जनान्तिकं ॥ भो, ताओ खु अम्हाणं पदोविआओ, अवमाणिदनिद्धणकामुआ विअ गणिआ, णिस्सिणेहाओ दाणिं संवुत्ता (१)।

चारु। मैत्रेय, भवतु; हतं प्रदीपिकाभिः। पश्य।

उदयति हि मृगाङ्कः कामिनीगण्डपाण्डु
र्गृहमणपरिवारो राजमार्गप्रदीपः;
तिमिरनिकरमध्ये रश्मयोयस्य गौराः,
स्खलजलइव पङ्के, क्षीरधाराः पतन्ति।

॥ सानुरागं ॥ भवति वसन्तसेने, इदं भवत्यागृहं, प्रविशतु भवती ॥ वसन्तसेना सानुरागमवलोकयन्ती निष्क्रान्ता ॥

चारु। वयस्यगता वसन्तसेना; तदेहि, गृहमेव गच्छावः।

राजमार्गोहि शून्योऽयं, रक्षिणः सञ्चरन्ति च,
वञ्चना परिहर्त्तव्या वज्रदोषा हि शर्व्वरी।

॥ परिक्रम्य ॥ इदञ्च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ; वर्द्धमानकेनापि दिवा।

विदू। जधा भवं आणवेदि (२)।

॥ इति निष्क्रान्तौ ॥

इति मृच्छकटिके अलङ्कारन्यासोनाम प्रथमोऽङ्कः ॥

---

(१) भो, ताः खलु अस्माकं प्रदीपिका, अवमानितनिर्द्धन कामुकाइव गणिका, निःस्नेहादानीं संवृत्ताः।

(२) यथा भवान् आज्ञापयति।

॥ अथ द्वितीयोऽङ्कः ॥

॥ प्रविश्य चेटी ॥ अत्ताए अज्जआसआसं सन्देसेण पेसिदम्हि; ता जाव पविसिअ अज्जआसआसं गच्छामि ॥ परिक्रम्यावलोक्य च ॥ एसा अज्जआ, हिअएण किंपि आलिहन्ती चिट्ठदि; ता जाव उपसप्पामि, (१)।

॥ ततः प्रविशति आसनस्था सोत्कण्ठा वसन्तसेना मदनिका च ॥

वसं। हञ्जे, तदो, तदो (२)।

चेटी। अज्जए, ण किंपि मन्तेसि; किं तदो, तदो (३)।

वसं। किं मए भणिदे (४)।

---

(१) मात्रा आर्य्यायाः सकाशं सन्देशेन प्रेरितास्मि; तत् यावत् प्रविश्य आर्य्यासकाशं गच्छामि। एषा आर्य्या, हृदयेन किमप्यालिखन्ती तिष्ठति। तत् यावत् उपसर्पामि।

(२) हे चेटि, ततस्ततः।

(३) न किमपि मन्त्रयसि; किन्ततः ततः।

(४) किं मया भणितं।

Digitized by Google

चेटी। तदो तदोत्ति (१)।

वसं ॥ सभूचेपं ॥ आं एवं (२)।

॥ उपसृत्य प्रथमा चेटी ॥ अज्जए, अत्ता आदिसदि, णाहादा भविअ, देवदाणं पूअं णिव्वत्तेहित्ति (३)।

वसं। हञ्जे, विण्णवेहि अत्तं, अज्ज ण ण्हादुअं, ता बम्हणो जेव्व पूअं निव्वत्तेदुत्ति (४)।

चेटी। जं अज्जआ आणवेदि (५) ॥ इति निष्क्रान्ता ॥

मद। अज्जए, सिणेहो पुछीअदि, ण पुरोभाइदा किं णेदं (६)।

वसं। मदणिए, कीदिसिं मं पेक्खसि (७)।

---

(१) ततस्ततइति।

(२) आं एवं।

(३) आर्य्ये, माता आदिशति, स्नाता भूत्वा, देवतानां पूजां निवर्त्तयेति।

(४) चेटि, विज्ञापय मातरं, अद्य न स्नास्यामि, तत् ब्राह्मणएव पूजां निवर्त्तयतिति।

(५) यत् आर्य्या आज्ञापयति।

(६) आर्य्ये, स्नेहः पृच्छ्यते, न पुरोभागिता किं नेदं।

(७) मदनिके, कीदृशीं मां प्रेक्षसे।

Digitized by Google

चेटी। अज्जाए सुट्ठिअमअणलेहं, जाणामि, हिअअ गदं किंपि, अज्जा अहिलसदित्ति (१)।

वसं। सुट्ठु तुए जाणिदं; परहिअअग्गहणपण्डिआ मदणिआ क्खु तुमं (२)।

मद। पिअं मे, पिअं, कामो क्खु णाम एसो भअवं अणुगहिदो महूसवो तरुणजणस्स; ता कधेदु अज्जा, किं, राआ, राअवल्लहो वा, सेवीअदि (३)।

वसं। हञ्जे, रमिदुमिच्छामि, ण सेविदुं (४)।

मद। विज्जाविसेसालङ्किदो किं कोपि बम्हणो जुवा कामीअदि (५)।

वसं। पूअणीओ मे बम्हणो जणो (६)।

---

(१) आर्य्यायाः भृत्यहृदयत्वेन जानामि, हृदयगतं किमपि, आर्य्याभिलषतीति।

(२) सुष्ठु त्वया ज्ञातं; परहृदयग्रहणपण्डिता मदनिका खलु त्वं।

(३) प्रियं मे, प्रियं, कामः खलु नाम एष भगवान् अनुगृहीतोमहोत्सवः तरुणजनस्य; तत्कथयतु आर्य्या, किं, राजा, राजवल्लभोवा सेव्यते।

(४) चेटि, रन्तुमिच्छामि न सेवितुं।

(५) विद्याविशेषालङ्कृतः किं कोऽपि ब्राह्मणो युवा काम्यते।

(६) पूजनीयोमे ब्राह्मणोजनः।

Digitized by Google

मद। किं, अणेअणअराभिगमणजणिदविहवविच्छारो वाणिअजुआ वा कामीअदि (१)।

वसं। हञ्जे, उआरूढसिणेहं पि पणइजणं परिचइअ, देसंतरगमणेण वाणिअजणो महन्तं विओअजं दुक्खमुप्पादेदि (२)।

मद। अज्जए, ण राजा, ण राअवल्लहो, ण बम्हणो, ण वाणिअजणो; ता को दाणिं सो भट्टिदारिआए कामीअदि (३)।

वसं। हञ्जे, तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि (४)।

चेटी। अज्जए गदम्हि (५)।

---

(१) किं, अनेकनगराभिगमनजनितविभवविस्तरोवाणिज युवा वा काम्यते।

(२) चेटि, उपारूढस्नेहं अपि प्रणयिजनं परित्यज्य, देशान्तरगमनेन वाणिजजनोमहद्विओगजदुःखमुत्पादयति।

(३) आर्ये, न राजा, न राजवल्लभो, न ब्राह्मणो, न वाणिजजनः, तत्कदानीं स भर्तृदारिकया काम्यते।

(४) चेटि, त्वं मया सह कामदेवायतनोद्यानं गता आसीः।

(५) आर्ये, गताऽस्मि।

Digitized by Google

वसं। तधा वि मं उदासीणा विअ पुच्छसि (१)।

मद। जाणिदं; किं, सो जेव्व, जेण अज्जआ सरणागदा अब्भुववण्णा (२)।

वसं। किं णामहेओ क्खु सो (३)।

मद। सो क्खु सेट्ठिचत्तरे पडिवसदि (४)।

वसं। अइ, णामं से पुच्छिदासि (५)

मद। सो क्खु, अज्जए, सुगहिदणामहेओ अज्जचारुदत्तो णाम (६)।

वसं॥ सहर्षं॥ साहु, मदणिए साहु, सुट्ठु तुए जाणिदं (७)।

मद ॥ सगतं॥ एवं दाव॥ प्रकाशं॥ अज्जए, दरिद्दो क्खु सो सुणीअदि (८)।

---

(१) तथापि मां उदासीनेव पृच्छसि।

(२) ज्ञातं; किं, सएव येनार्य्याशरणागता अभुपपन्ना।

(३) किन्नामधेयः खलु सः।

(४) स खलु श्रेष्ठिचत्वरे प्रतिवसति।

(५) अयि, नामास्य पृष्टासि।

(६) स खलु, आर्य्ये, सुगृहीतनामधेयः आर्य्यचारुदत्तो नाम।

(७) साधु, मदनिके, साधु; सुष्ठु त्वया ज्ञातं।

(८) एवं तावत्। आर्य्ये, दरिद्रः खलु स श्रूयते।

Digitized by Google

वसं। अदोजेव्व कामीअदि; दरिद्दपुरिसवङ्कंतमणा क्खु गणिआ लोए अवअणीआ भोदि (१)।

मद। अज्जए, किं क्षीणकुसुमं सहआरपादवं मउअ रीओ उण सेवन्ति? (२)।

वसं। अदोजेव्व ताओ मउअरीओ वुच्चन्ति (३)।

मद। अज्जए, जइ सो मणीसिदो ता कीस दाणिं सहसा णाहिसारीअदि (४)।

वसं। हञ्जे, सहसा अहिसारिअन्तो पच्चुआरदुल्लह दाए, मा दाव जणो दुल्लहदंसणो पुणो भविस्सदि (५)।

---

(१) अतएव काम्यते; दरिद्रपुरुषसंक्रान्तमनाः खलु गणिका लोके अवचनीया भवति।

(२) आर्ये, किं क्षीणकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते।

(३) अतएव तामधुकर्य उच्यन्ते।

(४) आर्ये, यदि स मनीषितस्तत् किमर्थमिदानीं सहसा नाभिसार्यते।

(५) चेटि, सहसा अभिसार्यमाणः प्रत्युपकारदुर्लभ तया, मा तावत् जनोदुर्लभदर्शनः पुनर्भविष्यति।

मद०। किं, अदोजेव्व सो अलङ्कारओ तस्स हत्थे णिक्खित्तो (१)।

वसं०। हञ्जे, सुट्ठु दे जाणिदं (२)।

॥ नेपथ्ये॥ अरे भट्टा, दम्म सुवण्णाह लुद्धु, जूदकरु, पपलोणु, पपलीणु, ता गेह्ह, गेह्ह, तिष्ठ, दूरात्प्रदृष्टोऽसि (३)।

॥ प्रविश्य अपटाक्षेपेण संभ्रान्तः समाहकः॥

कष्टे! एसे जूदिअल, भावे; हीमाणहे, णवबन्धणमुक्काए विअ गद्दहीए हा ताडिदोम्हि गद्दहीए, अङ्गलाअ मुक्काए अत्तीए घडुक्को विअ घादिदोम्हि अत्तीए।

लेखअवावडहिअअं सहिअं दट्ठूण झत्ति पब्भट्ठे।

एहिं मग्गणिवडिदे, कं णु ङ्ख अवणं पवज्जामि।

ता जाव एदे अहिअ जूदिअला अवरो मं अवेअन्ति ताव इदो विपडीदेहिं पादेहिं एदं सुण्णदेउलं पविशिअ, देवी भविस्सं (४)।

---

(१) किं अतएव सोऽलङ्कारस्तस्य हस्ते निक्षिप्तः।

(२) चेटि, सुष्ठु त्वया ज्ञातं।

(३) अरे भट्टारक, दम्मसुवर्णस्य कृते लुब्धः द्यूतकरः प्रपलायितः, तद्गृहाण, गृहाण; तिष्ठ; दूरात् प्रदृष्टोऽसि।

(४) कष्टं! एष द्यूतकर, भावः; आश्चर्यं, नवबन्धनमुक्तया इव गर्दभ्या हा ताडितोऽस्मि गर्दभ्या, अङ्गराजमुक्तया अत्या घटोत्कच इव घातितोऽस्मि अत्या।

Digitized by Google

॥ बहुविधं नाट्यं कृत्वा तथा स्थितः; ततः प्रविशति माथुरोद्यूतकरश्च ॥

माथुरः। अले भट्टा, दश सुवण्णाइ लुद्धु जूदकरु पप लीणु, गेण्ह; तिष्ठ, तिष्ठ, दूरात्प्रदृष्टोऽसि (१)।

द्यूत। जदु वज्जसि पाआलं, इन्दं सरणं च सम्पदं जासि,
सहिअं वज्जिअ एक्कं, रुद्दो वि ण रक्खिदुं तरदि (२)।

लेखकव्याकृतहृदयं सभिकं दृष्ट्वा झटिति प्रभ्रष्टः

इदानीं मार्गनिपतितः कं नु खलु शरणं प्रव्रजामि। तत् यावत् एतौ सभिकद्यूतकरौ अन्यतोमौ अन्विष्यतः, तावत् इतोविपरीताभ्यां पादाभ्यां एतत् शून्यं देवकुलं प्रविश्य, देवीभविष्यामि।

(१) अरे भट्टा, दश सुवर्णस्य कृते रुद्रः द्यूतकरः प्रपलायितः; गृहाण; तिष्ठ, तिष्ठ, दूरात् प्रदृष्टोऽसि।

(२) यदि व्रजसि पातालं, इन्द्रं शरणञ्च सम्प्रतं यासि; सभिकं वर्जयित्वा एकं रुद्रोऽपि न रक्षितुं शक्नोति।

Digitized by Google

माथुरः। कहिं, कहिं, सुसहिअविप्पलद्धआ,
पलासि, से भअपलिवेविदङ्गआ,
पदे, पदे, असमविसमं खलन्तआ,
कुलं, जसं, अदू कसणं कलेन्तआ (१)।

द्यूत ॥पदं वीक्ष्य॥ एसोवज्जदि; दूअंपणट्ठा पदवी (२)।

माथु ॥ आलोक्य, सवितर्कं॥ अले विप्पतीपु पादु, पडिमा गुणु देवउलु ॥ विचिन्त्य॥ धुत्तु जुदिकरु, विप्पदीवपदेहिं देउलं पविट्ठु (३)।

द्यूत। ता अणुसरेम्ह (४)।

माथु। एव्वं भोदु (५)।

॥ उभौ देवकुलप्रवेशं निरूपयतः; दृष्ट्वा अन्योन्यं संज्ञाप्य ॥

---

(१) कुच, कुच, सुसभिकविप्रलब्धक
पलायसे, रे भयपरिवेपिताङ्गक
पदे, पदे, समविषमं स्खलन्
कुलं यशः अतिकृष्णं कुर्व्वन्।

(२) एष व्रजति; दूतं प्रणष्टा पदवी।

(३) अरे, विप्रतीपौ पादौ प्रतिमागृह्यं देवकुलं, धूर्त्तो द्यूतकरोविप्रतीपपादाभ्यां देवकुलं प्रविष्टः।

(४) ततोऽनुसरावः।

(५) एवं भवतु।

Digitized by Google

द्यूत। कधं, कट्ठमयी पडिमा (१)।

माथु। अले, ण, ऊ शैलप्पडिमा ॥ इति बहुविध स्यालपतः संज्ञाप्य च ॥ एव्वं भोदु; एहि, जूदं किलेल्ला (२) ॥ बहुविधं द्यूतं क्रीडतः ॥

संवा ॥ द्यूतेङ्गाविकारसम्बरणमनुविधं कृत्वा; स्वगतं ॥

अले, कत्ताशद्दे णिद्दाणअस्स हलद्द हड्डकं मणुश्शश्श,

ढक्काशद्दे व्व णराधिवस्स पब्भट्ठलच्छीश्श।

जाणामि ण कीलिश्शं; सुमेलुशिहलपडणसंणिहं जूअं;

तहवि, ऊ कोद्दलमञ्जले कत्ताशद्दे मणं हलदि (३)।

द्यूत। मम पाठे, मम पाठे (४)।

माथु। ण, ऊ, मम पाठे, मम पाठे (५)।

---

(१) कथं, काष्ठमयी प्रतिमा।

(२) अरे, न, खलु शैलप्रतिमा। एवमस्तु, एहि, द्यूते न क्रीडावः।

(३) अरे, कत्ता शब्दो निर्दानकस्य हरति हृदयं मनुष्यस्य, ढक्का शब्दइव नराधिपस्य प्रभ्रष्टराज्यस्य।

जानामि, न क्रीडिष्यामि; सुमेरुशिखरपतनसदृशं द्यूतं;

तथापि खलु, कोकिलमधुरः कत्ताशब्दोमनोहरति।

(४) मम पाठे, मम पाठे।

(५) न, खलु, मम पाठे मम पाठे।

Digitized by Google

संवा ॥ अन्यतः सहसोपसृत्य ॥ णं मम पाठे (१)।

द्यूत। लद्धे गोहे (२)।

माथु ॥ गृहीत्वा ॥ अले, प्रेदण्डा, गगहीदोसि; पअच्छ तं दअसुवण्णं (३)।

संवा। अज्ज दद्दस्सं (४)।

माथु। अऊणा पअच्छ (५)।

संवा। दद्दस्सं; पसादं कलेहि (६)।

माथु। अले, णं, संपदं पअच्छ (७)।

संवा। शिलु पडदि (८)।

॥ इति भूमौ पतति। उभौ वज्रविधन्ताऽऽयतः॥

---

(१) ननु मम पाठे।

(२) लब्धः पुरुषः।

(३) अरे लुप्तदण्डक गृहीतोऽसि; प्रयच्छ तद्दशसुवर्णं।

(४) अद्य दास्यामि।

५) अधुना प्रयच्छ।

(६) दास्यामि; प्रसादं कुरु।

(७) अरे, ननु, सांप्रतं प्रयच्छ।

(८) शिरः पतति।

Digitized by Google

माथु। एसु तुं ऊ जूदिअरमण्डलीए वट्टोसि (१)।

संवा ॥ उत्थाय सविषादं॥ कधं, जूदिअलमण्डलीए वट्टोम्हि। ही, एसे अम्हाणं जूदिअलाणं अलङ्घणीए समए; ता कुदो ददस्सं (२)।

माथु। अले, गन्धु कुलुकुलु (३)।

संवा। एव्वं करेमि ॥ द्यूतकरमुपसृत्य ॥ अद्धं ते देमि, अद्धं मे मुञ्चदु (४)।

द्यूत। एव्वं भोदु (५)।

संवा ॥ सभिकमुपगम्य॥ अद्धस्स गन्धु करेमि, अद्धं पि मे अय्यो मुञ्चदु (६)।

---

(१) एष त्वं खलु द्यूतकरमण्डल्या वर्त्तोऽसि।

(२) कथं द्यूतकरमण्डल्या वर्त्तोऽस्मि। कष्टं, एषोऽस्माकं द्यूतकराणामलङ्घनीयः समयस्तस्मात्कुतो दास्यामि।

(३) अरे, गण्डः क्षतः।

(४) एवं करोमि। अर्द्धं तुभ्यं ददामि, अर्द्धं मह्यं मुञ्चतु।

(५) एवमस्तु।

(६) अर्द्धस्य गण्डं करोमि, अर्द्धमपि मह्यं आर्य्यो मुञ्चतु।

Digitized by Google

माथु। को दोसु; एव्वं भोदु (१)।

संवा ॥ प्रकाशं ॥ अज्ज, अद्धं तुए मुक्के (२)।

माथु। मुक्के (३)।

संवा ॥ द्यूतकरं प्रति ॥ अद्धे तुए वि मुक्के (४)।

द्यूत। मुक्के (५)।

संवा। सम्मदं गमिस्सं (६)।

माथु। पअच्छ तं दशसुवण्णं; कहिं गच्छसि (७)।

संवा। पेक्खध, पेक्खध, भट्टालआ! हा, सम्मदं जेव्व एक्काह अद्धे गन्धु कडे, अवलाह अद्धे मुक्के, तथावि, मं अवलं सम्मदं जेव्व मग्गदि (८)

---

(१) कोदोषः, एवम्भवतु।

(२) आर्य्य, अर्द्धं त्वया मुक्तं।

(३) मुक्तं।

(४) अर्द्धं त्वयापि मुक्तं।

(५) मुक्तं।

(६) सात्मतं गमिष्यामि।

(७) प्रयच्छ तद्दशसुवर्णं, कुत्र गच्छसि।

(८) प्रेक्षध्वं, प्रेक्षध्वं, भट्टारकाः। हा सात्मतं एव एकस्य अर्द्धगण्डः क्षतः, अपरस्य अर्द्धं मुक्तं, तथापि मां अबलं सात्मतमेव याचते।

Digitized by Google

माथु ॥ गृहीत्वा ॥ धुत्तु; माथुर अहं, णिउण एत्थ ण अहं धुत्तिय्यामि । ता, पयच्छ तं, लुद्दंडआ, सव्वं सुवण्णं सम्मदं (१)।

संवा। कुदो दादव्वं (२)।

माथु। पिदरं विक्किणिअ पयच्छ (३)।

संवा। कुदो मे पिदा (४)।

माथु। मादरं विक्किणिअ पयच्छ (५)।

संवा। कुदो मे मादा (६)।

माथु। अप्पाणं विक्किणिअ पयच्छ (७)।

संवा। करेध पसादं; णेध मं राजमग्गं (८)।

---

(१) धूर्त्त; माथुर अहं निपुणः, अत्र नाहं धूर्त्तयामि, ततः प्रयच्छ तं लुब्धदण्डकं सर्व्वं सुवर्णं साम्प्रतं।

(२) कुतोदास्यामि।

(३) पितरं विक्रीय प्रयच्छ।

(४) कुतोमे पिता।

(५) मातरं विक्रीय, प्रयच्छ।

(६) कुतोमे माता।

(७) आत्मानं विक्रीय प्रयच्छ।

(८) कुरुत प्रसादं, नयत मां राजमार्गे।

माथु। पसरु (१)।

संवा। एव्वं भोदु ॥ परिक्रामति॥ अय्या:, क्खिणिध मं इमस्स सहिअस्स इत्यादो दसेहिं सुवण्णकेहिं ॥ इहा; आकाशे॥ किं भणाध? किं कलइस्सामि त्ति? गेहे दे कम्मकले ऊविस्सं। कधं, अइदअ पडिवअणं गदे। भोदु; एवं इमं अण्णं भणइस्सं ॥ पुनस्तदेव पठति॥ कधं, एसेवि मं अवधीलिअ गदे। आः अय्यचारुदत्तस्स विहवे विहडिदे एसे वहामि मंदभाए (२)।

माथु। णं देहि (३)।

संवा। कुदो दइस्सं (४) ॥ इति पतति। माथुरः कर्षति॥

---

(१) प्रसर।

(२) एवमस्तु। आर्य्याः, क्षीणीध्वं मां, अस्य सभिकस्य हस्तात् दशभिः सुवर्णकैः। किं भणत? किं कलहं करिष्यसीति। गेहे ते कर्मकरोभविष्यामि। कथं, अदत्ता प्रति वचनं गतः। भवत्वेवं, इमं अन्यं मणिष्यामि। कथं, एषोऽपि मामवधीर्य्य गतः। आः आर्य्य चारुदत्तस्य विभवे विघटिते एषोऽहं बद्ध मन्दभाग्यः।

(३) ननु देहि।

(४) कुतोदास्यामि।

Digitized by Google

संवा। अज्जा, पलित्ताअध, पलित्ताअध (१)।

॥ ततः प्रविशति दर्दुरकः॥

दर्दु। भो; द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यं। कुतः। न गणयति पराभवं, कुतश्चिद्धरति, ददाति च नित्यमर्थजातं। नृपतिरिव निकाममायदर्शी विभववता समुपास्यते जनेन।

अपिच।

द्रव्यं लब्धं द्यूतेनैव, दारामिचं द्यूतेनैव,
दत्तं, भुक्तं, द्यूतेनैव, सर्व्वं नष्टं द्यूतेनैव।

अपिच।

चेताहृतसर्व्वस्वः, पावरपतनाच्च शोषितशरीरः,
नर्दितदर्शितमार्गः, कटेन विनिपातितोयामि।

॥ अयतोऽवलोक्य ॥ अयमस्माकं पूर्व्वसभिको माथुर इत एवाभिवर्त्तते। भवत्पक्रमितुं न शक्यते तदवगुण्ठयाम्यात्मानम्॥ बहुविधं नाट्यं कृत्वा स्थितः। उत्तरीयं निरीक्ष्य॥

अयं पटः सूचद्दरिद्रतां गतो,
ह्ययं पटः छिद्रशतैरलङ्कृतः;
अयं पटः प्रावरितुं न शक्यते,
ह्ययं पटः संवृतएव शोभते।

---

(१) आर्य्या, परित्रायत, परित्रायत।

अथवा किमयं तपस्वी करिष्यति । बोधि ।

पादेनैकेन गगणे द्वितीयेन च भूतले,
तिष्ठाम्युल्लम्बितस्यावद्यावत्तिष्ठति भास्करः ।

माथु । दापय, दापय ।

संवा । कुदोदक्खं (१) ॥ माथुरः कर्षति ॥

दर्दु । अये किमेतदयतः ॥ आकाशे ॥ किं भवानाह । अयं द्यूतकरः सभिकेन खलीक्रियते, न कश्चिन्मोचयति । नन्वयं दर्दुरोमोचयति ॥ उपसृत्य ॥ अन्तरमन्तरम् ॥ दृष्ट्वा ॥ अये, कथं माथुरोधूर्त्तः । अयमपि तपस्वी संवाहकः ।

यस्यं दिवसान्तमानतशिरोनाम्ने समुल्लंबितो,
यस्योद्वर्षणखोष्टकैरपि सदा पृष्ठेन जातः क्षिणः ।
यस्यैतच्च न कुक्कुरैरहरहर्जङ्घान्तरं चर्व्यते,
तस्यात्मायतकोमलस्य सततं द्यूतप्रसङ्गेन किं ।

भवतु ; माथुरं तावत् सान्त्वयामि ॥ उपगम्य ॥ माथुर, अभिवादये ।

माथु । प्रत्यभिवादये ।

दर्दु । किमेतत् ।

माथु । अय्यं, दसमुवण्णं धारेदि (२) ।

---

(१) कुतोदास्यामि ।

(२) अयं दशसुवर्णकं धारयति ।

Digitized by Google

दर्दु। ननु कल्यवर्त्तमेतत्।

माथु ॥ दर्दुरस्य कचतलसुण्डीकृतं घटमाकृष्य॥ भट्टाः पश्यत, पश्यत। जर्ज्जरपटप्रावृदो अअं पुरिसो दसुण्णुवण्णं कल्लवत्तं भणादि (१)।

दर्दु। अरे मूर्ख, नन्वहं दशसुवर्णान् कटकरणेन प्रयच्छामि; तत्किं; यस्यास्ति धनं स च किं क्रोडे कृत्वा दर्शयति। अरे;

दुर्व्वर्णोऽसि, विनष्टोऽसि, दशस्वर्णस्य कारणात्,
पञ्चेन्द्रियसमायुक्तो नरोव्यापाद्यते यथा।

माथु। भट्टा, तुए दसुण्णुवणु कल्लवत्तु मम एव विहव्वु (२)।

दर्दु। यद्येवं श्रूयतां, तर्हि अन्यान् तावद्दशसुवर्णानस्मैव प्रयच्छ, अयमपि द्यूतं क्रीणयतु।

माथु। तत्किं भोदु (३)।

दर्दु। यदि जेष्यति, तदा दास्यति।

---

(१) पश्यत, पश्यत। जर्ज्जरपटप्रावृतोऽयं पुरुषोदश सुवर्णं कल्यवर्त्तं भणति।

(२) तव दशसुवर्णं कल्यवर्त्तः मम एषविभवः।

(३) तत्किभवतु।

Digitized by Google

माथु। अह ण जिणादि (१)।

दर्दु। तदा न दास्यति।

माथु। अह ण जुत्तं जम्पिदुं; एव्वं अक्खन्तो तुमं, पअच्छ धुत्तआ। अहं पि णाम माथुरो, धुत्तो, जूअं मित्था आदंस आमि, अण्णस्स वि अहं ण विभेमि। धुत्त खण्डिअवुत्तोऽसि तुमं (२)।

दर्दु। अरे, कः खण्डितवृत्तः।

माथु। तुं ज्ज खण्डिदवुत्तो (३)।

दर्दु। पिता ते खण्डितवृत्तः॥ संवाहकस्यापक्रमितुं संज्ञा ददाति॥

माथु। गोसाविआपुत्त णं एव्वं जेव्व दूदं तुए सेविदं (४)।

दर्दु। मया एवं द्यूतमासेवितम्।

---

(१) अथ न जयति।

(२) अथ न युक्तं जल्पितुं; एवं आचक्षाणस्त्वं, प्रयच्छ; धूर्तक। अहमपि नाम माथुरोधूर्तः, द्यूतं मिथ्या आदर्शं यामि, अन्यस्मै अहं न विभेमि, धूर्तः खण्डितवृत्तोऽसि त्वं।

(३) त्वं खलु खण्डितवृत्तः।

(४) वेश्यापुत्र, एवमेव द्यूतं त्वया सेवितं।

Digitized by Google

माथु। अले, संवाहआ, पअच्छ तं दसुण्णुवणं (१)।

संवा। अज्ज दद्दस्सं, दाव दद्दस्सं (२) ॥ माथुरः कर्षति ॥

दर्दु। मूर्ख, परोचे खलीकर्त्तुं शक्यते, न समायतः खली कर्त्तुं।

॥ माथुरः संवाहकमाक्रम्य घोणायां मुष्टिप्रहारं ददाति। संवाहकः सशोणितं मूर्द्धा नाटयन् भूमौ पतति। दर्दुरक उपसृत्यान्तरयति। माथुरो दर्दुरन्ताडयति। दर्दुरो विप्र तीपन्ताडयति।

माथु। अले, अले, दुट्ठ छिणालिआपुत्तअ, फलंपि पाविहसि (३)।

दर्दु। अये मूर्ख, अहं त्वया मार्गगतए वताडितः; श्वो यदि राजकुले ताडयिष्यसि तदा द्रक्ष्यसि।

माथु। एअ पेक्खिअ्अं (४)।

दर्दु। कथं द्रक्ष्यसि।

---

(१) अरे समाहक, प्रयच्छ त्वं दशसुवर्णं।

(२) अद्य दास्यामि, तावत् दास्यामि।

(३) अरे, अरे, दुष्टपुंश्चलीपुत्रक, फलमपि प्राप्स्यसि।

(४) एष प्रेक्षिष्ये।

Digitized by Google

माथु ॥ प्रसार्य्य चक्षुषी ॥ एवं पेक्खिस्सं (१)।

॥ दर्दुरो माथुरस्य पांशुना चक्षुषी पूरयित्वा संवाहकस्या पक्रमितुं संज्ञान्ददाति। माथुरोऽक्षिणी निमृज्य भूमौ पतति। संवाहकोऽपक्रामति॥

दर्दु ॥ स्वगतं॥ प्रधानसभिकोमाथुरो मया विरोधितः; तस्माच्च युज्यते स्थातुं। कथितञ्च मम प्रियवयस्येन अर्विलकेन, यथा, किल आर्य्यकनामा गोपालदारकः सिद्धादेशेन समा दिष्टो राजा भविष्यतीति; सर्व्वस्यास्मदिधोजनस्यमनुसरति, तदहमपि तत्समीपमेव गच्छामि ॥ इति निष्क्रान्तः॥

संवा ॥ सचाभं परिक्रम्य दृष्ट्वा॥ एसे कस्सवि अपरावुद पक्खदुयालके गेहे, ता एत्थ पविसिस्सं ॥ प्रवेशं रूपयित्वा; वसन्तसेनामालोक्य॥ अज्जे, सरणागदेम्हि (२)।

वसं। अभयं सरणागदस्स; हञ्जे, ढक्केहि पक्खदुआरं (३)।

चेटी ॥ तथा करोति॥

---

(१) एवं प्रेक्षिष्ये।

(२) एतत्कस्यापि अपराद्धपक्षदारकं गेहं, तदत्र प्रविशामि। आर्य्ये, शरणागतोऽस्मि।

(३) अभयं शरणागतस्य; हे चेटि, पिधेहि पक्षदारकं।

Digitized by Google

वसं। कुदो दे भयं (१)।

संवा। अज्जे, धणिकादो (२)।

वसं। हज्जे, सव्वदं अवावुणु पक्खदुआरअं (३)।

संवा ॥ आत्मगतं ॥ कधं, धणिकादो तुलिदं से भअ कालणं? सुट्ठु खु एवं वुच्चदि; जे अत्तबलं जाणिअ भालं तुलिदं वहेदू माणुशे, ताह खलणं ण जाअदि, ण अ कन्तार गडे विवज्जदि। एत्थ लक्खिदम्हि (४)।

माथु ॥ अक्षिणी प्रमृज्य शूतकरं प्रति ॥ अले, देहि, देहि (५)।

---

(१) कुतस्ते भयं।

(२) आर्य्यं धनिकात्।

(३) चेटि, सात्मतं अपावृणु पक्षद्वारं।

(४) कथं, धनिकात् तुलितं अस्यैव भयकारणं? सुष्ठु खलु एवं उच्यते। यआत्मबलं ज्ञाला भारं तुलितं वहति मनुष्यः, तस्य स्खलनं न जायते, न च कान्तारगतोविपद्यते। अत्र लक्षितोऽस्मि।

(५) अरे, देहि, देहि।

द्यूत। भट्टा, जावच्चिअ अम्हे दद्दुरेण कलहाविदा, तावच्चिअ सो गोट्ठो अवक्कन्तो (१)।

माथु। तस्स दूदकलमुट्ठिप्पहालेण णासिका भग्गा, एहि, रुहिरपहं अणुसरेल्ह (२) ॥ अनुसृत्य ॥

द्यूत। भट्टा, वसन्तसेणागेहं पविट्ठो सो (३)।

माथु। भूदाइं सुवण्णाइं (४)।

द्यूत। लाअउलं गदुअ णिवेदेल्ह (५)।

माथु। एस धुत्तो, अदो णिक्कमिअ, अण्णत्त गमिस्सदि। ता उवरोधेणेव गेण्हेल्ह (६)।

---

(१) भट्टा, यावदेव वयं दर्दुरेण कलहायिताः, तावदेव स पुरुषोऽपक्रान्तः।

(२) तस्य द्यूतकरमुष्टिप्रहारेण नासिका भग्ना, एहि रुधिरपथमनुसरामः।

(३) भट्टा, वसन्तसेनागेहं प्रविष्टः सः।

(४) भूतानि सुवर्णानि।

(५) राजकुलं गत्वा निवेदयावः।

(६) एष धूर्त्तः अतोनिष्क्रम्य अन्यत्र गमिष्यति। तस्मादुपरोधेनैव गृह्णीमः।

Digitized by Google

वसन्तसेना ॥ मदनिकायाः संज्ञान्ददाति ॥

मद। कुदो अज्जो, को वा अज्जो, कस्स वा अज्जो, किं वा वित्तिं अज्जो उवजीअदि, कुदो वा भअं (१)।

संवा। सुणादु अज्जआ, अज्जए; पाडलिउत्ते मे जम्म भूमी, गहवद दारके हगे, संवाहअस्स वित्तिं उवजी आमि (२)।

वसं। सुउमारा खु कला सिक्खिदा अज्जेण (३)।

संवा। अज्जए, कलेत्ति सिक्खिदा, आजीविआ दाणिं सम्वुत्ता (४)।

चेटी। अदिणिव्विणं अज्जेण पडिवअणं दिण्णं; तदो, तदो (५)।

---

(१) कुतआर्य्य, कोवा आर्य्यः, कस्य वा आर्य्यः, किंवा वृत्तिं आर्य्यउपजीवति, कुतोवा भयं।

(२) शृणोतु आर्य्या; आर्य्ये, पाटलिपुत्रे मे जन्मभूमिः, गृहपतिदारकोऽहं, संवाहकस्य वृत्तिं अङ्गमर्द्दनरूपां उपजीवामि।

(३) सुकुमारा खलु कला शिक्षिता आर्य्येण।

(४) आर्य्ये, कलेति शिक्षिता, आजीविका इदानीं सम्वृत्ता।

(५) अतिनिर्व्विणं आर्य्येण प्रतिवचनं दत्तं, ततस्ततः।

Digitized by Google

संवा। तदो, अज्जए, एसे णिअगेहे आहिण्डकाणं मुहादो सुणिअ, अपुव्वदेसदंसणकुदूहलेण दह आगदे, दुधवि मए पविसिअ उज्जइणिं एक्के अज्जे सुस्सूसिदे, जेताणि से पिअदंसणे, पिअवादी, दइअं ण कित्तेदि, अवकिदं विसुमरेदि। किं बहुणा, उत्तेण दक्खिणदाए फलकेलअं विअ, अत्ताणअं अवगच्छदि, सरणागअवच्छलेण (१)।

चेटी। को दाणिं अज्जाए मणोरहन्तरस्स गुणादं चोरिअ उज्जइणिं अलङ्करेदि (२)।

वसं। साधु, हञ्जे, साधु; मए वि एवं जेव्व हिअएण मन्तिदं (३)।

---

(१) ततआर्य्ये, एष निजगृहे आहिण्डकानां मुखात् श्रुत्वा अपूर्व्वदेशदर्शनकुतूहलेन, दृहागतः; दृहापि मया प्रविश्य उज्जयिनीं, एकआर्य्यः शुश्रूषितः, यस्तस्याः प्रिय दर्शनः, प्रियवादी, दयितं न कीर्त्तयति, अपकृतं विस्मरति। किमबहुनोक्तेन, दक्षिणतया फलकृतेरिव आत्मानं अव गच्छति शरणागतवत्सलश्च।

(२) कदृदानीं आर्य्यायामनोरथान्तरस्य गुणान् चोर यित्वा, उज्जयिनीं अलङ्करोति।

(३) साधु, चेटि, साधु; मयापि एवमेव हृदयेन मन्त्रितं।

Digitized by Google

चेटी। अज्ज, तदो, तदो (१)।

संवा। अज्जए, मे दाणिं अणुक्कोअकिदेहिं पदाणेहिं (२)।

वसं। किं उवरदविहवो संवुत्तो (३)।

संवा। अणाचक्खिदे जेव्व कधं अज्जआए विण्णादं (४)।

वसं। किं एत्थ जाणीअदि; दुल्लहा गुणा विहवा अ; अपेएसु तडाएसु वड्ढदरं उदअं होदि (५)।

चेटी। अज्ज किं णामधेओ क्खु सो (६)।

संवा। अज्जे, को दाणिं तस्स भूदलमिअंकस्स णामं ण आणादि; सो क्खु सेट्ठिचत्तले पडिवसदि, सलाहणिज्जणामधेओ अज्जचारुदत्तो णाम (७)।

---

(१) आर्ये, ततस्ततः।

(२) आर्ये, य इदानीं अनुत्कोचकृतैः प्रदानैः।

(३) किं उपरतविभवः संवृत्तः।

(४) अनाख्यातमेव कथं आर्यया विज्ञातं।

(५) किमत्र ज्ञातव्यं, दुर्लभा गुणाविभवाश्च; अपेयेषु तडागेषु वद्धतरमुदकं भवति।

(६) आर्ये, किंनामधेयः खलु सः।

(७) आर्ये, कइदानीं तस्य भूतलमृगाङ्कस्य नाम न जानाति, य खलु श्रेष्ठिचत्वरे प्रतिवसति, श्लाघनीयनामधेय आर्यचारुदत्तोनाम।

Digitized by Google

वसं ॥ सहर्षमासनादवतीर्य्य ॥ अज्जस्स अत्तणो कैरकं एदं गेहं; हञ्जे, देहि से आसणं। तालवेण्टअं गेण्ह परिस्समो अज्जस्स बाधेदि (१)।

चेटी ॥ तथा करोति ॥

संवा ॥ स्वगतम् ॥ कधं, अज्जचारुदत्तस्स णामसङ्कित्तणेण ईदिसे मे आदरे। साधु, अज्जचारुदत्त, साधु, पुहवीए तुमं एक्के जीवलोए, सेसे उण जणे मणुसदि ॥ इति पादयोर्निपत्य॥ भोदु, अज्जए, भोदु। आसणे णिसीददु अज्जआ (२)।

वसं ॥ आसने समुपविश्य॥ अज्ज, कुदो सो धणिओ (३)।

संवा। सक्कारधणे खु सज्जणे, कस्स ण होदु, चला चले धणे। जे पूदुं वि आणादि, से पूआविसेसं वि आणादि (४)।

---

(१) आर्य्यस्य आत्मकृतं एतद्गेहं। हे चेटि, देहि अस्य आसनं, तालवृन्तकं गृहाण, परिश्रमआर्य्यस्य बाधते।

(२) कथं आर्य्यचारुदत्तस्य नामसंकीर्त्तनेन ईदृशो मे आदरः। साधु, आर्य्यचारुदत्त, साधु; पृथिव्यां त्वमेकोजीवसि शेषः पुनर्जनः स्वपिति। भवतु, आर्य्ये, भवतु, आसने निषीदतु आर्य्या।

(३) आर्य्य कुतः स धनिकः।

(४) सत्कारधनः खलु सज्जनः कस्य न भवति चला चलं धनं। यः पूजितुं अपि जानाति, स पूजाविशेषमपि जानाति।

Digitized by Google

वसं। तदो (१)।

संवा। तदो, तेण अज्जेण सवित्ती पलिचालके कदम्हि; चालित्तावग्गेहे च तस्मिं जूदोपजीविम्हि संवुत्ते। तदो; भाअधेअविसमदाए दशसुवण्णअं जूदे हालिदं (२)।

माथु। उक्खादिदोम्हि, मुसिदोम्हि (३)।

संवा। एदे द ग्रहिअजूदिअला मं अणुसम्बअन्ति, सम्मदं सुणिअ अज्जआ पमाणं (४)।

वसं। मदणिए, वासपादवविसण्ठुलदाए पच्चिणो दूदो तदो वि आहिण्डन्ति। हञ्जे, ता गच्छ, एदाणं सहिअजूदिआराणं अअं अज्जो जेव्व पडिवादेदि त्ति, इमं हत्थाभरणअं तुमं देहि (५)॥ इति हस्ताभरणकमादाय चेटी प्रयाति॥

---

(१) ततः।

(२) ततस्तेन आर्य्येण सवृत्तिः परिचारकः कृतोऽस्मि; चारित्र्यावग्रहे च तस्मिन् द्यूतोपजीवी संवृत्तः। ततोभागधेय विषमतया दशसुवर्णं द्यूते हारितं।

(३) उत्खातितोऽस्मि; मुषितोऽस्मि।

(४) एतौ तौ सभिकद्यूतकरौ, मां अनुसन्धत्तः; सान्प्रतं श्रुत्वा आर्य्या प्रमाणं।

(५) मदनिके, वासपादपविसंष्ठुलतया पच्चिणद्यूतस्तोऽपि आहिण्डन्ति। हे चेटि, तद्गच्छ, एतयोः सभिकद्यूतकरयोः अयमार्य्यएव प्रतिपादयतीति इदं हस्ताभरणं, त्वं देहि।

Digitized by Google

चेटी ॥ गृहीत्वा ॥ जं अज्जआ आणवेदि (१) ॥ इति निष्क्रान्ता ॥

माथु। उल्लादिदोम्हि, मुदिदोम्हि (२)।

चेटी। जधा एदे उड्डं पेक्खन्ति, दीहं णीससन्ति अ, विलवन्ति अ, अहिलषन्ति अ, दुआरअणिहिदलोअणा, तधा तक्केमि, एदे दे सहिआजूदिअला उविस्सन्ति ॥ उपगम्य॥ अज्ज, वन्दामि (३)।

माथु। सुहं तुह होदु (४)।

चेटी। अज्ज, कदमो तुह्माणं सहिओ (५)।

माथु। कस्स तुइं तणुमज्झे, अहरेण रददट्ठदुम्मिएीदेण।
जम्पसि मणोहरवअणं, आलोअन्ती कडक्खेण।
णत्थि मम विहवो, अण्णत्त वज्ज (६)।

---

(१) यत् आर्य्या आज्ञापयति।

(२) उल्लादितोऽस्मि, मुदितोऽस्मि।

(३) यथा एतौ ऊर्द्धं प्रेक्षेते, दीर्घं निश्वसतश्च, विलपतश्च, अभिलषतश्च द्वारनिहितलोचनौ, तथा तर्कयामि, एतौ तौ सभिकाधूतकरौ भविष्यतः। आर्य्य वन्दे।

(४) सुखं तव भवेत्।

(५) आर्य्य, कतमो युष्माकं सभिकः।

(६) कस्य त्वं, तनुमध्ये, अधरेण रतदष्टदुर्म्मिलीतेन।
जल्पसि मनोहरवचनं, आलोकयन्ती कटाक्षेण।
नास्ति मम विभवः, अन्यत्र व्रज।

Digitized by Google

चेटी। अज्ज ईदिसादं णं मन्तेसि ता ण होसि जदि अरो। अत्थि कोवि तुह्माणं धारओ (१)।

माथु। अत्थि दम्मसुवण्णं धारेदि; किं तस्स (२)।

चेटी। तस्स कारणादो अज्जआ इमं हत्थाभरणं पडिवादेहि; णहि, णहि, सो स्सेव पडिवादेदि (३)।

माथु ॥ सहर्षं गृहीत्वा ॥ अले, भणेज्जि तं कुसवुत्तं; भूदं तुह गच्छु, आअच्छ, पुणो जूदं रमह (४) ॥ इति निष्क्रान्तौ ॥

चेटी ॥ वसन्तसेनामुपसृत्य ॥ अज्जए, परितुट्ठा गदा सहिआ जूदिअरा (५)।

वसं। ता गच्छदु अज्जो, बन्धुअणं समस्सासिदुं (६)।

---

(१) यदि ईदृशानि मनु मन्त्रयसि तदा न भवसि द्यूतकरः। अस्ति कोऽपि युष्माकं धारकः।

(२) अस्ति, दम्मसुवर्णं धारयति, किं तस्य।

(३) तस्य कारणात् आर्य्या इदं हस्ताभरणं प्रतिपादयति; नहि, नहि, स एव प्रतिपादयति।

(४) अरे, भणसि तं कुसपुत्रं; भूतः तव गच्छः, आगच्छ, पुनः द्यूतं रमस्व।

(५) आर्य्ये, परितुष्टागताः सभिकद्यूतकराः।

(६) तद्गच्छतु आर्य्यो बन्धुजनं समाश्वासयितुं।

Digitized by Google

संवा। अज्जए, जइ एवं ता इमं कला परिअणहत्थ गदा कलीअदु (१)।

वसं। अज्ज, जस्सु कारणादो इमं कला सिक्खीअदि, सोजेव्व अज्जेण सुस्सूसिदपुरुव्वो सुस्सूसिदव्वो (२)।

संवा ॥ स्वगतम् ॥ अज्जआए णिउणं पच्चादिट्ठोम्हि। कधं पच्चुवकलिस्सं ॥ प्रकाशम् ॥ अज्जए, अहं एदिणा जूदिअ लावमाणेण अक्कअवणके ऊविस्सं। ता संवाहके, जूदिअले, अक्कअवणके संवुत्तेत्ति, मुमलिदव्वा अज्जआए एदे अक्खलु (३)।

वसं। अज्ज, अलं साहसेण (४)।

---

(१) आर्य्य, यदि एवं तत् इयं कला परिजनहस्तगता क्रियतां।

(२) आर्य्य, यस्य कारणात् इयं कला शिक्ष्यते, सएव आर्य्येण शुश्रूषितपूर्व्वः शुश्रूषितव्यः।

(३) आर्य्यया निपुणं प्रत्यादिष्टोऽस्मि। कथं प्रत्युपकरिष्ये। आर्य्ये, अहं एतेन द्यूतकरावमानेन शाक्यश्रमणको भविष्यामि। तत् सम्बाहको, द्यूतकरः, शाक्यश्रमणकः संवृत्तः, इति स्मर्त्तव्यानि आर्य्यया एतानि अक्षराणि।

(४) आर्य्य, अलं साहसेन।

Digitized by Google

संवा। अज्जए कले णिच्चए ॥ इति परिक्रम्य ॥ जूदेण तं कदं मे जं वीहत्थं जणस्स सव्वस्स। एहिं पाअडशीसे णलिन्द मग्गेण विहलिश्शं (१) ॥ नेपथ्ये, कलकलः ॥

संवा ॥ आकर्ण्य ॥ अले, किं णेदं ॥ आकाशे ॥ किं भणाध? एशे क्खु वशन्तशेणा केलके खुष्टमोडके णाम दुट्ठहत्थी विहलेदित्ति। अहो अज्जआए गन्धगशं पेक्खिस्शं गदुअ; अह वा, किं मम एदिणा जधा ववशिदं अणुचिट्ठिश्शं (२) ॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति अपटाक्षेपेण प्रहृष्टोविकटोज्वलवेशः कर्णपूरकः ॥

कर्ण। कहिं कहिं अज्जआ (३)।

---

(१) आर्य्ये, कृतो निश्चयः। द्यूतेन तत्कृतं मम यत् विह्वलं जनस्य सर्व्वस्य। इदानीं प्रकटशीर्षोनरेन्द्रमार्गेण विहरिष्यामि।

(२) अरे, किं नेदं। किं भणत? एष खलु वसन्तसेनाक्रीडा पात्रं स्तम्भभञ्जकोनाम दुष्टहस्ती विह्वलतीति। अहो, आर्य्या यागन्धगजं प्रेक्षिष्ये, गत्वा; अथवा, किं मम एतेन यथा व्यवसितं अनुष्ठास्यामि।

(३) कुत्र कुत्र आर्य्या।

Digitized by Google

चेटी। दुम्मणुस्स, किं ते उव्वेअकारणं, जं अअदोव ट्ठिदं अज्जअं न पेक्खसि (१)।

कर्ण ॥ दृष्ट्वा ॥ अज्जाए, वन्दामि (२)।

वसं। कणअरअ; परितुट्ठमुहो लक्खीअसि, ता किं णेदं (३)।

कर्ण ॥ सविस्मयं ॥ अज्जाए, वञ्चिदासि जाए अज्ज कण अरअस्स परक्कमो ण दिट्ठो (४)।

वसं। कणअरअ, किं (५)।

कर्ण। सुणादु अज्जआ; जो सो अज्जआए खुद्दमोडओ णाम दुट्ठहत्थी, सो आलाणखंभं भञ्जिअ, मइमत्तो वाघा दिअ, महन्तं सङ्खोहं करेन्तो, रायमग्गं ओदिण्णो। तदो एत्थंतरे उग्घुट्ठं जणेण;

अवणेध बालअजणं, तुरिदं आरुहदु रुक्खपासादं;
किं ण उ पेक्खध; पुरदो दुट्ठो हत्थी इदो एदि।

---

(१) दुर्मनुष्य; किन्ते उद्वेगकारणं, यत् अयतोऽवस्थितां आर्य्यां न प्रेक्षसे।

(२) आर्य्ये वन्दे।

(३) कर्णपूरक, परितुष्टमुखोलक्ष्यसे, तत् किं नेदं।

(४) आर्य्ये, वञ्चितासि, यथा अद्य कर्णपूरकस्य पराक्रमो न दृष्टः।

(५) कर्णपूरक किं।

Digitized by Google

अविअ।

विअलइ णेउरजुअलं, छुज्जन्ति अ मेहला मणिक्खइआ।
वलआ अ सुन्दरअरा, रअणंकुरजालपडिबद्धा।

तदो तेण दुट्ठहत्थिणा कलअलणरद्दणेहिं, पुण्णणलिणिं व णअरिं उज्झइणिं अवग्गहमाणेण, समासादिदो परिव्वाअओ। तअ परिब्भट्ठदण्डकुण्डिआभाअणं सीअरेहिं सिञ्चिअ, दन्तंतरे खित्तं पेक्खिअ, पुणोवि उग्घुट्ठं जणेण, हा, परिव्वाअओ वावादीअदित्ति (१)।

---

(१) शृणोतु आर्य्या; यः स आर्य्यायाः स्तम्भभञ्जको नाम दुष्टहस्ती, स आलानस्तम्भं भंक्त्वा, महामात्रं व्यापाद्य, महान्तं संक्षोभं कुर्व्वन्, राजमार्गमवतीर्णः; ततः अचान्तरे उद्घुष्टं जनेन;

अपनयत बालकजनं, त्वरितं आरोहत तुङ्गप्रासादं;
किं न खलु प्रेक्षध्वं; पुरतो दुष्टोहस्तीदृतएति।

अपिच।

विचरति नूपुरयुगलं, क्षिप्यन्ते च मेखलामणिखचिताः,
वलया च सुन्दरतरा, रत्नाङ्कुरजालप्रतिबद्धा।

ततस्तेन दुष्टहस्तिना करचरणरदनैः, फुल्लनलिनीमिव नगरीमुज्झयिनीमवगाहमानेन, समासादितः परिव्राजकः। तस्य परिभ्रष्टदण्डकुण्डिकाभाजनं शीकरैः सिक्त्वा, दन्तान्तरे क्षिप्तं प्रेक्ष्य, पुनरप्युद्घुष्टं जनेन, हा परिव्राजको व्यापाद्यतेऽति।

Digitized by Google

वसं ॥ सभ्रमं ॥ अहो पमादो; अहो पमादो (१)।

कर्ण। अलं सम्भमेण; सुणादु दाव अज्जआ। तदो विच्छिन्नविसट्ठुलमिञ्जुलाकलावअं उव्वहन्तं दन्तन्तरपरिग्गहिदं परिव्वाजअं उव्वहन्तं तं पेक्खिअ, कण्णजरएण मए, णहि, णहि, अज्जआए अण्णपिण्डोवपुट्ठेण दासेण, वामचलणेण जूदलेखअं उग्घुसिअ, उग्घुसिअ, तुरिदं आवणादो लोहदण्डं गेण्हिअ, आआरिदो सो दुट्ठहत्थी (२)।

वसं। तदो तदो (३)।

कर्ण। आहणिऊण सरोसं तं हत्थिं, विंझसेलसिहराभं, मोआविओ मए सो दन्तन्तरसंठिओ परिव्वाजओ (४)।

---

(१) अहो प्रमादः, अहो प्रमादः।

(२) अलं संभ्रमेण; शृणोतु तावत् आर्य्या। ततोविच्छिन्न विसंष्ठुलशृङ्खलाकलापं उद्वहन्तं दन्तान्तरपरिगृहीतं परिव्राजकं उद्वहन्तं तं प्रेक्ष्य, कर्णपूरकेण मया, नहि, नहि, आर्य्या यान्नपिण्डोपपुष्टेन दासेन, वामचरणेन द्यूतलेखकं उद्गृह्य, उद्गृह्य, त्वरितं आपणात् लौहदण्डं गृहीत्वा, आकारितः स दुष्टहस्ती।

(३) ततस्ततः।

(४) आहत्य सरोषं तं हस्तिनं, विन्ध्यशैलशिखराभं, मोचितोमया स दन्तान्तरसंस्थितः परिव्राजकः।

Digitized by Google

वसं। सुट्ठु दे किदं (१)।

कर्ण। तदो अज्जए; साऊ, रे कण्णऊरअ, साऊ त्ति, एत्तिआमत्तं भणन्तो, विसमभरक्कन्ता विअ णावा एक्कदो पक्कत्था सअला उज्जइणी आसि। तदो, अज्जए, एक्केण सुण्णाइं आहरणट्ठानाइं परामसिअ उड्ढं पेक्खिअ, दीहं णीससिअ, अअं पावारओ ममोवरि खित्तो (२)।

वसं। कण्णऊरअ, जाणीहि दाव, किं एसो जादीकुसुम वासिदो पावारओ, ण वेत्ति (३)।

कर्ण। अज्जए, मदगन्धेण सुट्ठ तं गन्धं ण जाणामि (४)।

---

(१) सुष्ठु त्वया कृतं।

(२) तत आर्य्ये; साधु, रे कर्णपूरक, साधु, इत्येतावन्मात्रं भणन्ती विषमभराक्रान्ता इव नौः एकतः पर्य्यस्ता सकला उज्जयिनी आसीत्। तत, आर्य्ये, एकेन शून्यानि आभरण स्थानानि परामृश्य ऊर्द्धं प्रेक्ष्य, दीर्घं निःश्वस्य, अयं प्रावारको ममोपरि क्षिप्तः।

(३) कर्णपूरक, जानीहि तावत्, किं एष जातीकुसुम वासितः प्रावारकोनवा इति।

(४) आर्य्ये, मदगन्धेन सुष्ठु तं गन्धं न जानामि।

Digitized by Google

वसं। णामं पि दाव पेक्ख (१)।

कर्ण। दूमं णामं अज्जआ एव्व वाएदु (२) ॥ इति प्रावारकमुपनयति। वसन्तसेना, आर्य्य चारुदत्तस्येति वाचयित्वा, सस्पृहं गृहीत्वा प्रावृणोति।

चेटी। कणअरअ, सोहदं अज्जआए पावारओ (३)।

कर्ण। आं, सोहदं अज्जआए पावारओ (४)।

वसं। कणअरअ, इदं दे पारितोसिअं (५) ॥ इत्याभरणं प्रयच्छति ॥

कर्ण ॥ शिरसा गृहीत्वा प्रणम्य च ॥ अय्यं सुट्ठु सोहदं अज्जआए पावारओ (६)।

वसं। कणअरअ, एदाए वेलाए कहिं अज्ज चारुदत्तो (७)।

---

(१) नामापि तावत् प्रेक्षस्व।

(२) इदं नाम आर्य्या एव वाचयतु।

(३) कर्णपूरक, शोभते आर्य्यायाः प्रावारकः।

(४) आं शोभते आर्य्यायाः प्रावारकः।

(५) कर्णपूरक, इदन्ते पारितोषिकं।

(६) साम्प्रतं सुष्ठु शोभते आर्य्यायाः प्रावारकः।

(७) कर्णपूरक, एतस्यां वेलायां कुचार्य्य चारुदत्तः।

Digitized by Google

कर्ण। एदेण जेव्व मग्गेण पवुत्तो गेहं (१)।

वसं। हञ्जे, उवरिदणं अलिन्दअं आरुहिअ, अज्जचारुदत्तं पेक्खेह्म (२)।

॥ इति निष्क्रान्ताः सर्व्वे ॥

इति द्यूतकरसम्वाहकोनाम द्वितीयोऽङ्कः।

---

(१) एतेनैव मार्गेण प्रवृत्तोगेहं।

(२) हे चेटि, उपरितनं अलिन्दकं आरुह्य, आर्य्य चारुदत्तं पश्यामः।

Digitized by Google

॥ अथ तृतीयोऽङ्कः ॥

ततः प्रविशति चेटः।

चेटः। सुअणेऊ भिचानुकम्पके सामिए निद्धूणकेवि सोहदि;
पिसुणे उण दव्वगव्विदे दुक्कले खु परिणामदारुणे।
सुअणे ऊ कुभिचपालए, धणहीणे अपहुवि सोहदि;
पिसुणे उण दव्वगव्विदे, ण अ लक्खीविहवावलंबिदे।

अपिच।

अप्पपलक्कवलद्दे ण अक्खि वालिदुं;
अलकलत्तपअत्ते ण अक्खि वालिदुं;
जूदपअत्त मणुस्से ण अक्खि वालिदुं;
जेवि सहाविअदोसे ण अक्खि वालिदुं।

कावि वेला अज्जचारुदत्तस्स गन्धव्वं सुणिदुं गदस्स अदिक्कमदि अद्धुलअणी, अज्जवि णागच्छदि। ता जाव, वाहिरदुआरसालाए गदुअ सुविस्सं (१)।

---

(१) सुजनः खलु भृत्यानुकम्पकः स्वामी निर्द्धनकोऽपि शोभते;
पिशुनः पुनर्द्रव्यगर्व्वितो दुष्करः खलु परिणामदारुणः।
सुजनः खलु कुभृत्यपालको धनहीनोऽप्रभुरपि शोभते,
पिशुनः पुनर्द्रव्यगर्व्वितोन च लक्ष्मीविभवावलम्बितः।

Digitized by Google

॥ तथा करोति । ततः प्रविशति चारुदत्तोविदूषकश्च ॥

चारु। अहो साधु, साधु, रेभिलेन गीतं। वीणा हि नाम अवमुद्गेत्थितं रत्नं। कुतः;

उत्कण्ठितस्य हृदयानुगुणा वयस्या,
सङ्केतके चिरयति प्रवरोविनोदः;
संस्थापना प्रियतमा विरहातुरार्ता,
रक्तस्य रागपरिवृद्धिकरः प्रमोदः।

विदू। भो, एहि गेहं गच्छेम (१)।

अपिच।

अस्खलत्पटवासीवर्द्धो न शक्योवारयितुं;
अन्यकलत्रप्रसक्तोन शक्योवारयितुं;
द्यूतप्रसक्तोमनुष्योन शक्योवारयितुं;
योपि स्वाभाविकदोषो न शक्योवारयितुं।

कापि वेला आर्य्य चारुदत्तस्य गान्धर्व्वं श्रोतुं गतस्य अति क्रामति अर्द्धरजनी, अद्यापि नागच्छति। तत् यावत्, बहिर्द्वारशालायां गत्वा स्थास्यामि।

(१) भो एहि, गृहं गच्छावः।

Digitized by Google

चारु। अहो सुष्ठु भावरेभिलेन गीतं।

विदू। मम दाव दुवेहिं जेव्व हस्सं जाअदि। इत्थिआए सक्कदं पठन्तीए, मणुस्सेण अ काअलीं गाअन्तेण। इत्थिआ दाव सक्कदं पठन्ती, दिण्णवणस्सावित्र गिट्ठी अधिअं सुट्ठु आअदि; मणुस्सोवि काअली गाअन्तो, सुक्कसुमणोदामवेट्ठिदो बुड्ढपुरोहिदो विअ मन्तं जवन्तो, दिढं मे ण रोअदि (१)।

चारु। वयस्य सुष्ठु खल्वद्य गीतं भावरेभिलेन; नच भवान् परितुष्टः?

रक्तञ्च, नाम, मधुरञ्च, घनं, स्फुटञ्च,
भावान्वितञ्च, ललितञ्च, मनोहरञ्च,
किम्वा प्रशस्तवचनैर्बहुभिर्मदुक्तौ
रन्ध्रर्हिता यदि भवेदनितेति मन्ये।

---

(१) मम तावत् द्वाभ्यामेव हास्यं जायते। स्त्रिया संस्कृतं पठन्त्या, मनुष्येण च काकलीं गायता। स्त्री तावत् संस्कृतं पठन्ती दत्तनवनासिकारन्ध्ररज्जुरिव गृष्टिः अधिकं सुसूत्रब्दं करोति; मनुष्योऽपि काकलीं गायन्, शुष्कसुमनोदामवेष्टितोवृद्धपुरोहितइव मन्त्रं जपन्, दृढं मे न रोचते।

Digitized by Google

अपिच।

तं तस्य खरसंक्रमं मृदुगिरः, श्लिष्टश्च तन्त्रीस्वनः,
वर्णानामपि मूर्छनान्तरगतं, तारं विरामे मृदुः;
हेलासंयमितं पुनश्च, स्खलितं रागद्विरुच्चारितं,
यत्सत्यं विरतेऽपि गीतसमये, गच्छामि गृह्णन्निव।

विदू। भो वअस्स, आवणन्तररच्छाविहाएसु सुहं कुक्कुरा वि सुत्ता, ता गेहं गच्छेह्म ॥ अयतोऽवलोक्य॥ वअस्स, पेक्ख, पेक्ख, एसोवि अन्धआरस्स विअ अवआसं देन्तो, अन्तरिक्ख पासादादो ओदरदि भअवं चन्दो (१)।

चारु। सम्यगाह भवान्।

असौ हि दत्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः;
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टं।

विदू। भो, एदं अम्हाणं गेहं; वड्ढमाणआ, उड्ढेहि दुआरअं (२)।

---

(१) भो वयस्य, आपणान्तररथ्याविभागेषु सुखं कुक्कुरा अपि सुप्ताः, तत् गृहं गच्छावः। वयस्य, पश्य, पश्य, एषोऽपि अन्धकारस्येवावकाशं ददत् अन्तरीक्षप्रासादात् अवतरति भगवान् चन्द्रः।

(२) भो इदं अस्माकं गेहं, वर्द्धमानक, उद्घाटय द्वारं।

Digitized by Google

चेटः। अज्ज मित्तेअ अलअञ्चोए पुणीअदि; आगदे अज्जचारुदत्ते। ता जाव दुआरअं दे देमि ॥ तथा कृत्वा ॥ अज्ज वन्दामि; मित्तेअ तुमंपि वन्दामि। एत्थ वित्थिण्णे आसणे णिसीदन्तु अज्जा (१)।

॥ उभौ वास्येन प्रविश्य उपविशतः ॥

विदू। वड्ढमाणआ, रअणिअं सद्दावेहि पादाइं धोदुं (२)।

चारु ॥ सानुक्रमं ॥ अलं सुप्तजनं प्रबोधयितुं।

चेटः। अज्ज मित्तेअ; अहं पाणिअं मेच्छे, तुमं पादाइं धोवेहि (३)।

विदू। भो वअस्स, एसो दाणिं दासीए पुत्तो भविअ पाणिअं गेण्हेदि, मं उण बंभणं पादाइं सोधावेदि (४)।

चारु। वयस्य मैत्रेय, त्वमुदकं गृहाण, वर्द्धमानकः पादौ प्रक्षालयतु।

---

(१) आर्य्य मैत्रेय स्वरसंयोगः श्रूयते; आगतआर्य्य चारुदत्तः। तत् यावत् द्वारं अस्य ददामि। आर्य्य वन्दे; मैत्रेय त्वामपि वन्दे; अत्र विस्तीर्णे आसने निषीदतं आर्य्यौ।

(२) वर्द्धमानक, रदनिकां आकारय पादौ धावितुं।

(३) आर्य्य मैत्रेय, अहं पानीयं गृह्णामि, त्वं पादौ धाव।

(४) भो वयस्य, एष इदानीं दासीपुत्रीभूत्वा, पानीयं गृह्णाति, मां पुनर्ब्राह्मणं पादौ धावयति।

Digitized by Google

चेटः। अज्ज मित्तेअ, देहि उदअं (१)।

विदू ॥ तथा करोति चेटः; चारुदत्तस्य पादौ प्रक्षाल्य पसरति ॥

चारु। दीयतां ब्राह्मणस्य पादोदकं।

विदू। किं मम पादोदएहिं, भूमीए जेव्व मए गद्दहेण विअ पुणोवि लोट्टिदव्वं (२)।

चेटः। अज्ज मित्तेअ, बंभणे खु तुमं (३)?

विदू। जधा सव्वणागाणं मज्झे डुंडुहो, तधा सव्वबंभणाणं मज्झे अहं बंभणो (४)।

चेटः। अज्ज मित्तेअ, तधावि धोदस्सं ॥ तथा कृत्वा ॥ अज्ज मित्तेअ, इदं तं सुवण्णभण्डअं, मम दिवा, तुह रत्तिं च; ता गेह (५) ॥ इति दत्वा निष्क्रान्तः ॥

---

(१) आर्य्य मैत्रेय, देहि उदकं।

(२) किं मम पादोदकैः, भूम्यां एव मया गर्द्दभेन इव पुनरपि लोटितव्यं।

(३) आर्य्य मैत्रेय, ब्राह्मणः खलु त्वं?

(४) यथा सर्व्वनागानां मध्ये डुण्डुभः, तथा सर्व्वब्राह्मणानां मध्ये अहं ब्राह्मणः।

(५) आर्य्य मैत्रेय, तथापि धाविष्यामि। आर्य्य मैत्रेय, एतत् तत् सुवर्णभाण्डं मम दिवा, तव रात्रौ च; तद्गृहाण।

Digitized by Google

विदू ॥ गृहीत्वा ॥ अज्जवि एदं चिट्ठदि। किं; एत्थ उज्जइणीए चोरोवि णत्थि, जो एदं दासीए पुत्तो णिद्दा चोरं णावहरदि। भो वअस्स, अब्भन्तरचतुःसालअं पवेस आमि णं (१)।

चारु।

अलं चतुःशालमिमं प्रवेश्य; प्रकाशनारीधृत एष यस्मात्।
तस्मात्त्वयं धारय, विप्र, तावद्यावन्न तस्याः खलु भोः समर्प्यते।

॥ निद्रां नाटयन् ॥ तं तस्य स्वरसंयममिति पुनः पठति ॥

विदू। अवि णिद्दाअदि भवं (२)।

चारु। अथ किं।

दृशं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव मां;
अदृश्यरूपा चपला जरेव, मनुष्यसत्त्वं परिभूय वर्द्धते।

विदू। ता सुवेह्म (३) ॥ नाट्येन स्वपितः ॥ ततः प्रविशति शर्विलकः।

---

(१) अद्यापि एतत् तिष्ठति। किमत्र उज्जयिन्यां चौरोऽपि नास्ति। यदेष तद्दास्याः पुत्रो निद्राचौर्यं नापहरति। भो वयस्य अभ्यन्तरचतुःशालकं प्रवेशयामि एनं।

(२) अपि निद्राति भवान्।

(३) तत् स्वपिवः।

Digitized by Google

सर्विलकः।

कृत्वा शरीरपरिणाहसुखप्रवेशं,
शिक्षाबलेन च, बलेन च, कर्म्ममार्गं,
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो,
निर्मुच्यमानइव जीर्णतनुर्भुजङ्गः।

॥ नभोऽवलोक्य सहर्षं॥ अये कथमस्तमुपगच्छति स भगवान्मृगाङ्कः। तथाहि।

नृपतिपुरुषशङ्कितप्रचारं परगृहदूषणनिश्चितैकवीरं,
घनतिमिरनिरुद्धसर्व्वभावा रजनिरियं जननीव संवृणोति।

वृत्तवाटिकापरिसरे सन्धिं कृत्वा प्रविष्टोऽस्मि; मध्यमकक्ष्यां यावदिदानीमेतु:शालकमपि दूषयामि। भोः।

कामं नीचमिदं वदन्ति पुरुषाः, स्वप्ने च यद्दृश्यते,
विश्वस्तेषु च वञ्चनापरिभवस्तौर्य्यं न शौर्य्यं हि तत्,
स्वाधीना वचनीयतापि हि, वरं, बद्धोन सेवाञ्जलि
र्मार्गोऽयं नरेन्द्रसैन्यिकवधे पूर्व्वं कृतोद्रोणिना।

तत्कस्मिन्नुद्देशे सन्धिमुत्पादयामि।

देशः कोनु जलावसेकशिथिलोयस्मिन्न शब्दोभवे
द्भित्तीनाञ्च न दर्शनान्तरगतः सन्धिः करालोभवेत्;
चारचीरतया च खोष्टकलशश्छीर्णः क हर्म्ये भवेत्,
कस्मिन्स्त्रीजनदर्शनञ्च न भवेत्सादर्थसिद्धिश्च मे।

॥भित्तिं परामृश्य॥ नित्यादित्यदर्शनोदकसेचनेन दूषितेयं भूमिः, चारचीरा, मूषिकोत्करश्चेह; हन्त सिद्धोऽयमर्थः।

प्रथममेतत् स्कन्दपुत्राणां सिद्धिलक्षणं। अत्र कर्मप्रारम्भे को दृश्य मिदानीं सन्धिमुत्पादयामि। दृष्ट खलु भगवता कनक शक्तिना चतुर्विधः सन्ध्युपायोदर्शितः; तद्यथा; पक्वेष्टकाना माकर्षणं, आमेष्टकानाञ्छेदनं, पिण्डमयानां सेचनं, काष्ठम यानां पाटनमिति। तदत्र पक्वेष्टके दृष्टिकाकर्षणं। तत्र।

पद्मव्याकोशं, भास्करं, बालचन्द्रं,
वापीविस्तीर्णं, स्वस्तिकं, पूर्णकुम्भं,
तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पं,
दृष्ट्वा श्रेयं यद्धिसमयं यान्ति पौराः।

तदत्र पक्वेष्टके पूर्णकुम्भएव शोभते। तमुत्पादयामि।

अन्यासु भित्तिषु मया निशि पाटितासु,
चारुचितासु विषमासु च कल्पनासु,
दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो,
दोषांश्च मे वदति कर्मणि कौशलञ्च।

नमो वरदाय कुमारकार्त्तिकेयाय, नमः कनकशक्तये, ब्रह्मण्याय देवाय देवव्रताय, नमो भास्करनन्दिने, नमो योगाचार्य्याय, यस्याहमाद्यमः शिष्यः। तेन च परितुष्टेन योगरोचना मे दत्ता,

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः,
शस्त्रञ्च पतितं गात्रे रुजं नोत्पादयिष्यति।

॥ तथा करोति ॥ धिक्कष्टं प्रमाणसूत्रं मे विस्मृतं ॥ विचिन्त्य ॥ आं, दृढं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति, यज्ञोपवीतं हि नाम

ब्राह्मणस्य महदुपकरणद्रव्यं; विशेषतोऽस्मद्विधस्य। कुतः।

एतेन मापयति भित्तिषु कर्म मार्गं
मेतेन मोचयति भूषणसंप्रयोगान्,
उद्घाटको भवति यन्त्रदृढे कपाटे,
दष्टस्य कीटभुजगैः परिवेष्टनञ्च।

मापयित्वा कर्म समारेभे ॥ तथा कृत्वावलोक्य च॥ एक लोष्टावशेषोऽयं सन्धिः। धिङ्मूढ! अहिना दष्टोऽस्मि ॥ यज्ञो पवीतेनाङ्गुलीं बद्ध्वा विषवेगं नाटयति॥ चिकित्सां कृत्वा स्वस्थो ऽस्मि॥ पुनःकर्म कृत्वा दृष्ट्वा च॥ अये ज्वलति प्रदीपः। तथाहि; शिखा प्रदीपस्य सुवर्णपिञ्जरा महीतले सन्धिमुखेन निर्गता, विभाति पर्य्यन्ततमःसमावृता सुवर्णरेखेव कषे निवेशिता।

॥ पुनः कर्म कृत्वा॥ समाप्तोऽयं सन्धिः। भवतु; प्रविशामि। अथवा न तावत्प्रविशामि प्रतिपुरुषं निवेशयामि॥ तथा कृत्वा॥ अये न कश्चित्। नमः कार्त्तिकेयाय ॥ प्रविश्य दृष्ट्वा च॥ अये, पुरुषद्वयं सुप्तं। भवतु, आत्मरक्षार्थं द्वारमुद्घाटयामि। कथ ञ्चीर्णलाङ्गूलस्य विरौति कपाटः; तद्यावत्सलिलमन्वेषयामि। क्व नु खलु॥ सलिलं गृहीत्वा क्षिपन् सशब्दं॥ मा तावत्, भूमौ पतत् शब्दमुत्पादयेत्। भवत्वेवन्तावत् ॥ पृष्ठेन प्रतीच्छ कपा टमुद्घाट्य ॥ भवत्वेवन्तावदिदानीं परीक्षे, किं सत्यसुप्तमुत परमार्थसुप्तमिदं द्वयं ॥ चालयित्वा परीक्ष्य च ॥ अये, पर मार्थसुप्तेनानेन भवितव्यं। तथाहि;

निःश्वासोऽस्य न लक्ष्यते, सुविशदः स्वप्नान्तरं वर्त्तते,
दृष्टिर्गाढनिमीलिता, न विकला नाभ्यन्तरश्चञ्चला,
गात्रं स्वस्थशरीरसन्धिशिथिलं, शय्याप्रमाणाधिकं,
दीपश्चापि न मर्षयेदभिमुखं स्यात्सत्त्वसुप्तं यदि।

॥ समन्तादवलोक्य ॥ अये कथं मृदङ्गः। अयं दर्दुरः। अयं पणवः। दृयमपि वीणा। एते वंशाः। अमी पुस्तकाः। कथं नाव्याचार्यस्य गृहमिदं। अथवा, भवनप्रत्ययात्प्रविष्टोऽस्मि, तत्किं परमार्थदरिद्रोऽयं; उत राजभयाच्चौरभयाद्वा भूमिष्ठं द्रव्यमारयति। तन्ममापि नाम गर्विलकस्य भूमिष्ठं द्रव्यं प्रक्षिपामि ॥ तथा कृत्वा॥ निक्षिप्तं बीजं न कचित्स्फारी भवति। अये परमार्थदरिद्रोऽयं। भवतु, गच्छामि।

विदू ॥ उत्क्रम्याथते॥ भो वअस्स, सन्धी विअ दिज्जदि, चोरं विअ पेक्खामि, ता गेण्हदु भवं एदं सुवण्णभण्डअं(१)।

गर्वि। किन्नु खल्वयमिह मां प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीति उपहसति, तत्किं व्यापादयामि। उत लघुत्वादुत्क्रम्याथते ॥ दृष्ट्वा॥ अये, जर्जरस्नानशाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलङ्करणभाण्डं। भवतु गृह्णामि। अथवा, न युक्तमुत्थापयितुं कुलपुत्रजनं पीडयितुं; तद्गच्छामि।

---

(१) भो वयस्य, सन्धिरिव दृश्यते, चौरमिव पश्यामि, तत् गृह्णातु भवान् इदं सुवर्णभाण्डं।

Digitized by Google

विदू। भो वअस्स, सावित्तोसि गोब्बाह्मणकामाए, जइ एदं सुवण्णभण्डअं ण गेण्हसि (१)।

शर्वि। अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च॥ गृह्णाति॥ अथवा, ज्वलति प्रदीपः। अस्ति च मया प्रदीप निर्वापणार्थमाग्नेयः कीटोधार्य्यते; तन्मावत्प्रवेशयामि॥ तथा कृत्वा॥ अये निर्व्वापितः प्रदीपः। तस्यायन्देशकालएष मुक्तो मया कीटोयावत्रेवास्य दीपस्योपरि मण्डलं विचरति, एष पक्षवायानिलेन निर्वापितोभद्रपीठेन। धिक्कृतमन्धकारं, अथवा, मयापि अस्मद्ब्राह्मणकुले, धिक्कृतमन्धकारं। अहं हि चतुर्व्वेदविदोऽप्रतिग्राहकस्य पुत्रः, शर्विलकोनाम, ब्राह्मणो, गणिकामदनिकार्थमकार्य्यमनुतिष्ठामि। इदानीङ्करोमि ब्राह्मणस्य प्रणयमिति॥ जिघृक्षति॥

विदू। भो वअस्स, सीदलो दे अग्गहत्थो (२)।

शर्वि। धिक् प्रमादः! सलिलसंपर्काच्छीतलोमेऽग्रहस्तः। भवतु, कक्षयोर्हस्तं प्रक्षिपामि॥ सव्येन सव्यहस्तमुष्णीकृत्य गृह्णाति॥

विदू। गहिदं (३)।

---

(१) भो वयस्य, शर्पितोऽसि गोब्राह्मणकाम्यया, यदि एतत् सुवर्णभाण्डं न गृह्णासि।

(२) भो वयस्य, शीतलस्ते अग्रहस्तः।

(३) गृहीतं।

Digitized by Google

शर्वि। अनतिक्रमणीयोऽयं ब्राह्मणप्रणयः। तद्गृहीतं।

विदू। दाणीं विक्किणिदपण्णो विअ वाणिओ, अहं सुहं सुविस्सं(१)।

शर्वि। महाब्राह्मण, क्षपितहि वर्षशतं। कष्टमेवं मदनिका गणिकार्थे ब्राह्मणकुलं नमसि पातितं। अथवा, आत्मा पातितः।

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषं,
यदेतद्गर्हितं कर्म निन्द्यामिच, करोमि च।

तद्यावन्मदनिकायानिष्क्रयणार्थं वसन्तसेनागृहङ्गच्छामि ॥ परिक्रम्यावलोक्य च ॥ अये, पदशब्ददेव मा नाम रचिणः। भवतु, स्तम्भीभूत्वा तिष्ठामि। अथवा ममापि नाम शर्विलकस्य रचिणः। योऽहं।

मार्जारः क्रमणे, मृगः प्रसरणे, श्येनोगृहालुञ्चने,
सुप्तासुप्तमनुष्यवीर्य्यतुलने श्वा, सर्पणे पन्नगः।
मायारूपशरीरवेशरचने, वाग्देशभाषान्तरे,
दीपोरात्रिषु, सङ्कटेषु कुशलो, वाजी खले, नैर्जले।

अपिच।

भुजगदेव गतौ, गिरिः स्थिरत्वे, पतगपतेःपरिसर्पणे च तुल्यः।
शशदेव भुवनावलोकनेऽहं, वृकदेव च ग्रहणे, बले च सिंहः।

---

(१) इदानीं विक्रीतपण्यदेव वणिक् अहं सुखं स्वप्स्यामि।

Digitized by Google

॥ प्रविश्य रदनिका ॥ हद्धी, हद्धी; बाहिरदुआरशालाए पसुत्तोवड्ढमाणओ, सोवि एत्थ ण दीसइ। भोदु; अज्जमिस्सेअं सद्दावेमि (१) ॥ इति परिक्रामति ॥

अर्वि ॥ रदनिकां हन्तुमिच्छति निरूप्य॥ कथं स्त्री? भवतु गच्छामि ॥ इति निष्क्रान्तः ॥

रद ॥ गला सचासं॥ हद्धी, हद्धी; अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कमति। भोदु, मित्तेअं गदुअ पवोधेमि ॥ विदूषकमुपगम्य॥ अज्ज मित्तेअ, उट्ठेहि, उट्ठेहि; अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कन्तो (२)।

विदू ॥ उत्थाय॥ आः दासीए धीए, किं भणासि; चोरो कप्पिअ सन्धिं णिक्कन्तो (३)।

---

(१) हा धिक्, हा धिक्, बहिर्द्वारशालायां प्रसुप्तो बर्द्धमानकः, सोऽप्यत्र न दृश्यते; भवतु, आर्य्य मैत्रेयं आह्वयामि।

(२) हाधिक्, हाधिक्, अस्माकं गृहे सन्धिं कर्त्तयित्वा, चौरो निष्क्रामति। भवतु, मैत्रेयं गत्वा प्रबोधयामि। आर्य्य मैत्रेय, उत्तिष्ठ, उत्तिष्ठ; अस्माकं गेहे सन्धिं कर्त्तयित्वा, चौरो निष्क्रान्तः।

(३) आः दास्याः पुत्रिके; किं भणसि; चौरः कल्पयित्वा सन्धिं निष्क्रान्तः।

Digitized by Google

रद्द। हदास, अलं परिहासेण, किं ण पेक्खसि एणं (१)।

विदू। आः दासीए धीए, किं भणासि; दुद्दिअं विअ दुआरं उद्घाडिदत्ति। भो वअस्स चारुदत्त, उट्ठेहि, उट्ठेहि; अम्हाणं गेहे सन्धिं दद्दूअ चोरो णिक्कन्तो (२)।

चारु। भवतु, भोः, अलं परिहासेन।

विदू। भो ण परिहासो, पेक्खदु भवं (३)।

चारु। कस्मिन्नुद्देशे।

विदू। भो, एसो (४)।

चारु ॥ विलोक्य ॥ अहोदर्शनीयोऽयं सन्धिः।

उपरितलनिपातितेष्टकोऽयं
शिरसि तनुर्विपुलस्य मध्यदेशे,
अवटगजनसन्नियोगभीरो,
हृदयमिव स्फुटितं महागृहस्य।
कथमस्मिन्नपि कर्मणि कुशलता।

---

(१) हताश किं न अलं परिहासेन, किं न प्रेक्षसे एतत्।

(२) आः दास्याः पुत्रिके; किं भणसि, द्वितीयमिव द्वारं उद्घाटितमिति। भो वयस्य, चारुदत्त, उत्तिष्ठ, उत्तिष्ठ अस्माकं गेहे सन्धिं दत्वा चौरोनिष्क्रान्तः।

(३) भो न परिहासः, प्रेक्षतां भवान्।

(४) भो एषः।

Digitized by Google

विदू। भो वअस्स, अअं सन्धी दुवेहिं जेव्व दिण्णो भवे; आदु, आगन्तुएण, सिक्खिदुकामेण वा। अण्णधा दध उज्जदणीए को अम्हाणं घरं विहवं ण आणादि (१)।

चारु। वैदेग्धेन हृतोभवेन्मम गृहे व्यापारमभ्यस्यता
नाम्नैवेदितवान्धनैर्विरहितं विस्रब्धसुप्तं जनं।
दृष्ट्वा प्राक्प्रहतौ निवासरचनामस्माकमाशान्वितः,
सन्धिच्छेदनखिन्नएव सुचिरं पश्चान्निराशोगतः।

ततः सुहृद्भिः किमसौ कथयिष्यति तपस्वी। सार्थवाहस्य तस्य गृहं प्रविश्य न किञ्चिन्मया समासादितमिति।

विदू। भो, कधं तं जेव्व चोरहदअं अणुसोचेमि। तेण चिन्तिदं महन्तं एदं गेहं, दूदो रअणभण्डअं, सुवण्णभण्डअं, वा, णिक्कामइस्सामि ॥ स्मृत्वा सविषादमात्मगतं॥ कहिं तं सुवण्णभण्डअं ॥पुनरनुस्मृत्य प्रकाशं॥ भो वअस्स, तुमं सव्व कालं भणासि, मुक्खो मित्तेअओ, अपण्डिदो मित्तेअओत्ति; सुट्ठु मए कदं, तं सुवण्णभण्डअं भवदो हत्थे समप्पअन्तेण, अण्णधा दासीए पुत्तेण अवहदं भवे (२)।

---

(१) भो वयस्य, एष सन्धिर्दाभ्यामेव दत्तो भवेत्। अथवा आगन्तुकेन, शिक्षितुकामेन, वा, अन्यथा अतोऽन्या चिन्तां कोऽस्माकं गृहं विभवं न जानाति।

(२) भो कथं तमेव चोरहतकमनुशोचामि; तेन चिन्तितं, महदेतद्गृहं, दूतोरत्नभाण्डं सुवर्णभाण्डमानिष्क्रामयिष्यामि

Digitized by Google

चारु। अलं परिहासेन।

विदू। भो, जह णाम अहं मुक्खो, किं ता परिहासस्स वि देसकालं ण आणामि (१)।

चारु। कस्यां वेलायां।

विदू। भो जदा तुमं मए भणिदोसि, सीदसो दे अग्ग हत्थो (२)।

चारु। कदाचिदेवमपि स्यात् ॥ सर्व्वतोनिरूप्य सहर्षं ॥ वयस्य, दिष्ट्या ते प्रियं निवेदयामि।

विदू। किं ण अवहदं (३)।

चारु। हृतं।

विदू। तधावि किं पियं (४)।

चारु। यदसौ हृतार्थोगतः।

कुच तत् सुवर्णभाण्डकं। भो वयस्य, त्वं सर्व्वकालं भणसि, मूर्खो मैत्रेय, अपण्डितः मैत्रेयइति, सुष्ठु हृतं मया, तत्सुवर्णभाण्डं भवतोहस्ते समर्पयता, अन्यथा दास्याः पुत्रेणापहृतं भवेत्।

(१) भो, यद्या नामाहं मूर्खस्तत्किं परिहासस्य अपि देशकालं न जानामि।

(२) भो, यदा त्वं मया भणितोऽसि, शीतलस्ते अग्रहस्तः।

(३) किं नापहृतं।

(४) तथापि किं प्रियं।

विदू। णासो क्खु सो (१)।

चारु। कथं न्यासः ॥ मोहमुपगतः ॥

विदू। समस्सासदु भवं। जइ णासो चोरेण अवहदो तुमं वि किं मोहमुपगदो (२)।

चारु ॥ समाश्वस्य॥ वयस्य,

कः श्रद्धास्यति, भूतार्थं सर्व्वोमां तुलयिष्यति;
गच्छनीयाहि लोकेस्मिन्निःप्रतापा दरिद्रता।

भोः कष्टं,

यदि तावत्कृताज्ञेन प्रत्ययोऽर्थेषु मे कृतः,
किमिदानीं नृशंसेन चारित्रमपि दूषितं।

विदू। अहं खु अवलविस्सं। केण दिण्णं? केण गहिदं? को वा अक्खिस्सदि? (३)।

चारु। अहमिदानीमनृतमभिधास्ये?

मैत्र्येणाप्यर्थयिष्यामि पुनर्न्यासप्रतिक्रियां,
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणं।

---

(१) न्यासः खलु सः।

(२) समाश्वसितु भवान्, यदि न्यासचौरेणापहृतः, त्वमपि किं मोहमुपगतः।

(३) अहं खलु अपलपिष्यामि; केन दत्तं? केन गृहीतं? कोवा साक्षीति?

Digitized by Google

रद्द। ता आव अज्जाधूदाए गदुअ णिवेदेमि (१) ॥ इति निष्क्रान्ता ॥

॥ प्रविश्य ॥ चेट्या सह चारुदत्तवधूः।

वधूः ॥ सभ्रमं॥ अद्द सच्चं अवरिक्खदसरीरो अज्ज उत्तो, अज्जमित्तेएण सह (२)।

चेटी। भट्टिणि, सच्चं; किंतु जो सो वेस्साजणकेरको अलंकारओ सो अवहदो (३)।

वधूः ॥ मोहं नाटयति ॥

चेटी। समस्ससदु अज्जा धूदा (४)।

वधूः ॥ समाश्वस्य ॥ हज्जे किं भणासि, अवरिक्खदसरीरो; अज्जउत्तोत्ति। वरं दाणिं सो सरीरेण परिक्खदो ण उण चारित्तेण। संपदं, उज्जइणीए जणो एवं मन्तइस्सदि, दलिद्दाए अज्जउत्तेण जेव्व ईदिसं अकज्जं अनुचिट्ठिदंत्ति। ॥ऊर्द्धमवलोक्य निश्वस्य च॥ भअवं कअन्त, पोक्खरवत्तपडिद जलविन्दुचञ्चलेहिं कीलसि दलिद्दपुरिसभाअधेएहिं। इअं च मे एक्का मादुघरलद्धा रअणावली चिट्ठदि। एदं पि

---

(१) तत् यावत् आर्य्या धूतायै गत्वा निवेदयामि।

(२) अयि सत्यं, अपरिचतशरीरः आर्य्यपुत्रः, आर्य्य मैत्रेयेण सह।

(३) स्वामिनि सत्यं, किन्तु यः स वेश्याजनस्यालङ्कारः सोऽपहृतः।

(४) समाश्वसितु आर्य्या धूता।

Digitized by Google

अदिगोण्डीरदाए अज्जउत्तो ण गेच्छिस्सदि। हञ्जे, अज्ज मित्तेअं दाव सद्दावेहि (१)।

चेटी। जं अज्जा धूदा आणवेदि ॥ विदूषकमुपगम्य॥ अज्ज मित्तेअ, धूदा दे सद्दावेदि (२)।

विदू। कहिं सा (३)।

चेटी। एसा चिट्ठदि; उवसप्प (४)।

विदू ॥ उपसृत्य॥ सोत्थि भोदीए (५)।

वधूः। अज्जं वन्दामि; अज्ज पुरत्थिआमुहो होहि (६)।

---

(१) चेटि, किं भणसि; अपरिचत शरीरः आर्य्यपुत्र इति। वरं,इदानीं स शरीरेण परिचतो न पुनश्चारित्रेण। सामतमुज्झयिन्यां जनएवं मन्त्रयिष्यति, दरिद्रतया आर्य्य पुत्रेणैव ईदृशमकार्य्यं अनुष्ठितं। भगवन् कृतान्तपुष्करपत्र पतितजलविन्दुचञ्चलैः क्रीडसि दरिद्रपुरुषभागधेयैः। दृयञ्च मे एका मातृगृहलब्धा रत्नावली तिष्ठति। एतामपि अति गौण्डीरतया आर्य्यपुत्रेन ग्रहीष्यति। चेटि, आर्य्य मैत्रेयं तावदाकृय।

(२) यत् आर्य्या धूता आज्ञापयति। आर्य्य मैत्रेय, धूता त्वामाज्ञापयति।

(३) कुत्र सा।

(४) एषा तिष्ठति, उपसर्प्य।

(५) स्वस्ति भवत्याः।

(६) आर्य्ये वन्दे। आर्य्य पुरस्तान्मुखोभव।

Digitized by Google

विदू। एष भोति पुरस्ताम्मुखो संवृत्तोस्मि (१)।

वधूः। अज्ज पडिच्छ इमं (२)।

विदू। किं णेदं (३)।

वधूः। अहं खु रअणसट्ठि उवणमिदा आसिं, तहिं जधा विहवाणुसारेण बम्हणोपडिग्गाहिदव्वो, सो अण्णपडिग्ग हिदो, ता तस्स कदे पडिच्छ इमं रअणमालिअं (४)।

विदू ॥ गृहीत्वा ॥ सोत्थि; गमिस्सं पिअवअस्सस्स णिवेदेमि (५)।

वधूः। अज्ज मित्तेअ, मा खु मं लज्जावेहि (६)॥ इति निष्क्रान्ता॥

विदू ॥ सविस्मयं॥ अहो से भट्टाणुभावदा (७)।

---

(१) एष भवति पुरस्तान्मुखः संवृत्तः।

(२) आर्य्य गृहातु इमां।

(३) किं नेदं।

(४) अहं खलु रत्नषष्टी उपनमिता आसं; तच्च यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहितव्यः, सः अन्यच्च प्रतिग्राहितः, तत् तस्य कृते प्रतीच्छ इमां रत्नमालिकां।

(५) स्वस्ति; गमिष्यामि प्रियवयस्याय निवेदयामि।

(६) आर्य्य मैत्रेय, मा खलु मां लज्जितां कुरु।

(७) अहो अस्माभद्दानुभावता।

Digitized by Google

चारु। अये चिरयति मैत्रेयः। मा नाम वैक्लव्यादकार्यं कुर्यात्। मैत्रेय, मैत्रेय।

विदू ॥ उपसृत्य ॥ एषोऽस्मि; गेण्ह एदं (१) ॥ रत्नावलीं दर्शयति ॥

चारु। किमेतत्।

विदू। भो, जं दे सरिसदारसङ्गहस्स फलं (२)।

चारु। कथं, ब्राह्मणी मामनुकम्पते। कष्टमिदानीमस्मि दरिद्रः।

आत्मभाग्यचतद्रव्यः स्त्रीद्रव्येणानुकम्पितः;
अर्थतः पुरुषोनारी वा नारी सार्थतः पुमान्।

अथवा। नाहं दरिद्रः। यस्य मम,

विभवानुगता भार्य्या, सुखदुःखसुहृद्गवान्,
सत्यञ्च न परिभ्रष्टं, तद्दरिद्रेषु दुर्लभं।

मैत्रेय, गच्छ रत्नावलीमादाय वसन्तसेनायाः सकाशं वक्तव्या च सा मद्वचनात्। यत्तस्यास्माभिः सुवर्णभाण्ड मात्मीयमिति ज्ञात्वा विस्रम्भात् द्यूते हारितं, तस्य ऋते गृह्य तामियं रत्नावलीति।

---

(१) एषोऽस्मि; गृहाण एतां।

(२) भो यत्ते सदृशं दारसंग्रहस्य फलं।

Digitized by Google

विदू। मा दाव, अक्खादिदस्स, अभुत्तस्स, अप्पमुल्लस्स, चोरेहिं अवहदस्स, कारणादो, चदुस्समुद्दसारभूदा रअणावली दीअदि (१)।

चारु। वयस्य मामेवं।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः,
तस्यै तन्महतोमूल्यं प्रत्ययस्यैव दीयते।

तदयस्य, अस्माच्छरीरसृष्टिकया ग्रापितोऽसि, नैनामया हृयिलाचागन्तव्यं। वर्द्धमानक, एताभिरिष्टिकाभिः सन्धिः क्रियतां सुसंहतः शीघ्रं। परिवादबहुलदोषान्न यस्य रक्षां परिहरामि। वयस्य मैत्रेय, भवतायत्कृपणशौण्डीर्यमभिधातव्यं।

विदू। भो दलिद्दोकिं अकिविणं मन्तेदि (२)।

चारु। अदरिद्रोऽस्मि सखे। यस्य मम ॥विभवानुगता भार्येत्यादि पुनः पठति॥ तदुक्तु भवान्। अहमपि कृतशौचः सन्ध्यामुपासे॥ इति निष्क्रान्ताः सर्वे॥

संन्धिच्छेदोनाम तृतीयोऽङ्कः समाप्तः।

---

(१) मा तावत्, अखादितस्य, अभुक्तस्य, अल्पमूल्यस्य चौरैरपहृतस्य कारणात्, चतुःसमुद्रसारभूता रत्नावली दीयते।

(२) भो दरिद्रः किं अकृपणं मन्त्रयति।

Digitized by Google

॥ अथ चतुर्थोऽङ्कः ॥

ततः प्रविशति चेटी। चेटी। आणत्तम्हि अत्ताए, अज्ज आस आसं गन्तुं। एसा अज्ज आ चित्तफलहणिसण्णदिट्ठी मदणिआए सह किंपि मन्तअन्ती चिट्ठदि, ता जाव उवसप्पामि (१)।

॥ इति परिक्रामति॥

॥ ततः प्रविशति यथानिर्दिष्टा वसन्तसेना मदनिका च॥

वसं। हञ्जे मअणिए, अवि सुसदिसी दूअं चित्ताकिदी अज्जचारुदत्तस्स (२)।

मद। सुसदिसी (३)।

वसं। कधं तुमं जानासि (४)।

मद। जेण अज्जआए सुसिणिद्धा दिट्ठी अणुलग्गा (५)।

---

(१) आज्ञप्तास्मि भाचा आर्य्यायाः सकाशं गन्तुं। एषा आर्य्या चित्रफलकनिषण्णदृष्टिर्मदनिकया सह किमपि मन्त्र यन्ती तिष्ठति। तत् यावत् उपसर्पामि।

(२) चेटि मदनिके, सुसदृशी दूतं चिन्ताकृतिः आर्य्य चारुदत्तस्य।

(३) सुसदृशी।

(४) कथं त्वं जानासि।

(५) येन आर्य्यायाः सुस्निग्धा दृष्टिरनुलग्ना।

Digitized by Google

वसं। हञ्जे, किं वेसवासदक्खिणेण मअणिए एवं भणासि (१)।

मद। अज्जए, किं जो जेव्व जणो वेसे पडिवसदि, सो जेव्व अलीअदक्खिणो भोदि (२)।

वसं। हञ्जे, णाणापुरिससङ्गेण वेसाजणो अलिअदक्खिणो भोदि (३)।

मद। जदो दाव अज्जआए दिट्ठी दअ अभिरमदि, हिअअं च। तस्स कारणं किं पुच्छीअदि (४)।

वसं। हञ्जे, सहीअणादो उवहसणीअदं दिक्खामि (५)।

मद। अज्जए एवं णेदं। सहीजणचित्ताणुवत्ती अवला अणो भोदि (६)।

---

(१) चेटि, किं वेश्यावसदाक्षिण्येण मदनिके एवं भणसि।

(२) आर्ये, किं य एव जनो वेश्ये प्रतिवसति स एव अलीकदाक्षिण्यो भवति।

(३) चेटि, नानापुरुषसङ्गेन वेश्याजनः अलीकदाक्षिण्यो भवति।

(४) यतस्तावत् आर्यायाः दृष्टिः दयं अभिरमते, हृदयञ्च। तस्य कारणं किं पृच्छ्यते।

(५) चेटि सखीजनादुपहसनीयतां द्रक्ष्यामि।

(६) आर्ये, एवं नेदं सखीजनचित्तानुवर्त्ती अवलाजनो भवति।

Digitized by Google

प्रथमा चेटी ॥ उपसृत्य ॥ अज्जए अत्ता आणवेदि। गहिदावगुण्ठणं पक्खद्दुआरए सज्जं पवहणं ता गच्छेत्ति (१)।

वसं। हञ्जे, किं अज्जचारुदत्तो मं णेदुमादि (२)।

चेटी। अज्जए, जेण पवहणेण सह सुवण्णदसणाहस्थिओ अलङ्कारओ अणुपेसिदो (३)।

वसं। को उण सो (४)।

चेटी। एसो जेव्व राअसालसंठाणो (५)।

वसं ॥ सक्रोधम् ॥ अवेहि; मा पुणो एवं भणिस्सदि (६)।

चेटी। पसीददु, पसीददु; अज्ज आसन्देसेणम्हि पेसिदा (७)।

वसं। अहं सन्देसस्सु जेव्व कुप्पामि (८)।

---

(१) आर्य्ये माता आज्ञापयति, गृहीतावगुण्ठनं पच द्वारे सज्जं प्रवहणं, तद् गच्छेति।

(२) चेटि, किं आर्य्य चारुदत्तो मां नेष्यति।

(३) आर्य्ये, येन प्रवहणेन सह सुवर्णदशनाहस्तिकः अलङ्कारः अनुप्रेषितः।

(४) कः पुनः सः।

(५) एष एव राजशालकसंस्थानः।

(६) अपेहि, मा पुनरेवं भणिष्यति।

(७) प्रसीदतु, प्रसीदतु आर्य्या, सन्देशेनास्मि प्रेषिता।

(८) अहं सन्देशस्यैव कुप्यामि।

Digitized by Google

चेटी। ता किंति अज्जं विण्णविस्सं (१)।

वसं। एव्वं विण्णवेदव्वा; जं मं जीअंतीमिच्छसि, ता एव्वं ण पुणो अहं अज्जाए आणाविदव्वा (२)।

चेटी। जधा दे रोअदि (३)।

॥ इति निष्क्रान्ता ॥ प्रविश्य शर्विलकः।

दत्वा निशायावचनीयदोषं, निद्राञ्च जित्वा नृपतेश्च रक्षान्,
स एष सूर्योदयमन्दरश्मिः क्षपाक्षयाच्चन्द्रवास्मि जातः।

अपिच।

यः कश्चित्त्वरितगतिर्निरीक्षते मां,
संभ्रान्तं, द्रुतमुपसर्पति स्थितं वा;
तं सर्वं तुलयति दूषितोऽन्तरात्मा;
खैर्दोषैर्भवति हि शंकितोमनुष्यः।

मया खलु मदनिकायाः कृते साहसमनुष्ठितम्।

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः,
क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्त्तितम्,
नरपतिबले पार्श्वायातेस्थितं गृहदारुवत्
व्यवसितशतैरेवंप्रायैर्निशा दिवसीकृता।

॥ इति परिक्रामति ॥

---

(१) तत्किमिति मातरं विज्ञापयिष्यामि।

(२) एवं विज्ञापयितव्या, यदि मां जीवतीमिच्छसि, तदा एवं न पुनरहं मात्रा आज्ञापयितव्या।

(३) यथा ते रोचते।

Digitized by Google

वसं। हञ्जे, इमन्दाव चित्तफलअं मम सअणीए ठाविअ, तालवेण्टअं गेण्हिअ लहुं आअच्छ (१)।

मद। अं; जं अज्जआ आणवेदि (२) ॥ इति फलकं गृहीत्वा निष्क्रान्ता ॥

अर्वि। इदं वसन्तसेनाया गृहं तद्यावत्प्रविशामि ॥ प्रविश्य च मदनिका दृष्टव्या ॥ ततः प्रविशति तालवृन्तहस्ता मदनिका;

अर्वि। दृष्ट्वा अये, इयं मदनिका।

मदनमपि गुणैर्विभ्रेषयन्ती रतिरिव मूर्त्तिमती विभाति येयम्;
मम हृदयमनङ्गवङ्कितम्, भृशमिव चन्दनशीतलङ्करोति।

मदनिके।

मद ॥ दृष्ट्वा ॥ अम्मो, कधं, सव्विलओ; सव्विलअ सागद दे, कहिं तुमं (३)।

अर्वि ॥ कथयिष्यामि ॥ इति सानुरागमन्योन्यं पश्यतः।

वसं। चिरअदि मदणिआ, ता कहिं णुहु सा ॥ गवाक्षकेण दृष्ट्वा ॥ कधं, एसा केनावि पुरिसकेण सह मन्तअन्ती चिट्ठदि। जधा अदिसिणिद्धाए णिच्चलदीट्ठिए आपिवन्ती विअ,

---

(१) चेटि, इमं तावत् चित्रफलकं मम शयनीये स्थापयित्वा, तालवृन्तं गृहीत्वा, लघु आगच्छ।

(२) अं; यदार्य्या आज्ञापयति।

(३) कथं अर्व्विलकः। अर्व्विलक, स्वागतं ते; कुत्र त्वं।

Digitized by Google

एदं चिन्तयामदि। तधा तक्केमि, एसो सो जणो एदं इच्छदि अभुजिस्सं कादुं; ता रमदु, रमदु; मा कस्सावि पीदिच्छेदो भोदु, ण उ सद्दाविस्सं (१)।

मद। सव्विलअ कधेहि (२)।

अर्वि ॥ साशङ्कं दिशोवलोकयति ॥

मद। सव्विलअ, किं णेदं सअंको विअ लक्खीअसि (३)।

अर्वि। वच्चे लां किञ्चिदूहस्सं, तद्दिविक्कमिदं।

मद। अधदं (४)।

वसं। कधं परमरहस्सं, ता ण सुणिस्सं (५)।

---

(१) चिरयति मदनिका, तत्कुत्र नु खलु सा। कथं, एषा केनापि पुरुषकेण सह मन्त्रयन्ती तिष्ठति। यथा अतिस्निग्धया निश्चलदृष्ट्या आपिबन्तीव एवं निर्ध्यायति। तथा तर्कयामि, एष सज्जनः एनामिच्छति अभुजिष्यां कर्त्तुं; तत् रमतां, रमतां; मा कस्यापि प्रीतिच्छेदोभवतु, न खलु आकारं विद्यामि।

(२) अर्विलक, कथय।

(३) अर्विलक, किं नेदं सशङ्कइव लक्ष्यसे।

(४) अथ किं।

(५) कथं परमरहस्यं तत् न श्रोष्यामि।

Digitized by Google

ग्रर्वि। मदनिके, किं वसन्तसेना मोक्ष्यति त्वां निःक्रयेण।

वसं। कधं मत्तंबन्धिणी कधा, ता सुणिस्सं, दूमिणा गवक्खेण ऊवारिदसरीरा (१)।

मद। सव्विलअ, भणिदा मए अज्जआ; तदो भणादि, जदू मम सच्छन्दो तदा विणा अत्थं च सव्वं परिअणं अभुजिस्सं करइस्सं। अध सव्विलअ, कुदो दे एत्तिअ विहवो, जेण मं अज्जआसआसादो मोआइस्ससि (२)।

ग्रर्वि। दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च
अथ राचौ मया, भीरु, त्वदर्थे साहसं कृतम्।

वसं। पसण्णा से आकिदी साहसकम्मदाए उण उव्वेअणीआ (३)।

मद। सव्विलअ, इत्थीकव्ववत्तस्स कारणेण उहअं पि संसए विणिक्खित्तं (४)।

---

(१) कथं मत्तसम्बन्धिनी कथा, तत् श्रोष्यामि अनेन गवाक्षेण निवारितशरीरा।

(२) ग्रर्विलक, भणिता मया आर्य्या। तदा भणति, यदि मम स्वच्छन्दः तदा विना अर्थस्य सर्व्वं परिजनं अभुजिष्यं करिष्यामि। अथ ग्रर्विलक, कुतस्ते एतावान् विभवः येन मामार्य्यासकाशात् मोचयिष्यसि।

(३) प्रसन्नास्याकृतिः साहसकर्मतया पुनरुद्वेजनीया।

(४) ग्रर्विलक, स्त्रीकव्यवर्त्तस्य कारणेन उभयमपि संशये विनिक्षिप्तं।

Digitized by Google

शर्वि। किं, किं।

मद। शरीरं, चारित्रञ्च (१)।

शर्वि। अपण्डिते, साहसे श्रीः प्रतिवसति।

मद। सव्विलअ, अखण्डिदचारित्तोसि; ता णउ दे मम कारणादो साहसं करन्तेण अच्चंतविरुद्धमाचरितं (२)।

शर्वि। नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां,

विप्रलंभ न हरामि काञ्चनमथोयच्चार्थमभ्युद्धृतम्;

धान्यस्याङ्गगतं हरामि न तथा वासं धनार्थी क्वचित्,

कार्य्याकार्य्यविचारिणी मम मतिस्त्वार्येऽपिनित्यंस्थिता।

तद्विज्ञाप्यतां वसन्तसेना।

अयं तव शरीरस्य प्रमाणादिव निर्मितः,

अप्रकाशोऽलंकारोमत्स्नेहाद्धार्य्यतामिति।

मद। सव्विलअ, अप्पकासो अलंकारो, अयञ्च जणो, त्ति दुवेवि ण जुज्जदि; ता उवणेहि दाव पेक्खामि, दाव एदं अलंकारअं (३)।

---

(१) शरीरं चारित्रञ्च।

(२) शर्व्विलक, अखण्डितचरित्रोऽसि; तत् नहि त्वया मम कारणात् साहसं कुर्व्वता अत्यन्तविरुद्धमाचरितं।

(३) शर्व्विलक, अप्रकाशोऽलङ्कारः, अयञ्च जनः, इति द्वयमपि न युज्यते; तत उपनय तावत् पश्यामि तावदेतत् अलङ्कारं।

Digitized by Google

शर्वि। इदमलङ्करणं ॥इति साभरणं समर्पयति॥

मद ॥निरूप्य॥ दिट्ठपुरुव्वोविअ अअं अलंकारओ; ता भणेहि कुदो दे एसो (१)।

शर्वि। मदनिके, किं तवानेन? गृह्यतां।

मद ॥सरोषम्॥ जइ मे पच्चअं ण गच्छसि, ता किं णिमित्तं मं णिक्किणसि (२)।

शर्वि। अयि, प्रभाते मया श्रुतं श्रेष्ठिचत्वरे यथा सार्थवाहस्य चारुदत्तस्येति ॥वसन्तसेना मदनिका च मूर्छां नाटयतः॥

शर्वि। मदनिके, समाश्वसिहि, किमिदानीं त्वं,

विषादस्खलसर्वाङ्गी संभ्रमभ्रान्तलोचना,

नीयमानाभुजिष्या त्वं कस्मसे नानुकम्पसे।

मद ॥समाश्वस्य॥ साहसिअ, ण ऊ तुए मम कारणा दो दूमं अकज्जं करन्तेण, तस्सिं गेहे कोवि वावादिदो, परिक्खदो वा (३)।

---

(१) दृष्टपूर्व इवायमलङ्कारः; तद्गृह्यतां कुतस्त्य एषः।

(२) यदि मे प्रत्ययं न गच्छसि, तत् किं निमित्तं मां निष्क्रीणासि।

(३) साहसिक, नखलु त्वया मम कारणात् इदं अकार्यं कुर्वता, तस्मिन् गेहे कोऽपि व्यापादितः परिक्षतोवा।

Digitized by Google

अर्वि। मदनिके, भीते सुप्ते न अर्विलकः प्रहरति। तन्मया न कश्चिद्ब्राह्मणादितोऽपि परिचितः।

मद। सच्चं (१)।

अर्वि। सत्यं, सत्यं।

वसं ॥ सञ्ज्ञां लब्ध्वा ॥ अम्महे पच्चुपजीविदम्हि (२)।

मद। पिअं (३)।

अर्वि ॥ सेर्ष्यं ॥ मदनिके, किं नाम प्रियमिति।

त्वत्स्नेहबद्धहृदयोहि करोम्यकार्य्यं,
सद्वृत्तपूर्व्वपुरुषेऽपि कुले प्रसूतः;
रक्षामि मन्मथविपन्नगुणोऽद्य मानं
मित्रञ्च मां व्यपदिशस्यपरञ्च यासि।

॥ साकूतम्॥

दूह सर्व्वफलिनः कुलपुत्रमहाद्रुमाः
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः;
अयञ्च सुरतज्वालः कामोऽग्निः प्रणयेन्धनः
नराणां यत्र हूयन्ते यौवनानि धनानि च।

वसं ॥ सस्मितं॥ अहो से अत्थाणे आवेओ (४)।

---

(१) सत्यं।

(२) आर्य्ये; प्रत्युपजीवितास्मि।

(३) प्रियं।

(४) अहो अस्य अस्थाने आवेगः।

Digitized by Google

मर्वि। सर्व्वथा।

अपण्डितास्ते पुरुषामतामे, येस्त्रीषु च श्रीषु च विश्वसन्ति,
श्रियोहि कुर्व्वन्ति तथैव नार्य्योभुजङ्गकन्यापरिसर्पणानि,।
स्त्रीषु न रागः कार्य्यो; रक्तं पुरुषं स्त्रियः परिभवन्ति;
रक्तैव हि रन्तव्या विरक्तभावा नु हातव्या।

सुष्ठु खल्विदमुच्यते।

एताहसन्ति च रुदन्ति च वित्तहेतो
र्विश्वासयन्ति पुरुषं न तु विश्वसन्ति।
तस्मान्नरेण कुलशीलसमन्वितेन,
वेश्याः श्मशानसुमनाइव वर्जनीयाः।

अपिच।

समुद्रवीचीव चलस्वभावाः, सन्ध्याभ्रलेखेव मुहूर्त्तरागाः,
स्त्रियोहतार्थाः पुरुषंनिरर्थं, निःपीडितालक्तकवत्त्यजन्ति।

स्त्रियोनाम चपलाः।

अन्यं मनुष्यं हृदयेण हत्वा, अन्यं ततोदृष्टिभिराकृषन्ति;
अन्यच मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते।

सूक्तं खलु कथ्यते।

न पर्वतायेनलिनी प्ररोहति, न गर्दभा वाजिधुरं वहन्ति,
यवाःप्रकीर्णानभवन्ति शालयो, नवेशजाताःशुचयस्तथाङ्गनाः।

आः दुरात्मन् चारदत्तहतक, अयं न भवसि॥ कतिचित्य
दानि ददाति॥

मद ॥ अञ्जले गृहीत्वा ॥ अद्द असंबद्धभाषअ, असं भावणीए कुप्पसि (१)।

अर्वि। कथमसम्भावनीयं नाम।

मद। एसो खु अलङ्कारओ अज्जआ केरओ (२)।

अर्वि। ततः किम्।

मद। सच तस्स अज्जस्स हत्थे विणिक्खित्तो (३)।

अर्वि। किमर्थम्।

मद ॥ कर्णे ॥ एवं विअ (४)।

अर्वि ॥ सवैलक्ष्यम् ॥ भोः कष्टम्।

छायार्थं योऽसन्तप्तोयामेवाहं समाश्रितः,
अजानता मया, सैव पत्रैः शाखा विशोजिता।

वसं। कधं एसोवि सन्तप्पदि व्वेव्व। ता, अज्जाणन्तेण एदिणा एव्वमणुचिट्ठिदं (५)

---

(१) अयि असम्बद्धभाषक, असम्भावनीयं कुप्यसि।

(२) एष खलु अलङ्कारः आर्य्यया कृतः।

(३) सच तस्य आर्य्यस्य हस्ते विनिःक्षिप्तः।

(४) एवमिव।

(५) कथमेष सन्ताप्यते एव; तत् अजानता एतेन एव मनुष्ठितं।

Digitized by Google

शर्वि। मदनिके, किमिदानीं युक्तम्।

मद। एत्थ तुमं ज्जेव्व पण्डिओ (१)।

शर्वि। नैवम्। पश्य।

स्त्रियोहि नाम खल्वेतानिसर्गादेव पण्डिताः,
पुरुषाणान्तु पाण्डित्यं शास्त्रैरेवोपदिश्यते।

मद। सव्विलअ, जइ मम वअणं सुणीअदि, ता तस्स ज्जेव्व महाणुभावस्स पडिणिज्जादेहि (२)।

शर्वि। मदनिके, यद्यसौ राजकुले मां कथयति।

मद। ण चन्दादो आदवो होदि (३)।

वसं। साऊ, मअणिए, साऊ (४)।

शर्वि। मदनिके।

न खलु मम विषादः, साहसेऽस्मिन् भयम्वा,
कथयसि हि किमर्थं तस्य साधोर्गुणास्त्वम्,
जनयति मम वेदं कुत्सितं कर्म लज्जां,
नृपतिरिह शठानां माद्दशां किं नु कुर्य्यात्।
तथाप्यन्यदुपायश्चिन्त्यताम्।

---

(१) अत्र त्वमेव पण्डितः।

(२) शर्विलक, यदि मम वचनं श्रूयते, तत् तस्यैव महानुभावस्य प्रतिनिर्य्यातय।

(३) न चन्द्रादातपोभवति।

(४) साधु मदनिके साधु।

Digitized by Google

मद० । सोअम्हं अवरो उवाओ (१)।

वसं० । को क्खु अवरो उवाओ उवविस्सदि (२)।

मद० । तस्स ज्जेव्व अज्जस्स केरको भविअ, एदं अलङ्कारअं अज्जआए उवणेहि (३)।

शर्वि० । एवं कृते किं भवति ।

मद० । तुमं दाव अचोरो, सोवि अणो अरिणो अज्जआए सकं अलङ्कारअं उवगदं भोदि (४)।

शर्वि० । नन्वतिसाहसमेतत् ।

मद० । अइ उवणेहि अण्णधा अदिसाहसं (५)।

वसं० । साधु, मदणिए, साधु । अभुजिस्साए विअ मल्लिदं (६)।

शर्वि० । मयाप्ता महती बुद्धिर्भवतीमनुगच्छता,
निशायां नष्टचन्द्रायां दुर्लभोनाम दर्शकः ।

---

(१) सोयमपरउपायः ।

(२) कः खलु अपरउपायोभविष्यति ।

(३) तस्यैव आर्यस्य कृतः भूत्वा इममलङ्कारं आर्यायै उपनय ।

(४) त्वं तावत् अचौरः, सोऽपि अणः अनृणः, आर्यया स्वकः अलङ्कारः उपगतः भवति ।

(५) अयि उपनय अन्यथा अतिसाहसं ।

(६) साधु, मदनिके, साधु, अभुजिष्यया इव मल्लितं ।

Digitized by Google

मद। तेण तुमं दुमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ, जाव अज्जआए तुहागमणं णिवेदेमि (१)।

अर्वि। एवं भवतु।

मद ॥ उपसृत्य ॥ अज्जए एसो क्खु चारुदत्तस्स सआसादो बम्हणो आअदो (२)।

वसं। हञ्जे, तस्स केरअंत्ति कधं तुमं जाणासि (३)।

मद। अज्जए अत्तकेरअं वि ण जाणामि (४)।

वसं ॥ स्वगतं सशिरःकम्पं विहस्य॥ ज्जुदि, ज्जुदि ॥ प्रकाशं॥ पविसदु (५)।

मद। जं अज्जआ आणवेदि ॥ उपगम्य ॥ पविसदु सव्विलओ (६)।

अर्वि ॥ उपसृत्य ॥ स्वस्ति भवत्यै।

---

(१) तेन त्वमस्मिन् कामदेवगेहे मुहूर्त्तं तिष्ठ, यावत् आर्य्यायै तवागमनं निवेदयामि।

(२) आर्य्ये, एष खलु चारुदत्तस्य सकाशात् ब्राह्मण आगतः।

(३) हे चेटि, तस्य छत इति कथं त्वं जानासि।

(४) आर्य्ये आत्मनः छते अपि न जानामि।

(५) युज्यते, युज्यते; प्रविशतु।

(६) यदार्य्या आज्ञापयति, प्रविशतु शर्विलकः।

Digitized by Google

वसं। अज्ज वन्दामि, समाविसदु अज्जो (१)।

अर्वि। सार्थवाहस्यां विज्ञापयति। अर्जरलाङ्गूहस्य दूर स्वमिदं भाण्डम्; तद्गृह्यतां ॥इति मदनिकायाः समर्प्य स्थितः॥

वसं। अज्ज, समावि दाव पडिसंदेसं तहिं अज्जो णेदु (२)।

अर्वि ॥स्वगतम्॥ कस्तत्र यास्यति ॥प्रकाशम्॥ कः प्रतिसन्देशः।

वसं। पडिच्छदु अज्जो मदणिअं (३)।

अर्वि। भवति, न खल्ववगच्छामि।

वसं। अहमवगच्छामि।

अर्वि। कथमिव।

वसं। अहं अज्जचारुदत्तेण भणिदा, जो दमं अलङ्कारअं समप्पइस्सदि, तस्स तुए मदणिआ दादव्वा। ता सोजेव्व एदं दे दिवि एवं अज्जेण अवगन्तिदव्वं (४)।

---

(१) आर्य्य वन्दे, समाविशतु आर्य्यः।

(२) आर्य्य समापि तावत् प्रतिसन्देशं तत्र आर्य्योनयतु।

(३) प्रतीच्छतु आर्य्योमदनिकां।

(४) अहमार्य्यचारुदत्तेन भणिता, यः दमं अलङ्कारं समर्पयिष्यति, तस्य त्वया मदनिका दातव्या, तस्मादेव एतान्ते ददातीति, एवं आर्य्येण अवगन्तव्यं।

Digitized by Google

अर्वि ॥ स्वगतम् ॥ अये, विज्ञातोऽहमनया ॥ प्रकाशं ॥ साधु, चारुदत्त, साधु।

गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा;
गुणयुक्तोदरिद्रोऽपि नेश्वरैरगुणैः समः।

अपिच।

गुणेषु यत्नः पुरुषेण कार्य्यो, न किञ्चिदभ्यर्हतमं गुणानाम्;
गुणप्रकर्षादुडुपेन शम्भोरलञ्चितं लञ्चितमुत्तमाङ्गम्।

वसं। को एत्थ पवहणिओ (१)।

॥ अन्तिक सप्रवहणश्रेटः ॥ अय्ये, सज्जमवहणं (२)।

वसं। हञ्जे, मअणिए, सुदिट्ठं मं करेहि, दिट्ठासि, आरुह पवहणं, सुमरेसि मं (३)।

मद ॥ रुदती ॥ परिच्चुअम्हि अय्यआए (४) ॥ इति पादयोः पतति ॥

---

(१) कोऽत्र प्रवहणिकः।

(२) आर्य्ये सज्जं प्रवहणं।

(३) चेटि मदनिके, सुदृष्टां मां कुरु, दृष्टासि, आरोह प्रवहणं, स्मरसि मां।

(४) परित्यक्तास्मि आर्य्यायाः।

Digitized by Google

वसं। संपदं तुमं जेव्व वंदणीआ संवुत्ता, ता गच्छ, आरुह पवहणं। सुमरेसि मं (१)।

अर्वि। खल्लि भवत्ये; मदनिके,

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः,

यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनं।

॥ इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः। नेपथ्ये॥ कः कोऽत्र भोः राष्ट्रियः समाज्ञापयति। एष खल्वार्यकोगोपालदारको राजा भविष्यतीति, सिद्धादेशप्रत्ययपरिचत्तेन पालकेन राज्ञा, घोषादानीय घोरे बन्धनागारे क्षिप्तः। ततः खेषु खेषु स्थानेषु अप्रमत्तमत्तैर्भवद्भिर्भवितव्यम्।

अर्वि ॥ आकर्ण्य॥ कथं? राज्ञा पालकेन प्रियसुहृदार्य्यकोमे बन्धुः। कलचवांस्मि संवृत्तः। कष्टम्। अथवा।

दयमिदमतीव लोके प्रियं नराणां, सुहृच्च, वनिता च;

संप्रति तु सुन्दरीणां शतादपि सुहृदिष्टतमः।

भवत्यवतरामि ॥ इत्यवतरति॥

मद ॥ साअं अंजलिं बध्धा॥ एव्वं णेदं; ता परं णेदु मं अज्जउत्तो समीवं गुरुअणाणं (२)।

---

(१) साञ्जलिं त्वमेव वन्दनीया संवृत्ता, तद्गच्छ, आरोह प्रवहणं, स्मरसि मां।

(२) एवं नेदं; तत्परं नयतु मां आर्य्यपुत्रः समीपं गुरुजनानां।

Digitized by Google

आर्वि। साधु, प्रिये, साधु; अस्माभिरुक्तमप्रमत्तेन भवितव्यमिति।
॥चेटमुद्दिश्य॥ भद्र, जानीषे रेभिलस्य सार्थवाहस्य उद्यानं।

चेटः। अथ किं (१)।

आर्वि। तत्र प्रापय प्रियां।

चेटः। जं अज्जो आणवेदि (२)।

मद्। जधा अज्जउत्तो भणादि। अप्पमत्तेण दाव अज्जउत्तेण होदव्वं (३)॥ इति निष्क्रान्ता॥

आर्वि। अहमिदानीं।

ज्ञातीन्, विटान्, स्वभुजविक्रमलब्धगर्व्वान्,
राजापमानकुपितांश्च नरेन्द्रभृत्यान्,
उत्तेजयामि, सुहृदः परिमोचणाय,
यौगन्धरायणदुर्व्योधनस्य राज्ञः।

अपिच।

प्रियसुहृदमकारणे गृहीतं
रिपुभिरसाधुभिराहितात्मयद्भैः,
वरभवनमभिपत्य मोचयामि,
क्षितमिव राजमुखे ग्रहाङ्कविम्बम्॥ इति निष्क्रान्तः॥

---

(१) अथ किं।

(२) यदार्य्य आज्ञापयति।

(३) यथा आर्य्यपुत्रोभणति; अप्रमत्तेन तावत् आर्य्यपुत्रेण भवितव्यं।

Digitized by Google

प्रविश्य चेटी। अज्जए, दिट्ठिआ वड्ढसि; अज्जचारुदत्तस्स सआसादोवंभणोआअदो (१)।

वसं। अहो रमणीअदा अज्जदिवसस्स। ता हञ्जे, सादरं, बन्धुलेण समं, पवेसेहि णं (२)।

चेटी। जं अज्जआ आणवेदि (३)॥ इति निष्क्रान्ता विदूषकोबन्धुलेन सह प्रविष्टः॥

विदू। ही, ही भोः; तवचरणकिलेसविणिज्जिदेण रक्खस राआ रावणो पुप्फकेण विमाणेण गच्छदि; अहं उण बम्भणो अकिदतवचरणकिलेसोवि णअरणारीजणेण गच्छामि (४)।

चेटी। पेक्खदु अज्जो अम्हकेरके गेहदुआरं (५)।

---

(१) आर्य्ये, दिष्ट्या वर्द्धसे; आर्य्यचारुदत्तस्य सकाशात् ब्राह्मणआगतः।

(२) अहो रमणीयता अद्यदिवसस्य; तच्चेटि, सादरं, बन्धुलेन समं, प्रवेशय एनं।

(३) यदार्य्या आज्ञापयति।

(४) आश्चर्य्यं, भोः! तपश्चरणक्लेशविनिर्जितेन राक्षस राजोरावणः पुष्पकेण विमानेन गच्छति, अहं पुनर्ब्राह्मणः अकृततपश्चरणक्लेशोऽपि नगरनारीजनेन गच्छामि।

(५) प्रेक्षतां आर्य्यः अस्माकं कृतं गेहद्वारं।

Digitized by Google

विदू ॥ अवलोक्य, सविस्मयम् ॥ अहो! सलिलसिक्तमञ्जि दकिदहरिदोवलेवणस्स, विविहसुअंधकुसुमोवहारचित्तलि दभूमिआभाअस्स, गअणतलालोअणकोदूहलदुरुणामिद सीसस्स, दोलायमाणावलंबिदेरावणहत्थभमादद्दमल्लिआदा मगुणालंकिदस्स, समुड्डददंतिदंतनोरणावभासिदस्स, महार अणोवरागसोहिणा पवणवलंदोलणाखलंतचञ्चलग्गहत्थेण, दद्दोएहित्ति वाहरंतेण, विअ, मं सोहग्गपडाणिवहेणो वसोहिदस्स, तोरणधरणक्खंभवेदिआणिक्खित्तसमुल्लसन्त हरिदचूदपल्लवललामफलिहमंगलकलसाभिरामोहअवास स्स, महासुरक्खत्थलदुभेज्जवज्जणिरंतरपडिबद्धकणअक वाडस्स, दुग्गअजणमणोरहाआसअरस्स, वसंतसेणाभवण दुआरस्स, सस्सिरीअदा। जं सच्चं मज्जत्थस्स वि जणस्स वलाहिट्ठिं आआरेदि (१)।

---

(१) अहो; सलिलसिक्तमार्जितकृतहरितोपलेपनस्य, विविधसुगन्धकुसुमोपहारचित्रितभूमिकाभागस्य, गगणत लालोकनकौतूहलदूरोन्नमितग्रीवस्य, दोलायमानावलम्बितै रावणहस्तभ्रमायितमल्लिकादामगुणालङ्कृतस्य, समुच्छ्रित दन्तिदन्ततोरणावभासितस्य, महारजनीपरागोपशोभिना पवनबलान्दोलनास्खलच्चञ्चलाग्रहस्तेन, दृतएहीति व्याह रता, इव, मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरण धरणस्तम्भवेदिकानिःचिप्तसमुल्लसद्धरितचूतपल्लवललामस्य

चेटी। एदु, एदु, इमं पढमं पओट्ठं पविसदु अज्जो (१)।

विदू ॥ प्रविश्यावलोक्य च॥ ही, ही, भोः! दूधवि पढमे पओट्ठे, ससिसंखमुणालसच्छहाओ, विणिहिदचुण्णमुट्ठिपण्डु राओविविहरअणपडिबद्धकञ्चणसोवाणसोहिदाओ, पासाद पंतिओ, ओलंबिदमुत्तादामेहिं फलिहवादायणमुहअंदेहिं णिज्झाअंतीविअ उज्जदूणिं। सोत्तिओ विअ सुहोवविट्ठो णिद्दा अदि दोवारिओ। सदहिणा फलमोदएण पलोहिदाण भक्खंदि वाअसावलिं सुधासवण्णदाए। आदेसेदु भोदी (२)।

टिकमङ्गलकलसाभिरामोभयपार्श्वस्थ,महासुरवचःस्खलदुर्भेद्यवज्रनिरन्तरप्रतिबद्धकनककवाटस्य, दुर्गतजनमनोरथानाशकरस्य, वसन्तसेनाभवनद्वारस्य, सश्रीकता। यत्सत्यं मध्यस्थस्यापि जनस्य दृष्टिं आकारयति।

(१) एतु, एतु, इमं प्रथमं प्रकोष्ठं प्रविशतु आर्य्यः।

(२) अचापि प्रथमप्रकोष्ठे, अभ्रिशङ्खमृणालसच्छाया, विनिहितचूर्णमुष्टिपाण्डुराविविधरत्नप्रतिबद्धकाञ्चनसोपानशोभिताः प्रासादपङ्क्तयः, अवलम्बितमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निध्यायन्तीवोज्जयनीं। श्रोत्रियइव सुखोपविष्टोनिद्राति दौवारिकः। सदभ्रा फलमोदकेन प्रलोभितान भक्षयन्ति वायसावलिं सुधासवर्णतया। आदिशतु भवती।

Digitized by Google

चेटी। एदु, एदु, अज्जो; इमं दुदिअं पओट्ठं पविसदु अज्जो (१)।

विदू॥ प्रविश्यावलोक्य च॥ ही, ही, भोः! इध वि दुदियपओट्ठे, पज्जंतोवणीदजवसबुसकवलसुपुट्ठा तेल्लभंगिदविसाणबद्धा, पवहणवहला। अअं अण्णदरो अवमाणिदोविअ कुलिणोदीहं णीसवदि सेरिहो। इदो अ अवणीदजुज्झस्स मल्लस्स विअ महो अदि गीवा मेसस्स। इदोइदो अवराणं अस्साणं केसकप्पणा करीअदि। अअं अवरो पाडचरो विअ दढबद्धो मंदुराए साहामिअओ॥ अन्यऽतोवलोक्य॥ इदो अ कूरबुअ तेल्लमिस्सं पिंडं हत्थी पडिच्छावीअदि मेत्थपुरिसेहिं। आदेसेदु भोदी (२)।

चेटी। एदु, एदु, अज्जो; इमं तदिअं पओट्ठं पविसदु अज्जो (३)।

---

(१) एतु, एतु, आर्य्य; इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्य्यः।

(२) इहापि द्वितीयस्मिन् प्रकोष्ठे, पर्य्यन्तोपनीतयवस बुसकवलसुपुष्टा घृताभ्यक्तविषाणबद्धाः, प्रवहणबलीवर्द्दाः। अयमन्यतरोऽवमानितइव कुलीनो दीर्घं निःश्वसिति सैरिभः। इतश्च अपनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा मेषस्य। इतइतो ऽपरेषां अश्वानां केशकल्पना क्रियते। अयमपरः पाटचर इव दृढबद्धोमन्दुरायां शाखामृगः। इतश्च भक्तच्युतघृत मिश्रं पिण्डं हस्ती प्रतिगाह्यते हस्तिपकैः। आदिशतु भवती।

(३) एतु, एतु, आर्य्यः; इमं तृतीयं प्रकोष्ठं प्रविशत्वार्य्यः।

विदू ॥प्रविश्य दृष्ट्वा च॥ ही, ही, भोः! दूधवि तईए पओट्ठे दूमाइं दाव कुलउत्तजणोववेसणणिमित्तं विरइदाइं आसणाइं। अद्धवाचिदो पासअपीठे चिट्ठइ पोत्थओ। एदं अ मणिमअसारिआसहिदं पासअपीठं। दूमे अ अवरे सन्धिविग्गहचदुरा विविह वण्णिआविलित्तचित्तफलअअग्ग हत्थादोतदो परिभ्रमंति गणिआवुड्ढविडा। आदेसेदु भोदी (१)।

चेटी। एदु, एदु, अय्यो; दूमं चउत्थं पओट्ठं पविसदु अय्यो (२)।

विदू ॥ प्रविश्यावलोक्य च॥ ही, ही, भोः! दूधवि चउत्थे पओट्ठे जुवदिकरताडिदाजलधरा विअ गंभीरं णद्दंति मुरआ, झीणपुण्णाओविअ गअणादो तारआओ णिवडंति कंसतालआ, मउअरविरुअमउरं वज्जदि वंसो। दूअं अवरा ईसापण्ण

---

(१) दृष्ट्वापि तृतीयप्रकोष्ठे, दूमानि तावत्कुलपुत्र जनोपवेशननिमित्तं विरचितानि आसनानि। अर्द्धवाचितं मञ्चे तिष्ठति पुस्तकं। एतच्च मणिमयसारिकासहितपाशक पीठं। दूमे चापरे सन्धिविग्रहचतुराविविधवर्णिकाविलिप्त चित्रफलकाग्रहस्तादतस्ततः परिभ्रमन्ति गणिका वृद्धविटाः। आदिशतु भवती।

(२) एतु, एतु, आर्य्यः; दूमं चतुर्थं प्रकोष्ठं प्रविशत्वि त्यार्य्यः।

Digitized by Google

कुविदकामिणीविअ अंकारोविदा करहहपरिमासेण सारिअदि वीणा। इमाओ अंवराओ कुसुमरसमत्ताओ विअ मअ अरीओ अदिमअरअरं पगीदाओ गणिआदारिआओ णच्चीअदि, णट्टअं पढीअदि, सविंगारओ ओवाग्गदा। गवक्खेसु वादं गेण्हंति सलिलगग्गरीओ। आदिसेदु भोदी (१)।

चेटी। एदु, एदु, अय्यो; इमं पंचमं पओट्ठं पविसदु अय्यो (२)।

विदू ॥ प्रविश्य दृष्ट्वा च॥ ही, ही, भोः! इधवि पंचमे पओट्ठे अअं दलिद्दजणलोअप्पाद्दणकरो आहरद्द उवचिदो हिंगुतेलगन्धो। विविहसुरहिधूमुग्गरेहिं णिवसत्ताविज्जमाणि णीसदि विअ महानसं दुवारमुहेहिं। अधिअं जमु

---

(१) आश्चर्य्यं, भो! इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधराइव गम्भीरं नदन्ति मृदङ्गाः, क्षीणपुण्याइव गगणात्तारकानिपतन्ति कांस्यतालाः, मधुकरविरुतमधुरं वाद्यते वंशः। इयमपरा हर्षाप्रणयकुपितकामिनीव अङ्गारोपिता करहहपरिमर्शेन सार्य्यते वीणा। इमा अपराः कुसुमरसमत्ताइव मधुकर्य्योऽतिमधुरतरं प्रगीता गणिकादारिका नृत्यन्ते, नाट्यं पठ्यते, सशृङ्गाराः अपवल्गिताः। गवाक्षेषु वातं गृह्णन्ति सलिलगर्गर्य्यः। आदिशतु भवती।

(२) एतु, एतु, आर्य्यः; इमं पञ्चमं प्रकोष्ठं प्रविशार्य्यः।

सावेदिमं साहिज्जमाणवज्जविहभक्खभोअणगंधो। अअं अवरो पउत्थरं विअ पोट्टिं धोअदि रूपिदारिओ। वज्जविहा हारविआरं उवसाहेदि सूवआरो। वअंति मोदआ, पअंति च पूवआ॥ आत्मगतम्॥ अवि दाणिं दूह वट्टिअ भुजसुत्ति पादोदअं लहिस्सं॥ अन्यतोऽवलोक्य च॥ दूदो गंधव्व सुरअ णेहिं विअ विविहालंकारसोहिदेहिं गणिआजणेहिं बंधुलेहिं सअं सग्गीअदि एदं गेहं। भो, के तुम्हे बंधुला णाम (१)?

बंधुलाः। वयं खलु,

परगृहखचिताः, परान्नपुष्टाः,
परपुरुषैर्जनिताः परात्मनासु,
परधननिरतागुणेष्ववाच्या
गजकुलभादृव बंधुलाललामः।

---

(१) आश्चर्यं, भोः! दूरादपि पक्वमेव प्रकोष्ठे अयं दरिद्रजन खोभोत्पादनकरमाहरति उपचितोहिङ्गुतैलगन्धः। विविध सुरभिधूमोद्गारैर्नित्यसक्थ्यमानं निःश्वसितीव महानसं द्वार मुखैः। अधिकमुत्सुकायते मां साध्यमानवज्जविधभक्ष्यभोजन गन्धः। अयमपरोजीर्णवस्त्रमिव हतपशूदरपेशिं धावति रूपिदारकः। विविधाहारविकारमुपसाधयति सूपकारः। वध्यन्ते मोदकाः, पच्यन्ते च पूपकाः। अपीदानीमिह परि विष्टं भुञ्जः, इति पादोदकं लप्स्ये। दूरं गन्धर्वासुरोगणैरिव विविधालङ्कारशोभितैर्गणिकाजनैर्बन्धुलैश्च यत्सत्यं स्वर्गायते दूरं गेहं। भोः, के यूयं बन्धुलानाम?

Digitized by Google

विदू। आदेसेदु भोदी (१)।

चेटी। एदु, अज्जो; इमं छट्ठं पओट्ठं पविसदु अज्जो (२)।

विदू ॥ प्रविश्यावलोक्य च॥ ही, ही, भोः! इधवि छट्ठे पओट्ठे, अअं दाव सुवण्णरअणाणं कम्म तोरणाइं णीलरअण विणिम्मिआइं इंदाउहट्ठाणं विअ दरिसंति; वेरुलिअ, मोत्तिअ, पवालपुसराअ इंदणील कक्केतरअपदमराअमर गअ पज्जदिआइं रअणविसेसाइं, अण्णोण्णं विआरेंति सिप्पिणो। वज्झंति जादरूवेहिं, माणिक्कारं घडिज्जंति, सुवण्णालंकारा रत्तसुत्तेण गत्थीअंति मोत्तिआभरणाइं, घसीअंति धीरं वेडुरिआइं, छेदीअंति संखआ, साणिज्जंति पवालआ, सुक्ख विअंति अविदकुमपत्थरा। सालीअदि सेरलज्जअं, विस्साणी अदि चंदणरसो, संजोईअंति गंधजुत्तीओ। दीअदि गणिआ कामुकाणं सकप्पूरं तंबोलं, अवलोईअदि सकडक्खअं, पअट्टदि हासो, वीअदि अ अणवरअं ससिक्कारं मदरा। इमे चेडाओ, इमा चेडिआओ, इमे अवरे अवधीरिदपुत्त दारवित्तामणुस्सा आसवकरआ पीदमदिरेहिं गणिआजणेहिं जेमुका ते पिअंति। आदेसेदु भोदी (३)।

---

(१) आदिशतु भवती।

(२) एतु, एतु, आर्य्यः; इमं षष्ठं प्रकोष्ठं प्रविशत्वार्य्यः।

(३) आश्चर्य्यं, भो! इहापि षष्ठे प्रकोष्ठे अमूनि तावत्सु वर्णरत्नानां कर्म्म तोरणानि, नीलरत्नविनिर्मितानि, इन्द्रा युधस्थानमिव दर्शयन्ति, वैदूर्य्यमौक्तिकप्रवालकपुष्यराग

चेटी। एदु, एदु, अज्जो; इमं सत्तमं पओट्ठं पविसदु अज्जो (१)।

विदू ॥ प्रविश्यावलोक्य च॥ ही, ही, भोः; दूधवि सत्तमे पओट्ठे, सुसिलिट्ठविहंगवाडीसुहणिसण्णाइं, अलोणचुंवणप रादं सुहमणुभवंतिपारावदमिहुणाइं, दहिभत्तपूरिदोदरो बंभणोविअ सुत्तं पढदि पंजरसुओ। इअं अवरा, सामिसंमाण णालद्धपसरोविअ घरदासी अधिअं कुरुकुराअदि मदणसा रिआ, अलेअप्फलरसासादपटुइकंठा कुंभदासीविअ कूअदि

इन्द्रनीलकर्केतरकपद्मरागमरकतप्रभृतीन् रत्नविशेषान् अन्योन्यं विचारयन्ति गिल्पिनः। बध्यन्ते जातरूपैर्माणिक्यानि। घट्यन्ते सुवर्णालङ्कारारक्तसूत्रेण। ग्रथ्यन्ते मौक्तिकाभरणानि। घृष्यन्ते धीरं वैदूर्य्याः। छिद्यन्ते शङ्खाः। प्राणघर्षणेन निर्म्मायन्ते प्रवालकाः। शोध्यन्ते आर्द्रकुसुमप्रसराः। सार्य्यते कस्तूरिका। विशेषेण घृष्यते चन्दनरसः। संयोज्यन्ते गन्धयुक्तयः। दीयते गणिका कामुकयोः सकर्पूरं ताम्बूलं। अवलोक्यते सकटाक्षं। प्रवर्त्तते हासः। पीयते चामवरतं सशीत्कारं मदिरा। इमे चेटाः, इमाश्चेटिकाः, इमे अपरे अवधीरितपुत्रदारवित्तामनुष्याः, आसवकरकापीतमदिरै र्गणिकाजनैर्यै मुक्तास्ते पिबन्ति आदिशतु भवती।

(१) एतु, एतु, आर्य्यः; इमं सप्तमं प्रकोष्ठं प्रविशत्वार्य्यः।

परउट्ठा, आसंविदा णागदंतेसु पंजरपरंपराओ, जोधीअंति लावआ, आसविअंति पंजरकविंजरकवोदाः। इदो विविह मणिवित्तलिदोविअ अअं सहरिसंणच्चंतो रविकिरणसंतत्तं पक्खक्खेवेहिं विधुवेदिविअ पासादं घरमोरो ॥ अन्यतोऽव लोक्य ॥ इदो पींण्डीकिदा विअ चंदपादा पदगहिंसिक्खंता विअ कामिणीणं पत्तादो परिभ्भमंति राअहंसमिहुणा। एदे अवरे वुडमहल्लका विअ इदोतदो संचरंति घरसारसा। ही ही भोः; पसारअं किदं गणिआए णाणपक्खिसमूहेहिं। जं सचं खु णंदणवणं विअ मे गणिआघरं पडिभासदि। आदेसेदु भोदी (१)।

---

(१) इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहङ्गवाटीसुख निषण्णानि, अन्योन्यचुम्बनपराणि सुखमनुभवन्ति पारावत मिथुनानि। दधिभक्तपूरितोदरब्राह्मणइव सूक्तं पठति पञ्जरशुकः। दूयमपरा स्वामिसंमाननालब्धप्रसरादव गृह दासी अधिकं कुरकुरायते मदनसारिका। अनेकफलरसा स्वादप्रतुष्टकण्ठाकुम्भदासीव कूजितपरपुष्टा। आसम्बिता नागदन्तेषु पञ्जरपरम्पराः, योध्यन्ते लावकाः; आसा प्यन्ते पञ्जरकपोताः। इतस्ततोविविधमणिविचित्रितइवार्थं सहचरीसहितः संहर्षेण नृत्यन् रविकिरणसंतप्तं पक्षोत्क्षेपै र्विधुवतिइव प्रासादं गृहमयूरः। इतः पिण्डीकृताइव चन्द्र

चेटी। एदु अज्जो; इमं अट्ठमं पओट्ठं पविसदु अज्जो (१)।

विदू ॥ प्रविश्यावलोक्य च ॥ भोदि; को एसो पट्टपावार अपाउदो अधिअदरं अच्चब्भुदपुणरुत्तालङ्कारालंकिदो अंग भंगेहिं परिक्खलंतो इदोतदो परिब्भमदि (२)।

चेटी। अज्ज, एसो अज्जआए अअं भादा भोदि (३)।

विदू। केत्तिअं तवचरणं कदुअ वसंतसेणाए भादा भोदि। अधवा। मा दाव; जदिवि एसो उज्जलोसिणिद्धोअ सुअंधोअ तहवि पमसाणवीधीए जादो विअ चंपअरुक्खो, अणहिगमणीओ लोअस्स ॥ अन्यतोऽवलोक्य ॥ भोदि, एसा उण का फुल्लपावारअ पाउदा, उवाणहजुअलणिक्खित्तेहिं चिक्कणेहिं पादेहिं, उच्चासणे उवविट्ठा चिट्ठदि (४)।

पादाः पदगतिं श्रिचन्तीव कामिनीनां। पश्चात्परिभ्रमन्ति राजहंसमिथुनानि। एते अपरे वृद्धश्रेष्ठादव इतस्ततः संचरन्ति गृहसारसाः। आश्चर्यं भोः! प्रसारणं कृतं गणिकायानापत्तिसमूहैः। यत्सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते आदिश्यतु भवती।

(१) एलार्य्यः, इममष्टमं प्रकोष्ठं प्रविशत्वार्य्यः।

(२) हे कथं पट्टप्रावारकप्रावृतोऽधिकतरं अत्यद्भुत पुनरुक्तालङ्कारालङ्कृतः अङ्गभङ्गैः परिस्खलन् इतस्ततः परिभ्रमति।

(३) आर्य्य, एष आर्य्यायाश्चयं भ्राता भवति।

(४) कियत्तपश्चरणं कृत्वा वसन्तसेनायाभ्राता भवति।

Digitized by Google

चेटी। अज्ज, एसा खु अम्हाणं अज्जआए अत्तिआ (१)।

विदू। अहो, से करट्ठहारूणीए पोट्ठवित्थारो; ता किं, एदं पवेसिअ महादेवं विअ दुआरसोहा दूढ घरे णिम्मिदा (२)।

चेटी। हदास मा एवं उवहस अम्हाणं अत्तिअं। एसा खु चाउत्थिएण पीडीअदि (३)।

विदू ॥ सपरिहासं॥ भअवं चाउत्थिअ एदिणा उव आरेण मंपि बम्हणं आलोएहि (४)।

चेटी। हदास, मरिस्सदि (५)।

अथवा मा तावत्; यद्यपि एषउज्ज्वलः स्निग्धश्च सुगन्धश्च तथापि अस्नानवीथ्यां जातत्वं चम्पकवृक्षः अनभिगमनीयो लोकस्य। भो, एषा पनः का, पुष्पप्रावारकप्रावृता उपानद्गलनिक्षिप्ततैलक्लिक्कणैः पादैः उच्चासनोपविष्टा तिष्ठति।

(१) आर्य्य, एषा खल्वस्माकं आर्य्यायामाता।

(२) अहो अस्नानपविच्छाकिन्याउदरविस्तारः तत्किमेतां प्रविश्य महादेवमिव द्वारशोभा दृढ गृहे निर्मिता।

(३) हताश; मैवमुपहसास्माकं मातरं। एषा खलु चातुर्थिकेन पीड्यते।

(४) भगवन्, चातुर्थिक एतेनोपचारेण मामपि ब्राह्मणं आलोकय।

(५) हताश, मरिष्यसि।

Digitized by Google

विदू ॥ सपरिहासं ॥ दासीए धीए, वरं दूदिसोसूणपीण जठरोमुद्दोजेव्व, सीधुसुरासवमत्तिआ एआवत्थं गदा हि मत्तिआ जइ मरदि, एत्थ अत्तिआ भोदि सिआलसहस्सजत्तिआ। भोदि किं तुम्हाणं जानवत्ता वहन्ति (१)।

चेटी। अज्ज; णहि, णहि (२)।

विदू। किं वा एत्थ पुछीअदि, तुम्हाणं खु पेमणिम्मलजले, मअणसमुद्दे, त्थणणीअं वजहणाएव जाणवत्तामणहरणा। एवं वसंतसेणाए वऊबुत्तंतं, अट्ठपओट्ठभवणं पेक्खिअ, जं सच्चं जाणामि, एकत्थं विअ तविट्ठअं दिट्ठं, पसंसिदूं णत्थि मे वाआ विहवो। किं दाव, गणिआघरो, आदु कुवेरभवणपरिच्छेदोत्ति। कहिं तुम्हाणं अज्जआ (३)।

---

(१) दास्याः पुत्रि; वरं दूदृशः स्थूलपीनजठरोमृतएव सीधुसुरासवमत्ता एतादृशीमवस्थां गता हि अतिवृद्धा यदि म्रियते, अत्र माता भवति शृगालसहस्रयात्रा। हे भवति किं युष्माकं यानपात्राणि वहन्ति।

(२) आर्य्य; नहि, नहि।

(३) किं वा अत्र पृच्छ्यते युष्माकं खलु प्रेमनिर्म्मलजले मदनसमुद्रे स्तनजितम्बजघनान्येव यानपात्राणि मनोहराणि। एवं वसन्तसेनायावद्वृत्तान्तं, अष्टप्रकोष्ठं भवनं प्रेक्ष्य, यत्सत्यं जानामि एकस्मिंव त्रिपिष्टपं दृष्टं प्रशंसितुं नास्ति मे वाचा विभवः। किं तावत् गणिकागृहं, अथवा कुवेरभवनपरिच्छेद इति। कुत्र युष्माकमार्य्या।

Digitized by Google

चेटी। अज्ज, एसा रुक्खवाडिआए चिट्ठदि, ता पविसदु अज्जो (१)

विदू ॥प्रविश्य दृष्ट्वा च॥ ही, ही, भोः! अहो रुक्खवाडिआए सस्सिरिअदा, अङ्कुरीअकुसुमा जत्थ रोविदाणेअवा दवा णिरंतरपादवतलणिम्मिदा, जुवतिजणजहणपमाणा, पट्टदोला, सुवण्णजूहिआ सेहालिआ मालदी मल्लिआ णोमालिआ कुरवआअदिमोत्तअप्पऊदिकुसुमेहिं, सअं णिवडिदेहिं, जं सचं लङ्घ करेदि विअ णंदणवणस्सु सस्सिरीअदं। ॥अन्यतोऽवलोक्य॥ दूदोअ उदअंतसूरसमप्पहेहिं, कमलरत्तोप्पलेहिं संणाअदि विअ दिहिआ। अविअ एसो असोअवुक्खो णवणिग्गअकुसुमपल्लवो भादि, सुहडोव्व समरमज्झे घणलोहिदपंकचच्चिक्को। भोदु; ता कहिं तुह्माणं अज्जआ(२)।

---

(१) आर्य्य, एषा वृक्षवाटिकायां तिष्ठति; तस्मात् प्रविशत्वार्य्यः।

(२) आश्चर्य्यं, भोः! अहोवृक्षवाटिकायाः सश्रीकता अङ्कुरीतिकुसुमायच रोपिताअनेकपादपाः निरन्तरपादपतलनिर्म्मिता, युवतिजनजघनप्रमाणा, पट्टदोला सुवर्णयूथिका शेफालिका मालती मल्लिका नवमल्लिका कुरुवकातिमुक्तकप्रभृतिकुसुमैः, स्वयं निपतितैर्यत्सत्यं लघूकरोतीव नन्दनवनस्य सश्रीकतां। दूतस्य, उदयत्सूर्य्यसमप्रभैःकमलरक्तो

चेटी। अज्ज, ओणमेहि दिट्ठिअं, पेक्ख अज्जअं (१)।

विदू ॥ दृष्ट्वा उपसृत्य॥ सोत्थि भोदीए (२)।

वसं। अये मैत्रेय ॥ उत्थाय॥ स्वागतमिदमासनमत्रो पविश्यताम्।

विदू। उवविसदु भोदी (३) ॥ उभावुपविशतः॥

वसं। अयि, कुशलं सार्थवाहपुत्रस्य।

विदू। भोदि कुसलं (४)।

वसं। आर्य्य मैत्रेय, अपीदानीम्।

गुणप्रवालं विनयप्रशाखं विस्रंभमूलं महनीयपुष्पं,
तं साधुवृत्तं स्वगुणैः फलाढ्यं, सुहृद्द्विषश्छायाः सुखमाश्रयन्ति।

विदू ॥ स्वगतं॥ उवलक्खिदं दुट्ठविलासिणीए ॥ प्रकाशं॥ अधदं (५)।

वसं। अये, किमागमनप्रयोजनं।

त्यक्तैः संधायते इव दीर्घिका। अपिच। एष अनेकवृक्षोनव निर्गतकुसुमपल्लवोभाति, सुभटइव समरमध्ये घनशोणित पङ्कचर्चिकः। तत्कुच युष्माकमार्य्या।

(१) आर्य्य, अवनमय दृष्टिं, पश्यार्य्यां।

(२) स्वस्ति भवत्यै।

(३) उपविशतु भवती।

(४) हे कुशलं।

(५) उपलक्षितं दुष्टविलासिन्या। अथकिं।

Digitized by Google

विदू। सुणादु भोदी। तच्चभवं चारुदत्तो सीसे अंजलिं कदुअ भोदिं विण्णवेदि (१)।

वसं ॥ अंजलिं बद्धा ॥ किमाज्ञापयति।

विदू। मए तं सुवण्णभंडअं विस्संभादो अत्त ण के रक्केत्ति कदुअ, जूदे हारिदं, सो अ सब्भिओ राआवत्थआरी ण आणी, अदि कहिं गदो त्ति (२)।

चेटी। अज्जए, दिट्ठिआ वड्ढसि; अज्जो जूदिअरो संवुत्तो (३)।

वसं ॥ स्वगतं ॥ कधं, चोरेण अवहदं सोंडोरदाए जूदे हारिदोत्ति भणादि; अदो जेव्व कामीअदि (४))।

विदू। ता, तस्स कारणादो गेहदु भोदी इमं रअणावलिं (५)।

---

(१) शृणोतु भवती। तत्रभवान् चारुदत्तः शीर्षे अञ्जलिं कृत्वा आर्यां विज्ञापयति।

(२) मया तत्सुवर्णभाण्डं विस्रम्भादात्मनः क्षते, इति कृत्वा, द्यूते हारितं, सच सभिको राजावश्यकारी, न ज्ञायते क्वच गतइति।

(३) आर्य्ये, दिष्ट्या वर्द्धसे; आर्य्योद्यूतकरः संवृत्तः।

(४) कथं, चौरेणापहृतं शौण्डीरतया द्यूते हारितं इति भणति; अतएव काम्यते।

(५) तत्तस्य कारणात् गृह्णातु भवती इमां रत्नावलीं।

वसं ॥ आत्मगतं ॥ किं दंसेमि तं अलंकारअं ॥ विचिन्त्य ॥ अधवा ण दाव (१)।

विदू। किं दाव ण गेण्हदि भोदी एदं रअणावलिं (२)।

वसं ॥ विहस्य सखीमुखं पश्यन्ती॥ मित्तेअ, कधं ण गेण्हिस्सं रअणावलिं ॥ इति गृहीत्वा पार्श्वे स्थापयति; स्वगतं॥ कधं क्षीणकुसुमादो वि सहआरपादवादो मअरंदविंदओ णिवडंति ॥ प्रकाशं॥ अज्ज, विण्णवेमि तं जूदिअरं मम वअणेण अज्जचारुदत्तं; अहं वि पदोसे अज्जं पेक्खिदुं आगमिस्सामित्ति (३)।

विदू ॥ स्वगतं॥ किं, अअं तहिं गदुअ गेण्हिस्सदि ॥ प्रकाशं॥ भोदि, भणामि ॥ स्वगतं॥ णीअत्तीअदु दूमादो गणिआपसंगादोत्ति (४) ॥ इति निष्क्रान्तः ॥

---

(१) किं, दर्शयामि तमलङ्कारं। अथवा न तावत्।

(२) किं तावत् न गृह्णाति भवती द्रमां रत्नावलीं।

(३) मैत्रेय, कथं न ग्रहीष्यामि रत्नावलीं। कथं, क्षीनकुसुमादपि सहकारपादपात्मकरन्दविन्दवोनिपतन्ति। आर्य्य, विज्ञापयसि तं द्यूतकरं मम वचनेनार्य्यचारुदत्तं। अहमपि प्रदोषे आर्य्यं प्रेक्षितुं आगमिष्यामि।

(४) किमन्यत्तत्र गत्वा ग्रहीष्यति। हे भवति, भणामि। निवर्त्ततामस्मात् गणिकाप्रसङ्गादिति।

Digitized by Google

वसं। हंजे, गेह्ण एदं अलंकारअं; चारुदत्तं अहिरमिदुं गच्छ्ह (१)।

चेटी। अज्जए, पेक्ख, पेक्ख; उण्हमदिअकालदुद्दिणं (२)।

वसं। उदयंतु नाम मेघा, भवतु निशा, वर्षमविरतं पततु,
गणयामि नैव सर्व्वं, दयिताभिमुखेन हृदयेन।

हंजे हारं गेह्णिअ लहुं आअच्छ (३)॥ इति निष्क्रान्ताः सर्व्वे॥

मदनिकाग्रर्विलकश्चतुर्थोऽङ्कः।

---

(१) चेटि, गृहाणैतं अलङ्कारं, चारुदत्तमभिरन्तुं गच्छामः।

(२) आर्य्ये, पश्य, पश्य; उन्नमत्यकालदुर्दिनमिति।

(३) चेटि, हारं गृहीत्वा शीघ्रमागच्छ।

Digitized by Google

अथ पञ्चमोऽङ्कः।

ततः प्रविशति आसनस्थः सोत्कण्ठस्वारदत्तः।

चारु॥ ऊर्द्धमवलोक्य॥ उन्नमत्यकालदुर्दिनम्। यदेतत्।

आलोकितं गृहशिखण्डिभिरुत्कलापै,
र्हंसैर्विधायसुभिरर्पालतमुन्मनस्कैः,
आकालिकं सपदि दुर्दिनमन्तरीक्ष
मुत्कण्ठितस्य हृदयं च समं रुणद्धि।

अपिच। मेघोज्ज्वलार्द्रमहिषोदरभङ्गनीलो,
विद्युत्प्रभारचितपीतपटोत्तरीयः,
आभाति संहतबलाकगृहीतशृंङ्गः,
खड्गेग्रवोऽपरदवाक्रमितुं प्रवृत्तः।

अपिच।

केशवगात्रश्यामः, कुटिलबलाकावलीरचितशृङ्गः,
विद्युद्गुणकोटेयश्चक्रधरद्वोन्नतोमेघः।
एतानिषिक्तरजतद्रवसंनिकाशा
धारा जवेन पतिताजलदोदरेभ्यः,
विद्युत्प्रदीपशिखया क्षणनष्टदृष्टा
श्छिन्नाद्वाम्बरपटस्य दशाः पतन्ति।

Digitized by Google

संसक्तैरिव चक्रवाकमिथुनैर्हंसैः प्रडीनैरिव,
व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोच्छ्रितैः,
तैस्तैराकृतिविस्तरैरनुगतैर्मेघैः समभ्युन्नतैः,
पचक्रेद्यमिवेह भाति गगणं, विस्रंसितैर्वायुना।
एतत्तद्भुतराङ्कचक्रसदृशं मेघान्धकारं नभो
दृष्टेा गर्जति, चातिदर्पितबलेादुर्य्योधनेावा ग्निखी;
अक्षद्यूतजितेायुधिष्ठिरदुवारण्यं गतः कोकिलो,
हंसाः, संप्रति पाण्डवाइव, वनादज्ञातचर्य्यं गताः।

॥ विचिंत्य॥ चिरः खलु कालोमैत्रेयस्य वसन्तसेनायाः सकाशं गतस्य नाद्यापागच्छति।

॥ प्रविश्य विदूषकः॥ अहो गणिआए लोभोअ, दक्खिण्णदाअ, जदो न कधा कदा अम्हा, अणाअरेण जेव्व अभणिअ, किं वि एअमेअ गहिदा रअणावली। एत्तिआए ऋद्धीए ण तए अहं भणिदो, अज्ज मित्तेअ वीसमीअदु मज्जकेण, पाणीअं पिविअ गच्छीअदु त्ति। ता मादावदासीए धीआए गणिआए। सुट्ठु खु वुच्चदि; अकंदसमुत्थिदा पदुमिणी, अवंचओ वाणिओ, अचोरो सुवण्णआरो, अकलहोगामसमागमो, अलुद्धा गणिअत्ति, दुक्करं एदे संभावीअंति। ता पिअवअस्सं गदुअ, दुमादो गणिआपसंगादोणिवत्तावेमि ॥ परिक्रम्य दृष्ट्वा॥ कधं, पिअवअस्सो रुक्खवाडिआए उववित्तो चिट्ठदि; ता जाव, उवसप्पामि॥ उपसृत्य॥ सोत्थि भोदे, वड्ढदु भवं (१)।

---

(१) अहोगणिकायालोभः अनुदारता च; यतोम कथा

Digitized by Google

चारु ॥ विलोक्य ॥ अये सुहृन्मे मैत्रेयः प्राप्तः। वयस्य स्वागतमास्यताम्।

विदू। उवविट्ठम्हि (१)।

चारु। वयस्य, कथयत कार्य्यं।

विदू। तं खु कज्जं विणट्ठं (२)।

चारु। किं तया न गृहीता रत्नावली।

विदू। कुदो अम्हाणं एत्तिअं भाअधेअं; णवणलिणकोमलं अञ्जलिं मत्थए कदुअ पडिच्छिआ (३)।

चारु। तत्किं ब्रवीषि नष्टमिति।

क्षता अन्या अनादरेणैव अर्पणिका किमपि एवमेव गृहीता रत्नावली। एतावत्या श्रद्धा; न तया अहमर्पितः आर्य्य मैत्रेय, विश्राम्यतु मस्तकेन, पानीयं पीत्वा गम्यतामिति, तत् मा तावत् दास्याः पुत्र्यागणिकायाः। सुष्ठु खलु उचिता, अकन्द समुत्थिता पद्मिनी, अवञ्चकोवणिक्, अचौरः सुवर्णकारः, अकलहोग्रामसमागमः, अलुब्धा गणिकेति दुष्करं एते समाप्यन्ते। तत् प्रियवयस्यं गत्वा, अस्मात् गणिकाप्रसङ्गात् निवर्त्तयामि। अयं प्रियवयस्योवृक्षवाटिकायामुपविष्ट स्तिष्ठति, तत् यावदुपसर्पामि; स्वस्ति भवते, वर्द्धतां भवान्।

(१) उपविष्टोऽस्मि।

(२) तत्खलु कार्य्यं विनष्टं।

(३) कुतोऽस्माकमेतावद्भागधेयं, यत् नवनलिनकोमलं अञ्जलिं मस्तके कृत्वा प्रतिगृहीता।

Digitized by Google

विदू। भो, कधं ण विणट्ठं, जं अभुत्तपीदस्स, चोरेहिं अवहदस्स, अप्पमुल्लस्स सुवण्णभंडअस्स कारणादो, चदुस्समुद्द सारभूदा रअणमाला हारिदा (१)।

चारु। वयस्य मा मैवं।

यं समालम्ब्य विश्वासं न्यासेऽस्मासु तया कृतः,
तस्यैतन्महतोमूल्यं प्रत्ययस्यैव दीयते।

विदू। भो, वअस्स; एदं पि मे दुदिअं संतावकारणं; जं सहीअणदिण्णसंणाए पडंतावावारिदं मुहं कदुअ, अहं उवहसिदो। ता अहं बंभणो भविअ दाणिं भवन्तं सीसेण पडिअ विण्णवेमि। णिवत्तीअदु अप्पा दूमादो वञ्चणवावारा गणिआ पसंगादो। गणिआ णाम पादुअंतरप्पविट्ठा विअ लेट्ठुआ दुःखेण उण णिराकरीअदि। अविअ, भो वअस्स, गणिआ, हत्थी, काअट्ठओ, भिक्खु, चाटो, रासहो अ, जहिं एदे णिवसंति तहिं दुट्ठावि ण जाअंति (२)?

---

(१) भो, कथं न विनष्टं, यत् अभुक्तपीतस्य, चौरैरपहृतस्य, अप्रमूल्यस्य सुवर्णभाण्डस्य कारणात्, चतुःसमुद्रसारभूता रत्नमाला हारिता।

(२) भो, वयस्य; एतदपि मे द्वितीयं सन्तापकारणं; यत् सखीजनदत्तसंज्ञया पटान्तापवारितं मुखं कृत्वा, अहमुप

चारु। वयस्य, अलमिदानीं सर्व्वं परिवादमुक्त्वा। अवस्थ वैवास्मि निवारितः। पश्य।

वेगं करोति तुरगस्खरितं प्रयातुं,
प्राणव्ययान्न चरणास्तु तथा वहन्ति;
सर्व्वत्र यान्ति पुरुषस्य चलाः स्वभावाः,
खिन्नास्ततो हृदयमेव पुनर्विशन्ति।

अपिच। वयस्य।

यस्यार्थास्तस्य सा कान्ता, धनहार्य्योह्यसौ जनः।

॥ स्वगतं ॥ न; गुणहार्य्योह्यसौ जनः ॥ प्रकाशम् ॥

वयमर्थैः परित्यक्ता, ननु त्यक्तैव सा मया।

विदू॥ अधोऽवलोक्य स्वगतम्॥ जधा, एसो उद्धं पेक्खिअ, दीहं णिस्सरदि; तधा तक्केमि मए विणिवारिअंतस्स अधिअदरं वड्ढिदा से उक्कंठा; ता, सुट्ठु खु एवं वुच्चदि, वामो कामोत्ति ॥ प्रकाशं॥ भो वअस्स, भणिदं च ताए, भणेहि

स्थितः। तदहं ब्राह्मणीभूत्वा, इदानीं भवन्तं ग्रीवेण पतित्वा, विज्ञापयामि। निवर्त्यतामात्मा अस्मादङ्गप्रत्यवायात् गणिकाप्रसङ्गात्। गणिका, नाम, पादुकान्तरप्रविष्टादव शर्करा, दुःखेन पुनर्निराक्रियते। अपिच, अहो वयस्य, गणिका, हस्ती, कायस्थो, भिक्षुः, चाटो, राजभस्य, यत्र एते निवसन्ति, तत्र दुष्टा अपि न जायन्ते? अपितु जायन्ते एव।

Digitized by Google

चारुदत्तं, अज्ज पओसे मए एत्थ आगंतव्वं त्ति। ता तक्केमि रअणावलीए अपरितुट्ठा अपरं मग्गिदुं आअमिस्सदि त्ति(१)।

चारु। वयस्स, आगच्छतु, परितुष्टा यास्यति।

चेटः ॥ प्रविश्य ॥ अवेध माणहे।

जधा जधा वस्सदि अभ्भखण्डे, तधातधा तिम्मदि पुट्ठिचम्मे।
जधा जधा लग्गदि शीदवादे, तधा तधा वेवदि मे हलक्के (२)

॥ प्रहस्य ॥

वंशं वाए यत्तछिदं सुसद्दं, वोणं वाए यत्ततन्तिं णदन्तिं;
गीअं गाए गद्दहस्साणुरूवं को मे गाणे तुंबरू णारदेवा।
अणत्तह्मि अज्जआए वसन्तसेणाए, कुंभीलआ गच्छ तुमं,

---

(१) यथा एष जर्द्धं प्रेक्ष्य दीर्घं निःश्वसति; तथा तर्कयामि मया निवार्य्यमाणस्य अधिकतरं वृद्धा श्रद्धोत्कण्ठा; तत् सुष्ठु खल्वेवमुच्यते, कामोवामदृति। भो वयस्य, भणितश्च तया, भण चारुदत्तं, अद्य प्रदोषे मया अत्र आगन्तव्यमिति। तत्तर्कयामि रत्नावल्या अपरितुष्टा अपरं याचितुं आगमिष्यतीति।

(२) अवेत मानवाः।

यथा यथा वर्षति अभ्रखण्डं, तथा तथार्द्रीभवति पृष्ठचर्म;
यथा यथा लगति शीतवातः, तथा तथा वेपते मे हृदयं।

Digitized by Google

ममागमणं अज्जचारुदत्तस्स णिवेदेहि त्ति; ता जावअज्ज चारुदत्तस्स गेहं गच्छामि ॥ परिक्रम्य प्रविष्टकेन ॥ हद्धा ॥ एसे चारुदत्ते वुक्खवाडिआए चिट्ठदि। एसेवि से दुट्ठ वडुके; ता जाव उवसप्पामि। कधं, ढक्किदे दुवारे वुक्खवाडि आए? भोदु, एदस्स दुट्ठवडुकस्स संघं देमि (१)॥ इति लोष्ट गुटिकाः क्षिपति ॥

विदू। अए, को दाणिं एसो पाआरवेट्ठिदं विअ कदत्थं मं लोट्ठकेहिं ताडेदि (२)।

चारु। आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पातितं भवेत्।

---

(१) वंशं वादयामि सप्तछिद्रं सुशब्दं,
वीणां वादयामि सप्ततन्त्रीं नदन्तीं,
गीतं गायामि गर्द्दभस्यानुरूपं,
कोमे गाणे तुम्बुरुर्नारदोवा।

आज्ञप्तोऽस्मि आर्य्यया वसन्तसेनया, कुभीलक, गच्छ त्वं ममा गमनं आर्य्यचारुदत्तस्य निवेदयेति; तद्यावत् आर्य्यचारुदत्त स्य गेहं गच्छामि। एष, चारुदत्तो वृक्षवाटिकायां तिष्ठति; एषोऽपि सदुष्टवटुकः; तद्यावदुपसर्पामि। कथमाक्षादितं द्वारं वृक्षवाटिकायाः? भवतु, एतस्य दुष्टवटुकस्य संज्ञां ददामि।

(२) अये कदर्थितमिव कपित्थं, मां लोष्टकैराडयति।

विदू। दासीए उत्त, दुट्ठपारावअ, चिट्ठ, चिट्ठ; जाव एदिणा दंडअट्ठेण, सुपक्कं विअ चूअफलं, इमादो पासादादो भूमीए पाडइस्सं (१) ॥ इति दण्डकाष्ठमुद्यम्य धावति ॥

चारु ॥ यज्ञोपवीते आकृष्य ॥ वयस्य, उपविश; किमनेन; तिष्ठतु दयितासहितस्तपस्वी पारावतः।

चेटः। कधं, पारावदं पश्यदि, मं ण पेक्खदि। भोदु, अवराए लोट्ठगुडिआए पुणोवि ताडइस्सं (२) ॥ तथा करोति॥

विदू ॥ दिशोऽवलोक्य॥ कधं, कुम्भीलओ! ता जाव उवसप्पामि ॥ उपसृत्य ॥ द्वारमुद्घाट्य ॥ अरे, कुम्भीलआ, पविस, खामदन्ते (३)

चेटः ॥ प्रविश्य ॥ अज्ज, वंदामि (४)।

विदू। अरे कहिं तुमं ईदिसे दुद्दिणे अंधआरे आअदो(५)।

---

(१) दास्याःपुत्र, दुष्टपारावत, तिष्ठ, तिष्ठ; यावदेतेन दण्डकाष्ठेन, सुपक्कमिव चूतफलं, अस्मात् प्रासादात् भूमौ पातयिष्यामि।

(२) कथं, पारावतं पश्यति, मां न प्रेक्षते। भवतु, अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि।

(३) कथं, कुम्भीलक! तत् यावदुपसर्पामि; अरे कुम्भीलक, प्रविश, क्षामतन्ते।

(४) आर्य्य, वन्दे।

(५) अरे, कुत्र त्वं ईदृशे दुर्दिने अन्धकारे आगतः।

Digitized by Google

चेटः। अले, एसा मा (१)।

विदू। का एसा का (२)।

चेटः। एसा मा (३)।

विदू। किं दाणिं दासीए उत्ता, दुब्भिक्खकाले वुड्ढरंको विअ, उड्ढकं सासाअसि एसा मा सेति (४)।

चेटः। अले, तुमं पि दाणिं इंदमहकामुको विअ, सुट्ठु किं काकाअसि, काके त्ति (५)।

विदू। ता कहेहि (६)।

चेटः ॥ स्वगतं ॥ भोदु, एवं भणिस्सं ॥ प्रकाशं ॥ अले, पअं दे दाइस्सं (७)।

विदू। अहं, ते मुंडे गोडं दाइस्सं (८)।

---

(१) अरे, एषा सा।

(२) का एषा का।

(३) एषा सा।

(४) किमिदानीं दास्याः पुत्र, दुर्भिक्षकाले वृद्धरङ्कइव ऊर्द्धकं श्वासायसे एषा सा सेति।

(५) अरे, त्वमपि इदानीं इन्द्रमहकामुकइव सुष्ठु किं काकायसे काकेति।

(६) तत् कथय।

(७) भवतु, एवं भणिष्यामि। अरे, प्रश्नं ते दास्यामि।

(८) अहन्ते मस्तके पादं दास्यामि।

Digitized by Google

चेटः। अले, जाणाहि दाव तेण हि कस्सिं काले चूआ मौलेन्ति (१)।

विदू। अरे, दासीए उत्ता, निल्लो (२)।

चेटः ॥ सहासं॥ अले, णहि णहि (३)।

विदू ॥ स्वगतं॥ किं दाणिं एत्थ कहिस्सं ॥ विचिन्त्य॥ भोदु, चारुदत्तं गदुअ पुच्छिस्सं ॥ प्रकाशं॥ अरे, मुहुत्तअं चिट्ठ ॥ चारुदत्तमुपसृत्य॥ भो वअस्स, पुच्छिस्सं दाव, कस्सिं काले चूआ मौलेन्ति (४)।

चारु। मूर्ख, वसन्ते।

विदू ॥ चेटमुपगम्य॥ मुक्ख, वसंते (५)।

चेटः। दुदिअं दे पण्हं दस्सं। सुसमिद्धाणं गामाणं को रक्खअं करेदि (६)।

---

(१) अरे, जानीहि तावत् तेन हि कस्मिन्काले चूताः मुकुलवन्तोभवन्ति।

(२) अरे, दास्याः पुत्र, ग्रीष्मे।

(३) अरे, नहि नहि।

(४) किमिदानीमत्र कथयिष्यामि। भवतु, चारुदत्तं गत्वा प्रच्छामि। अरे मुहूर्त्तकं तिष्ठ। भो वयस्य, प्रच्छामि तावत्, कस्मिन् काले चूताउन्मुकुलाभवन्ति।

(५) मूर्ख, वसन्ते।

(६) द्वितीयन्ते प्रश्नं दास्यामि। सुसमृद्धानां ग्रामाणां कोरक्षां करोति।

Digitized by Google

विदू। अरे, रक्ख (१)।

चेटः ॥ सहासं ॥ अरे, णहि णहि (२)।

विदू। भोदु, संसए पडिदम्हि ॥ विचिन्त्य ॥ भोदु, चारुदत्तं पुणोवि पुच्छिस्सं (३) ॥ पुनर्निवृत्य चारुदत्तं तथैवोदाहरति ॥

चारु। वयस्य, सेना।

विदू ॥ चेटमुपगम्य ॥ अरे, दासीए पुत्ता, सेणा (४)।

चेटः। दुवेवि एक्कम्हि कदुअ, सिग्घं भणाहि (५)।

विदू। सेनावसन्ते।

चेटः। णं, पडिअत्तिअ, भणाहि (६)।

विदू ॥ कायेन परिवृत्य ॥ सेणावसन्ते (७)।

चेटः। अले, मुक्ख वडुअका, पदाइं पडिवत्तावेहि (८)।

---

(१) अरे, रक्ष्या।

(२) अरे, नहि नहि।

(३) भवतु, संशये पतितोऽस्मि। भवतु, चारुदत्तं पुनरपि प्रक्ष्यामि।

(४) अरे, दासीपुत्र, सेना।

(५) अरे, द्वे अपि एकस्मिन् कृत्वा शीघ्रं भण।

(६) ननु परिवृत्य भण।

(७) सेनावसन्ते

(८) अरे, मूर्ख वटुक, पदे परिवर्त्तय।

Digitized by Google

विदू ॥ पादौ परिवृत्य ॥ सेनावसन्ते।

विटः। अले, अक्खरपदाइं परिवत्तावेहि (१)।

विदू ॥ विचिन्त्य ॥ वसन्तसेणा (२)

चेटः। एशा शा आअदा (३)।

विदू। ता जाव चारुदत्तस्स णिवेदेमि ॥ उपसृत्य ॥ भो चारुदत्त, धणिओ दे आअदो (४)।

चारु। कुतोऽस्मत्कुले धनिकः।

विदू। जइ कुले णत्थि, ता दुवारे अत्थि। एषा वसन्तसेणा आअदा (५)।

चारु। वयस्य, किं मां प्रतारयसि।

विदू। जइ मे वअणे ण पत्तिआअसि, ता एदं कुम्भीलअं पुच्छ। अरे दासीए पुत्ता, कुम्भीलअ, उवसप्प (६)।

---

(१) अरे अक्षरपदे परिवर्त्तय।

(२) वसन्तसेना।

(३) एषा सा आगता।

(४) तत् यावत् चारुदत्तस्य निवेदयामि। भो चारुदत्त, धनिकस्ते आगतः।

(५) यदि कुले नास्ति, तत् द्वारे अस्ति। एषा वसन्तसेना आगता।

(६) यदि मे वचने न प्रत्ययसे, तदेनं कुम्भीलकं पृच्छ। अरे दास्याः पुत्र कुम्भीरक उपसर्प।

Digitized by Google

चेटः ॥ उपसृत्य ॥ अज्ज वंदामि (१)।

चारु। भद्र, स्वागतं; कथय सत्यं, प्राप्ता वसन्तसेना।

चेटः। एषा सा आगदा वसन्तसेणा (२)।

चारु ॥ सहर्षं ॥ भद्र, न कदाचित्प्रियवचनंनिष्फलीकृतं मया; तद्गृह्यतां पारितोषिकं ॥ इत्युत्तरीयं प्रयच्छति ॥

चेटः ॥ गृहीत्वा; प्रणम्य सपरितोषं ॥ जाव अज्जाए णिवेदेमि (३) ॥ इति निष्क्रान्तः ॥

विदू। भो अवि जाणासि, किं निमित्तं ईदिसे दुद्दिणे आगदत्ति (४)।

चारु। वयस्य न सम्यगवधारयामि।

विदू। मए जाणिदं; अप्पमुल्ला रअणावली वज्जमुल्लं सुवण्ण भण्डअं त्ति ण परितुट्ठा अवरं मग्गिदुं आगदा (५)।

चारु ॥ स्वागतं ॥ परितुष्टा यास्यति।

॥ ततः प्रविशति उच्छलाभिसारिकावेशेन वसन्तसेना, सोत्कंठा, कृत्रधारिणी विटश्च ॥

---

(१) आर्य्य, वन्दे।

(२) एषा सा आगता वसन्तसेना।

(३) यावदार्य्यायानिवेदयामि।

(४) भो अपि जानासि किं निमित्तं ईदृशे दुर्दिने आगतेति।

(५) मया ज्ञातं अल्पमूल्या रत्नावली वज्रमूल्यं सुवर्ण भाण्डं, इति न परितुष्टा अपरं याचितुमागता।

Digitized by Google

विटः ॥ वसन्तसेनामुद्दिश्य ॥

अपद्मा श्रीरेषा, प्रहरणमनङ्गस्य खलितं,
कुलस्त्रीणां शोकोमदनवरवृक्षस्य कुसुमं;
सलीलं गच्छन्ती, रतिसमयलज्जा प्रणयिनी,
रतिक्षेत्रे रङ्गे प्रियपथिकसार्थैरनुगता।
वसन्तसेने, पश्य, पश्य।
गर्ज्जन्ति शैलशिखरेषु विलम्बिबिम्बा
मेघावियुक्तवनिताहृदयानुकाराः;
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वीज्यते मणिमयैरिवतालवृन्तैः।

अपिच।

पङ्कक्लिन्नमुखाः पिबन्ति सलिलं धाराहतादर्दुराः,
कण्ठं मुञ्चति वर्हिणः समदनो; नीपः प्रदीप्यायते।
संन्यासं कुलदूषणैरिव जनैर्मेघैर्वृतस्वभ्रमा,
विद्युन्नीचकुलोद्गतेव युवतिर्नैकत्र संतिष्ठते।

वसं। भाव, सुट्ठु दे भणिदं (१)॥ एषाहि॥

मूढे निरन्तरपयोधरया मयैव
कान्तः सहाभिरमते यदि किन्नवाच;
मार्जारजितैरिति मुहुर्विनिवारयन्ती
मार्गं रुणद्धि कुपितेव निशा सपत्नी।

---

(१) भाव, सुट्ठु ते भणितं।

Digitized by Google

विटः। भवत्वेवं तावदुपलभ्यतां तावदिदं।

वसं। भाव, किमनया स्त्रीस्वभावदुर्विदग्धयोपालभ्यया। पश्यतु भावः।

मेघावर्षन्तु गर्ज्जन्तु मुञ्चन्त्वग्निमेव वा,
गणयन्ति न शीतोष्णं रमणाभिमुखाः स्त्रियः।

विटः। वसन्तसेने पश्य। अयमपरः,

पवनचपलवेगः, शूलधाराग्ररौद्रः,
स्तनितपटहनादः, स्पष्टविद्युत्पताकः;
हरति करसमूहं खे शशांकस्य मेघो,
नृपइव पुरमध्ये मन्दवीर्य्यस्य शत्रोः।

वसं। एवं णेदं ता कधं एसो अवरो (१)।

एतैरेव यदा गजेन्द्रमलिनैराभातलम्बोदरै
र्गर्जद्भिः सतडिद्बलाकशबलैर्मेघैः सशस्त्रं नभः;
तत्किं प्रोषितभर्त्तृबध्यपटहोद्घाताहतश्रोत्रकः,
प्रावृट्प्रावृडिति ब्रवीति शठधीः, चारं चते प्रक्षिपन्।

विटः। वसन्तसेने एवमेतत्। इदमपरं पश्य।

बलाकापाण्डुरोष्णीषं, विद्युदुल्लिखितचामरं,
मत्तवारणसारूप्यं, कर्त्तुकाममिवाम्बरं।

---

(१) एवं णेदं तत्कथं एषोऽपरः।

वसं। भाव, पेक्ख पेक्ख (१)।

एतैराईतमालपत्रमलिनैरापीतसूर्य्यं नभो,
वल्मीकाः, शरताडिताइव गजाः, सीदन्ति धाराहताः।
विद्युत्काञ्चनदीपिकेव रचिता प्रासादसञ्चारिणी,
ज्योत्स्ना दुर्बलभर्तृकेव वनिता, प्रोत्सार्य्य मेघैर्हृता।

विटः। वसन्तसेने पश्य, पश्य।

एते हि विद्युद्गुणबद्धकक्षागजाइवान्योन्यमभिद्रवन्तः,
शक्राश्रया वारिधराः सधारा, गां रूपरज्जव समुद्धरन्ति।

॥ अपिच पश्य ॥

महावाताघातैर्महिषकुलनीलैर्जलधरै
श्चलैर्विद्युत्पद्मैर्जलधिभिरिवान्तःप्रचलितैः,
इयं गम्भीद्दामानवहरितशस्याङ्कुरवती
धरा धारापातैर्मणिमयशरैर्भिद्यतइव।

वसं। भाव, एसो अवरो (२)।

एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः,
प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः,
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्दीपितः,
कुर्व्वन्नञ्जनमेचकादव दिशो मेघः समुत्तिष्ठते।

विटः। एवमेतत्। तथाहि, पश्य।

---

(१) भाव पश्य, पश्य।

(२) एषोऽपरः।

Digitized by Google

निष्यन्दीकृतपद्मखण्डनयनं नष्टत्विषावासरं,
विद्युद्भिः क्षणदृष्टसुष्ठुतिमिरं प्रह्लादिताशामुखं;
निश्चेष्टं स्वपितीव सम्प्रति पयोधारागृहान्तर्गतं
स्फीताम्भोधरधामनैकजलदच्छद्मापिधानं जगत्।

वसं। भाव, एव्वं णेदं। ता पेक्ख पेक्ख (१)।

गतानाशं तारा उपकृतमसाधाविव जने,
वियुक्ताः कान्तेन स्त्रियइव न राजन्ति ककुभः।
प्रकामाक्तस्नग्धं चिदशपतिशस्त्रस्य शिखिना,
द्रवीभूतं भन्ये पतति जलरूपेण गगनं।

॥ अपिच पश्य॥

उन्नमति नमति वर्षति गर्जति मेघः करोति तिमिरौघं,
प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि।

विटः। एवमेतत्।

विद्युद्भिर्ज्वलतीव, संविहसतीवोच्चैर्बलाकाश्रेणै,
र्माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा।
विष्यष्टाशनिनिस्वनेन रसतीवाधूर्णतीवानिलै
र्नीलैः साद्रमिवाद्रिभिर्जलधरैर्धूपायतीवाम्बरं।

वसं।

जलधर निर्लज्जस्त्वं, यस्मां दयितस्य वेश्म गच्छन्ती,
स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि।

भोः शक्र।

---

(१) भाव एवं नेदं तत्पश्य पश्य।

किन्ते शक्रं पूर्व्वरतिप्रसक्ता यत्तं नदस्यब्द सिंहनादैः,
न युक्तमेतत्प्रियकाङ्क्षितायामार्गं निरोद्धुं मम वर्षपातैः।

अपिच।

यद्दर्दुरस्याहेतोर्हर्षा वदसि शक्र गोतमोऽस्मीति,
तद्वन्ममापि दुःखं निरवेक्ष्य निवार्य्यतां जलदः।

अपिच।

गर्ज वा, वर्ष वा, शक्र, मुञ्च वा शतशोऽशनिम्,
न शक्यहि स्त्रियोरोद्धुं प्रस्थितादयितं प्रति।
यदि गर्जति वारिधरोगर्जतु, तन्नाम निष्ठुराः पुरुषाः;
अयि विद्युत्प्रमदानां त्वमपि च दुःखं न जानासि।

विटः॥ भवति, अलमलमुपालम्भेन। उपकारिणी तवेयं॥

ऐरावतोरसि चलेव सुवर्णरज्जुः,
शैलस्य मूर्द्ध्नि निहितेव सिता पताका।
आखण्डलस्य भवनोदरदीपिकेय
माख्याति ते प्रियतमस्य हि सन्निवेशं।

वसं। भाव एव्वं तं जेव्व एदं गेहं (१)।

विटः। सकलकलाभिज्ञाया न किञ्चिदिह तवोपदेष्टव्यमस्ति। तथापि स्नेहः प्रलापयति। अत्र प्रविश्य कोपोऽत्यन्तं न कर्त्तव्यः।

यदि कुप्यसि नास्ति रतिः, कोपेन विनाथवा कुतः कामः।
कुप्य च कोपय च, त्वं प्रसीद च त्वं प्रसादय कान्तं।

---

(१) भाव एवं तदेव एतद्गेहं।

Digitized by Google

भवत्येवं तावत्। भोभोनिवेद्यतामार्य्यचारुदत्ताय।

एषा फुल्लकदम्बनीपसुरभौ काले घनोद्भासिते,
कान्तस्यालयमागता समदना दृष्टा जलार्द्रालका;
विद्युद्दारिदगर्ज्जितैः सचकिता त्वद्भर्त्सनाकाङ्क्षिणी
पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयन्ती स्थिता।

चारु। आकर्ण्य। वयस्य, श्रूयतां किमेतदिति।

विदू। जं भवं आणवेदि (१)।

वसन्तसेनामुपगम्य ॥ सादरं ॥ सोत्थि भोदीए (२)।

वसं। अज्ज वन्दामि; साअदं अज्जस्स। भाव, एसा चेत्तधारिआ भावस्स ज्जेव्व भोदु (३)।

विटः ॥ स्वगतं॥ अनेनोपायेन निपुणं प्रेषितोऽस्मि ॥ प्रकाशं॥ एवं भवतु ॥ भवति वसन्तसेने।

साटोपकूटकपटानृतजन्मभूमेः
श्राद्धात्मकस्य रतिकेलिकृतालयस्य,
वेश्यापणस्य सुरतोत्सवसङ्गृहस्य,
दाक्षिण्यपण्यसुखनिःक्रयसिद्धिरस्तु।

॥ इति निष्क्रान्तः ॥

---

(१) यद्भवानाज्ञापयति।

(२) स्वस्ति भवत्यै।

(३) आर्य्य वन्दे, स्वागतमार्य्यस्य। भाव, एषा क्षत्रधारिका भावस्य एवं भवतु।

Digitized by Google

वसं। अज्ज मित्तेअ, कहिं तुह्माणं जूदिअरो (१)।

विदू ॥ स्वगतं॥ ही ही भोः, जूदिअरोत्ति भणन्तीए अलङ्किदो पिअवअस्सो ॥ प्रकाशं॥ भोदि, एसो खु रुक्खवाडिआए (२)।

वसं। अज्ज का तुह्माणं सुक्खरुक्खवाडिआ वुच्चदि (३)।

विदू। भोदि, जहिं ण खाईअदि ण पीइअदि (४)।

वसं ॥ स्मितङ्करोति ॥

विदू। ता पविसदु भोदी (५)।

वसं ॥जनान्तिकं॥ एत्थ पविसिअ किं मए भणिदव्वं (६)।

चेटी। जूदिअर अवि सुहो दे पदोसोत्ति (७)।

वसं। अवि पारइस्सं (८)।

---

(१) आर्य्य मैत्रेय कुत्र युष्माकं द्यूतकरः।

(२) आश्चर्य्यं, भो द्यूतकरइति भणन्त्या अलङ्कृतः प्रिय वयस्यः। हे भवति, एष खलु वृक्षवाटिकायां।

(३) आर्य्य का युष्माकं शुष्कवृक्षवाटिका उच्यते।

(४) हे भवति, यत्र न खाद्यते न पीयते।

(५) तस्मात् प्रविशतु भवती।

(६) अत्र प्रविश्य किं मया भणितव्यं।

(७) द्यूतकर, अपि शुभस्ते प्रदोषइति।

(८) अपि पारयिष्यामि।

Digitized by Google

चेटी। अवसरोऽप्येव दे पारयिष्यति (१)।

विदू। पविसदु भोदी (२)।

वसं ॥ प्रविश्योपसृत्य च। पुष्पैस्ताडयन्ती ॥ अद, जुदि अर अवि सुहो दे पदोसो (३)।

चारु ॥ अवलोक्य ॥ अये वसन्तसेना प्राप्ता ॥ सहर्षमुत्थाय ॥ अयि प्रिये।

सदा प्रदोषोमम याति जागतः,
सदा च मे निःश्वसतीगता निशा;
त्वया समेतस्य विशाललोचने,
ममाद्य शोकान्मकरः प्रदोषः।

॥ तत् स्वागतं भवत्यै ॥ इदमासनमत्रोपविश्यतां।

विदू। इदमासणं उवविसदु भोदी, (४)

नाट्येनासीनाः सर्व्वे उपविशन्ति।

चारु। वयस्य, पश्य पश्य।

वर्षोदकमुद्गिरता, अवणाम्बुविलम्बिना कदम्बेन,
एकः स्तनोऽभिषिक्तोनृपसुतइव यौवराज्यस्थः।

तदयस्य क्षिप्रेवासयी वसन्तसेनायाः, अन्ये प्रधानवासयी समुपनीयेतामिति।

---

(१) अवसरएव त्वां पारयिष्यति।

(२) प्रविशतु भवती।

(३) अपि द्यूतकर शुभस्ते प्रदोषः।

(४) इदमासनं उपविशतु भवती।

Digitized by Google

विदू। जं भवं आणवेदि (१)।

चेटी। अज्ज मित्तेअ, चिट्ठ, तुमं, अहं जेव्व अज्जअं सुसूसइस्सं (२)॥ तथा करोति॥

विदू ॥ अपवारितकेन॥ भो वअस्स, पुछामि दाव तत्थ भोदिं किं वि (३)।

चारु। एवं क्रियतां।

विदू ॥ प्रकाशं॥ अध किंणिमित्तं उण दूरिदे पणट्ठ चन्दालोए दुद्दिणअन्धआरे आअदा भोदी (४)।

चेटी। अज्जए उज्जओ बंभणो (५)।

वसं। णं, णिउणेत्ति भणाही (६)।

चेटी। एसा क्खु अज्जआ एवं पुछिदुं आअदा केत्तिअं ताए रअणावलीए मुल्लन्ति (७)।

---

(१) यद्भवानाज्ञापयति।

(२) आर्य्य मैत्रेय तिष्ठ त्वं, अहमेवार्य्यां शुश्रूषयिष्यामि।

(३) भो वयस्य प्रच्छामि तावत्तवभवतीं किमपि।

(४) अथ किं निमित्तं पुनरीदृशे प्रनष्टचन्द्रालोके दुर्दिनान्धकारे आगता भवती।

(५) आर्य्ये उज्जयिन्याब्राह्मणः।

(६) ननु निपुणदूति भण।

(७) एषा खलु आर्य्या एवं प्रष्टुमागता कियत्तायाः रत्नावल्यामूल्यमिति।

Digitized by Google

विदू ॥ जनान्तिकं ॥ भो, भणिदं मए, जधा अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअं ण परितुट्ठा अवरं मग्गिदुं आअदा (१)।

चेटी। सा खु अज्जआए अत्तणो केरकेत्ति भणिअ जूदे हारिदा। सो अ महिओ राआवत्थआरी ण आणी अदि कहिं गदोत्ति (२)।

विदू। भोदि, मंतिदं ज्जेव मन्तीअदि (३)।

चेटी। जाव सो अण्वेसीअदि। ताव एदं जेव्व गेह्ण सुवण्ण भण्डअं। इति दर्शयति (४)।

विदू। विचारयति।

चेटी। अदिमेत्तं अज्जो णिज्जाअदि, ता किं दिट्ठ पुरुव्वो दे (५)।

विदू। भोदि, सिप्पकुसलदाए ओवञ्चेदि दिट्ठिं (६)।

---

(१) भो, भणितं मया, यथा अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डं न परितुष्टा अपरं याचितुमागता।

(२) सा खलु आर्य्यायाआत्मनः कृते इति भणित्वा द्यूते हारिता, सच सभिकः राजावश्यकारी, न ज्ञायते कुत्र गत इति।

(३) हे भवति मन्त्रितमेव मन्त्र्यते।

(४) यावत्सोऽन्विष्यते, तावदेव गृहाण सुवर्णभाण्डं।

(५) अतिमात्रमार्य्योनिर्ध्यायति; तत्किं दृष्टपूर्व्वस्ते।

(६) हे भवति, शिल्पकुशलतया अवबध्नाति दृष्टिं।

Digitized by Google

चेटी। अज्ज वञ्चिदोसि, दिट्ठीए तं जेव्व एदं सुवण्ण भण्डअं (१)।

विदू ॥ सहर्षं॥ भो वअस्स, तं जेव्व एदं सुवण्णभण्डअं जं अह्माणं गेहे चोरेहिं अवहदं (२)।

चारु। वयस्य।

योऽस्माभिश्चिन्तितोव्याजः कर्त्तुं न्यासप्रतिक्रियां,
स एव प्रसुतोऽस्माकं किन्तु सत्यं विड़म्बना।

विदू। भो वअस्स सच्चं, सवामि बह्मणेण (३)।

चारु। प्रियं नः प्रियं।

विदू ॥ जनान्तिकं॥ भो, पुच्छामि णं कुदो एदं समासादि दन्ति (४)।

चारु। कोदोषः।

विदू ॥ चेट्याः कर्णे॥ एवं विअ (५)।

चेटी ॥ विदूषकस्य कर्णे॥ एवं विअ (६)।

चारु। किमिदं कथ्यते। किमयं वाह्याः।

---

(१) आर्य्य वञ्चितोऽसि दृष्ट्या, तदेवेदं सुवर्णभाण्डं।

(२) भो वयस्य, तदेवेदं सुवर्णभाण्डं यदस्माकं गृहे चौरैरपहृतं।

(३) भो वयस्य, सत्यं, शपामि ब्राह्मणेन।

(४) भो, पृच्छामि ननु कुतइदं समासादितमिति।

(५) एवमिव।

(६) एवमिव।

Digitized by Google

अमूर्हि भिन्नाजलदान्तराणि पङ्क्तान्तराणीव मृणालसूच्यः।
पतन्ति चन्द्रव्यसनादिमुक्ता दिवोऽश्रुधारादव वारिधाराः।

अपिच। धाराभिरार्य्यजनचित्तसुनिर्मलाभि
स्खण्डाभिरर्ज्जुनरप्रतिकर्कशाभिः,
मेघाः स्रवन्ति, बलदेवपटप्रकाशाः,
शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः।

प्रिये। पश्य, पश्य;

एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः प्रीतैः प्रदोषानिलैः,
एषाम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता
रत्नाकान्तमिवाम्बरम्प्रियतमाविद्युत्समालिङ्गति।

वसं ॥ शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति ॥

चारु ॥ स्वयं नाटयन्प्रत्यालिङ्ग्य ॥

भोमेघ, गम्भीरतरं नद त्वं, तव प्रसादात्स्मरपीडितं मे,
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पवलमुपैति गात्रं।

विदू। दासीए पुत्त दुद्दिण, अणज्जो दाणिं सि तुमं;
जं एव्वं भोदिं विज्जुआए भाआवेसि (१)।

चारु वयस्य, नार्हस्युपालब्धुं।

वर्षशतमस्तु दुर्दिनमविरतधारं, शतह्रदाः स्फुरन्तु,
अस्मद्विधदुर्ल्लभया यदहं प्रियया परिष्वक्तः।

---

(१) दास्याः पुत्र, दुर्दिन, अनार्य इदानीमसि त्वं यदेवं भवतीं विद्युता भीषयसि।

Digitized by Google

अपिच, वयस्य;

धन्यानि तेषाङ्खलु जीवितानि, ये कामिनीनां गृहमागतानां,
आर्द्राणि मेघोदकशीतलानि गात्राणि गात्रेषु परिष्वजन्ति।

प्रिये, वसन्तसेने;

स्तम्भेषु प्रचलितवेदिसञ्चयन्तं
शीर्णत्वात्कथमपि धार्य्यते वितानं;
एषा च स्फुटितसुधाद्रवानुलेपा
त्वंक्लिन्ना सलिलभरेण चित्तभित्तिः।

॥ ऊर्द्धमवलोक्य ॥ अये इन्द्रधनुः! प्रिये, पश्य, पश्य;

विद्युज्जिह्वेनेदं, महेन्द्रचापोच्छ्रितायतभुजेन,
जलधरविवृद्धहनुना, विजृम्भितमिवान्तरीक्षेण।
तदेवाभ्यन्तरमेव प्रविशावः ॥ इत्युत्थाय परिक्रामति ॥

प्रिये, पश्य।

तालीषु तारम्बिटपेषु मन्द्रं, शिलासु रूक्षं, सलिलेषु चण्डं,
सङ्गीतवीणादव ताड्यमानास्तालानुसारेण पतन्ति धाराः।

॥ इति निष्क्रान्ताः सर्व्वे ॥

दुर्द्दिनोनाम पञ्चमोऽङ्कः।

Digitized by Google

अथ षष्ठोऽङ्कः।

॥ ततः प्रविशति चेटी ॥

चेटी। कधं अज्जवि अज्जआ ण विबुज्झदि; भोदु, पविसिअ पडिबोधइस्सं (१)।

॥ इति गाथेन परिक्रामति ॥ ततः प्रविश्यावष्टादित शरीरा प्रसुप्ता वसन्तसेना।

चेटी ॥ निरूप्य ॥ उत्थेदु, उत्थेदु अज्जआ, पभादं संवुत्तं (२)।

वसं ॥ प्रतिबुध्य ॥ कधं, रत्ति ज्जेव पभादं संवुत्तं (३)।

चेटी। अम्हाणं एसो पभादो, अज्जआए उण रत्ति ज्जेव (४)।

वसं। हञ्जे, कहिं उण तुम्हाणं जूदिअरो (५)।

---

(१) कथमद्यापि आर्य्या न विबुध्यते? भवतु, प्रविश्य प्रतिबोधयिष्यामि।

(२) उत्तिष्ठतु, उत्तिष्ठतु, आर्य्या; प्रभातं सम्वृत्तं।

(३) कथं रात्रिरेव प्रभातं सम्वृत्तं।

(४) अस्माकमेतत्प्रभातं, आर्य्यायाः पुनरात्रिरेव।

(५) चेटि कुतः पुनर्युष्माकं द्यूतकरः।

Digitized by Google

चेटी। अज्जए, वड्ढमाणअं समादिसिअ, पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो (१)।

वसं। किं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो (२)।

चेटी। जोएहि राईए पवहणं, वसन्तसेणा गच्छदुत्ति (३)।

वसं। हञ्जे, कहिं मए गन्तव्वं (४)।

चेटी। अज्जए, अहिं चारुदत्तो (५)।

वसं॥ चेटीं परिष्वज्य॥ हञ्जे, सुट्ठु ण णिव्वादेदो राईए, ता अज्ज पदुक्खं पेक्खिस्सं। हञ्जे, किं पविट्ठा अहं दुवे अभन्तरचतुस्सालअं (६)।

चेटी। ण केवलं अभन्तरचतुस्सालअं, सव्वजणस्स वि हिअअं पविट्ठा (७)।

---

(१) आर्य्ये वर्द्धमानकं समादिश्य, पुष्पकरण्डकं जीर्णोद्यानं गतआर्य्यचारुदत्तः।

(२) किं समादिश्येत्यादि पूर्ववत्।

(३) योजय रात्रौ प्रवहणं, वसन्तसेना गच्छतीति।

(४) चेटि, कुत्र मया गन्तव्यं।

(५) आर्य्ये, अत्र चारुदत्तः।

(६) चेटि, सुष्ठु न निर्व्यातोरात्रौ तदद्य प्रियं प्रेक्षिष्ये। चेटि, किं प्रविष्टा अहमिहाभ्यन्तरचतुःशालं।

(७) न केवलं अभ्यन्तरचतुःशालकं, सर्व्वजनस्यापि हृदयं प्रविष्टा।

Digitized by Google

वसं अविसन्नप्पदि चारुदत्तस्स परिअणो (१)।

चेटी। सन्तपिस्सदि (२)।

वसं। कदा (३)।

चेटी। जदो अज्जआ गमिस्सदि (४)।

वसं। तदो मए पढमं सन्तपिदव्वं ॥ सानुनयं ॥ हञ्जे, गेह्ण एदं रअणावलिं। मम बहिणिआए अज्जा धूदाए गदुअ, समप्पेहि भणिदव्वं च। अहं सिरिचारुदत्तस्स गुण णिज्जिदा दासी, तदा तुह्माणं पि। ता एसा तुहजम्म कट्ठाहरणं होदु रअणावली (५)

चेटी। अज्जए, कुप्पिस्सदि चारुदत्तो अज्जाए दाव (६)।

वसं। गह्ण ण कुप्पिस्सदि (७)।

---

(१) अपि सन्तप्यते चारुदत्तस्य परिजनः।

(२) सन्तप्स्यति।

(३) कदा।

(४) यदा आर्य्या गमिष्यति।

(५) तदा मया प्रथमं सन्तप्तव्यं। चेटि, गृहाण इमां रत्नावलीं, मम भगिन्यै आर्य्याधूतायै गत्वा समर्पय; वक्तव्यञ्च, अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी, तदा युष्माकमपि, तदेषा तवैव कण्ठाभरणं भवतु रत्नावली।

(६) आर्य्ये, कुपिष्यति चारुदत्तआर्य्यायै तावत्।

(७) गच्छ, न कुपिष्यति।

Digitized by Google

चेटी ॥ गृहीत्वा ॥ जं अज्जवेसि (१)।

॥ इति निष्क्रम्य पुनः प्रविशति ॥

चेटी। अज्जए, भणादि अज्जा धूदा। अज्जउत्तेण तुह्माणं पसादीकदा, ण जुत्तं मम एदं गेण्हिदुं। अज्जउत्तो ज्जेव्व मम आहरणविसेसोत्ति जाणादु भोदी (२)।

॥ ततः प्रविशति दारकं गृहीत्वा रदनिका ॥

रदनिका। एहि वच्छ, सअडिआए कीलन्ह (३)।

दार ॥ सकरुणं ॥ रदनिए, किं मम एदाए मट्टिआ सअडिआए। तं जेव्व सोवण्णसअडिअं देहि (४)।

रद ॥ सनिर्वेदं निश्वस्य ॥ जाद, कुदो अह्माणं सुवण्णववहारो। तादस्स पुणोवि रिद्धीए सुवण्णसअडिआए कीलिस्सदि। ता जाव विणोदेमि णं, अज्जआ वसन्तसेणाए समीवं उवसप्पिस्सं ॥ उपसृत्य ॥ अज्जए पणमामि (५)।

---

(१) यदाज्ञापयसि।

(२) आर्य्ये, भणति आर्य्या धूता, आर्य्यपुत्रेण युष्माकं प्रसादीकृता, न युक्तं ममैतां ग्रहीतुं। आर्य्यपुत्रएव मम आभरणविशेषइति जानातु भवती।

(३) एहि, वत्स, शकटिकया क्रीडयावः।

(४) रदनिके, किं ममैतया मृत्तिकाशकटिकया, तामेव सुवर्णशकटिकां देहि।

(५) तात, कुतोऽस्माकं सुवर्णव्यवहारः तातस्य पुनरपि

Digitized by Google

वसं। रअणिए, साअदं दे। कस्स उण अअं दारओ, अनलंकिदसरीरोवि चन्दमुहो आणन्देदि मम हिअअं (१)।

रद। एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम (२)।

वसं ॥ बाहुं प्रसार्य ॥ एहि मे पुत्तअ, आलिंग ॥ इति अङ्के उपवेश्य ॥ अणुकिदं अणेण पिदुणोरूवं (३)।

रद। ण केवलं रूवं, सीलं वि तक्केमि। एदेणा अज्ज चारुदत्तो अत्ताणअं विनोएदि (४)।

वसं। अध किंनिमित्तं एसो रोअदि (५)।

ष्ट्वा सुवर्णशकटिकया क्रीडिष्यसि। तावद्विनोदयाम्येनं, आर्य्यावसन्तसेनायाः समीपमुपसर्पिष्यामि। आर्ये प्रणमामि।

(१) रदनिके स्वागतं ते, कस्य पुनरयं दारकः अन लङ्कृतशरीरोऽपि चन्द्रमुखआनन्दयति मम हृदयं।

२) एष खलु आर्य्यचारुदत्तस्य पुत्रोरोहसेनोनाम।

(३) एहि मे पुत्रक, आलिङ्गय। अनुकृतं अनेन पितृरूपं।

(४) न केवलं रूपं, शीलमपि तर्कयामि। एतेनार्य्यचारुदत्त आत्मानं विनोदयति।

(५) अथ किंनिमित्तं एषरोदिति।

Digitized by Google

रद्द। एदिणा पडिवेसिअगहवइदारअकेरिआए सुवण्णसअडिआए कीलिदं, तेण अ सा णीदा; तदो उण तं मग्गा तस्स मए दूअं मट्टिआसअडिआ कदुअ दिण्णा। तदो भणादि, रद्दणिए किं मए एदाए मट्टिआसअडिआए, तं ज्जेव्व सोव्वणसअडिअं देहित्ति (१)।

वसं। हद्धी, हद्धी, अअं पि णाम परसंपत्तीए सन्तप्पदि। भअवं कदंत पोक्खरवत्तपडिदजलविंदुसरिसेहिं कीलसि तुमं पुरिसभाअधेएहिं॥ इति साला॥ ण्हादु मा रोदु, सोवण्ण सअडिआए कीलिस्सदि (२)।

दार। रद्दणिए, का एसा? (३)

वसं। दे पिदुणो गुणणिज्जिदा दासी (४)।

---

(१) एतेन प्रतिवेशिकगृहपतिदारकस्तया सुवर्णशकटिकया क्रीडितं, तेन च सा नीता; ततः पुनस्तां याचतोमया दूतं मृत्तिकाशकटिकाछला दत्ता। तदा भणति, रद्दनिके किं मम एतया मृत्तिकाशकटिकयातामेव सुवर्णशकटिकां देहीति।

(२) हा धिक्, हा धिक्, अयमपि नाम परसम्पत्त्या सन्तप्यते। भगवन् कृतान्त, पुष्करपात्रपतितजलविन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः। तात, मा रोदिहि, सुवर्णशकटिकया क्रीडिष्यसि।

(३) रद्दनिके, का एषा?

(४) ते पितुर्गुणनिर्जिता दासी।

Digitized by Google

रद। जाद, अज्जआ दे जणणी भोदि (१)।

दार। रदणिए, अलिअं तुमं भणासि, जद् अम्हाणं अज्जआ जणणी, ता कीस अलंकिदाए? (२)।

वसं। जाद, मुद्धेण मुद्धेण अदिकरुणं मंतेसि ॥ नाट्येना भरणान्यवतार्य्य, रुदंती॥ एसा दाणिं दे जणणी संवुत्ता। ता गेण्ह एदं अलंकारअं, सोवण्णअडिअं घडावेहि (३)।

दार। अवेहि, ण गेण्हिस्सं, रोदसि तुमं (४)।

वसं ॥ अश्रूणि प्रमृज्य॥ जाद, न रोदिस्सं; गच्छ, कील, ॥ अलंकारैर्मृच्छकटिकं पूरयित्वा ॥ जाद, कारेहि सोवण्णअअडिअं (५)।

॥ इति दारकमादाय निष्क्रान्ता रदनिका ॥

---

(१) तात, आर्य्या ते जननी भवति।

(२) रदनिके, अलीकं त्वं भणसि, यद्यस्माकं आर्य्या जननी, तत्किमर्थं अलङ्कृता?

(३) तात, मुग्धेन मुग्धेनातिकरुणं मन्त्रयसि। एषा इदानीं ते जननी संवृत्ता। तत् गृहाणैतं अलङ्कारं, सुवर्ण मकटिकां कारय।

(४) अपेहि, न ग्रहीष्यामि, रोदिषि त्वं।

(५) तात न रोदिष्यामि, गच्छ, क्रीड। तात, कारय सौवर्णमकटिकां।

Digitized by Google

प्रविश्य प्रवहणाधिरूढश्चेटः ॥ रदणिए, रदणिए, णिवेदेहि अज्जआए वसन्तसेणाए, ओहारिअं पक्खदुआरए सज्जं पवहणं चिट्ठदि (१)।

प्रविश्य रदनिका ॥ अज्जए, एसोवड्ढमाणओविण्णवेदि पक्खदुआरए सज्जं पवहणंत्ति (२)।

वसं। हंजे, चिट्ठ मुहुत्तं, जाव अहं अत्ताणअं पसाधेमि (३)।

चेटः। ही ही भोः, मए वि जाणत्थलके विसुमलिदे; ता जाव गेण्हिअ आअच्छामि। एदे णसाअज्जुकटुआ वड्ढा। भोदु, भोदु, पवहणेण ज्जेव्व गदागदिं करिस्सं ॥ इति निष्क्रान्तश्चेटः (४)॥

वसं। हंजे, उवणेहि मे पसाहणं, अत्ताणअं पसाहइस्सं (५) ॥ इति प्रसाधयन्ती स्थिता॥

---

(१) रदनिके, रदनिके, निवेदय आर्य्यायै वसन्तसेनायै, अपवारितं पक्षद्वारके सज्जं प्रवहणं तिष्ठति।

(२) आर्य्ये, एष वर्द्धमानकोविज्ञापयति पक्षद्वारे सज्जं प्रवहणमिति।

(३) चेटि, तिष्ठ मुहूर्त्तं, यावत् अहमात्मानं प्रसाधयामि।

(४) ही ही भोः, मयापि यानास्तरणं विस्मृतं, तत् यावत् गृहीत्वा आगच्छामि। एते नासिकारज्जुकटुकावल्लीवर्द्धाः। भवतु, भवतु, प्रवहणेनैव गतागतिं करिष्यामि।

(५) चेटि, उपनय मे प्रसाधनं, आत्मानं प्रसाधयिष्यामि।

Digitized by Google

प्रविश्य प्रवहणाधिरूढः स्थावरकश्चेटः ॥ आपन्नस्मि राजश्यालसंठाणेण; स्थावलआ, पवहणं गेण्हिअ, पुप्फकरंडअं जिणुज्जाणं तुलिदं आगच्छेहित्ति। भोदु, तहिं जेव्व गच्छामि। वहध, वहला, वहध ॥ परिक्रम्यावलोक्य च ॥ कधं, गामअअलेहिं लुद्धे मग्गे; किं दाणिं एत्थ करइस्सं ॥ घाटोपं॥ अले, अले, श्रीसलध; ॥ आकर्ण्य ॥ किं भणाध? एसे कस्स केरके पवहणेत्ति? एसे राअश्यालसंठाणकेलके पवहणेत्ति। ता णिग्घ श्रीसलध ॥ अवलोक्य ॥ कधं, एसे अवले, बहिअं विअ मं पेक्खिअ अहअज्जेव्व जूदपलादद्दे विअ जूदि अले श्रीहालिअ अत्ताणअं अवदो अवक्कंते? ता को उण एसो? अधवा किं मम एदिणा? तुलिदं गमिस्सं। अले, अले, गामेलुआ, श्रीसलध। किं भणाध? मुहुत्तअं चिट्ठ चक्कपडिवट्टिअं देहित्ति। अले, अले, राअश्यालसंठाणकेलके हगे, मूढले, चक्कपडिवट्टिअं ददस्सं। अधवा, एसे एआई तवस्सी, ता एवं करेमि। एदं पवहणं अज्जचारुदत्तस्स लुक्खवाडिआए पक्खदुआलके थावेमि ॥ इति प्रवहणं संस्थाप्य ॥ एसह्मि आअदो (१) ॥ इति निष्क्रान्तः ॥

---

(१) आपन्नोऽस्मि राजश्यालकसंस्थानेन; स्थावरक; प्रवहणं गृहीत्वा पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छेति। भवतु, तत्रैव गच्छामि। वहत, वहीवर्हावहत। कथं यामप्रकटैरद्धोमार्गः; किमिदानीं अत्र करिष्यामि। अरे, अरे,

चेटी। अज्जए, णेमिसद्दो विअ सुणीअदि। ता आअदो पवहणो (१)।

वसं। हंजे, गच्छ, तुवरदि मे हिअअं; ता आदेसेहि पक्खदुआरअं (२)।

चेटी। एदु, एदु, अज्जआ (३)।

वसं ॥ परिक्रम्य ॥ हंजे, वीसम तुमं (४)।

चेटी। जं अज्जआ आणवेदि (५) ॥ इति निष्क्रान्ता ॥

अनुसरत। किं भणत? एष कस्य कृते प्रवहणमिति? एष राजश्यालकसंस्थानस्य कृते प्रवहणमिति, तत् शीघ्रमपसरत। कथमेष अपरः, सभिकमिव मां प्रेक्ष्य सहसैव द्यूतपलायितइव द्यूतकरोऽपवार्यात्मानं अन्यतोऽपक्रान्तः? तत्कः पुनरेष? अथवा किं ममैतेन? त्वरितं गमिष्यामि। अरे, अरे, याम्या, अपसरत, अपसरत। किं भणत? मुहूर्त्तं तिष्ठ, चक्रपरिवर्त्तनं देहीति। अरे, अरे, राजश्यालसंस्थानस्य अहं सूरः चक्रपरिवृत्तिं दास्यामि। अथवा, एष एकाकी तपस्वी, तदेवं करोमि। एतं प्रवहणं आर्यचारुदत्तस्य वृक्षवाटिकायाः पश्चद्वारके स्थापयामि। एषोऽस्मि आगतः।

(१) आर्ये, नेमिशब्दइव श्रूयते तदागतः प्रवहणः।

(२) चेटि, गच्छ; त्वरयति मे हृदयं, तदादिश पश्चद्वारं।

(३) एतु, एतु, आर्या।

(४) चेटि, विश्रम त्वं।

(५) यदार्या आपयति।

Digitized by Google

वसं। दक्षिणाक्षिस्पन्दं सूचयित्वा॥ प्रवहणमधिरुह्य च॥ किं णेदं फुरदि दाहिणं लोअणं। अधवा, चलुद्दत्तस्स जेव्व दंसणं अणिमित्तं पवज्झिस्सदि (१)।

प्रविश्य स्थावरकश्चेटः॥ ओसारिदा मए अग्गडा, ता आव गच्छामि॥ इति निष्क्रम्याधिरुह्य चालयित्वा, स्वगतं॥ भारिके पवहणं। अधवा, चक्कपरिवट्टिआए परिस्संतस्स भारिके पवहणे पडिभादि। भोदु, गमिस्सं। आध, गोणा, आध (२)।

नेपथ्ये। अरे रे दोवारिआ, अप्पमत्ता सएसु सएसु गुत्तट्ठाणेसु होध। एसो अज्ज गोवालदारओ उत्तिअं भंजिअ, उत्तिवालिअं वावादिअ, बन्धणं भेदिअ, परिअट्टोअ वक्कमदि ता गेह्ध गेह्ध (३)।

---

(१) किं नेदं स्फुरति दक्षिणं लोचनं। अथवा, चारुदत्तस्यैव दर्शनमनिमित्तं प्रवक्ष्यिष्यति।

(२) अपसारिता मया शकटाः, तत् यावत् गच्छामि। भारवत् प्रवहणं, अथवा चक्रपरिवृत्त्या परिश्रान्तस्य सभारं प्रवहणं प्रतिभासते। भवतु, गमिष्यामि, यात, वृषभा, यात।

(३) अरे रे दौवारिका, अप्रमत्ताः स्वेषु स्वेषु गुप्त स्थानेषु भवत। एषोऽद्य गोपालदारको गुप्तीं भंक्त्वा, गुप्तिपालकं व्यापाद्य, बन्धनं भित्त्वा, परिभ्रष्टः अपक्रामति। तद्गृह्यीत तद्गृह्यीत।

Digitized by Google

प्रविश्य पटाक्षेपेण संभ्रान्त, एकचरणलग्ननिगडोऽवगुण्ठित, आर्य्यकः परिक्रामति।

चेटः ॥ स्वगतं॥ महंते णअरीए संभमे उप्पण्णे; ता तुलिदं तुलिदं गमिस्सं(१) ॥ इति निष्क्रान्तः॥

आर्य्यकः।

हित्वाहं नरपतिबन्धनापदेशव्यापत्तिव्यसनमहार्णवन्नराणां,
पादाग्रस्खलितनिगडैकपाशकर्षी, प्रभ्रष्टोगजइव बन्धनाद्भ्रमामि।

भो, अहं खलु सिद्धादेशजनितपरिचासेन राज्ञा पालकेन घोषादानीय, विशसने गूढागारे बन्धनेन बद्धः। तस्माच्च प्रियसुहृद्विटकप्रसादेन, बन्धनात्परिभ्रष्टोऽस्मि ॥ अश्रूणि विमृज्य॥

भाग्यानि मे यदि तदा मम कोऽपराधो,
यद्वन्यनागइव संयमितोऽस्मि तेन।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या
गम्योनृपोबलवता सह कोविरोधः।

तत्कुत्र गच्छामि मन्दभाग्यः ॥ विलोक्य॥ इदं कस्यापि साधोरनावृतपश्चद्वारं गेहं।

इदं गृहं भिन्नमनायतार्गलं, विशीर्णसन्धिस्थ, महाकपाटः,
ध्रुवं कुटुम्बी व्यसनाभिभूतो, दग्धं प्रपन्नोमम तुल्यभाग्यः।

---

(१) महान् नगर्य्यां संभ्रमः उत्पन्नः; तत् त्वरितं त्वरितं गमिष्यामि।

तदत्र तावत्प्रविश्य तिष्ठामि।

नेपथ्ये। जाध, गोणा, जाध (१)।

आर्य्यकः ॥ आकर्ण्य ॥ अये प्रवहणं द्रुतएवाभिवर्त्तते।

भवेद्वोष्ठीयानं, नच विषमग्रीवैरधिगतं,
वधूसंयानं वा, तदभिगमनोपस्थितमिदम्।
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा
द्विविक्तलाक्षून्यं मम खलु भवेदेव विहितं।

॥ ततः प्रवहणेन सह प्रविश्य वर्द्धमानकश्चेटः। ही मान हे; आणीदे मए जाणघसके। रदणिए, णिवेदेहि अज्ज आए वसंतसेणाए, अवत्थिदे सज्जे पवहणे अहिरुहिअ, पुप्फकरण्डअंजिण्णुज्जाणं गच्छदु अज्जआ (२)।

आर्य्यकः ॥ आकर्ण्य ॥ गणिकाप्रवहणमिदं, बहिर्य्यानञ्च; भवत्वधिरोहामि ॥ इति खैरमुपसर्पति ॥

चेटः ॥ श्रुत्वा ॥ कधं, णेउरसद्दे, ता आअदा खु अज्जआ, अज्जए, दूमे णासिकट्टुआ वद्दला। ता पिट्ठदो जेव्व आलुहदु अज्जआ (३)।

---

(१) यात, वृषभा, यात।

(२) आर्य्ये; आनीतं मया यानान्तरणं। रदनिके, निवेदय आर्य्यायै वसन्तसेनायै, अवस्थितं सज्जं प्रवहणं अधिरुह्य पुष्पकरण्डकं जीर्णोद्यानं गच्छतु आर्य्या।

(३) कथं, नूपुरशब्दः; तदागता खल्वार्य्या। आर्य्ये, दूमौ नासिकारज्जकटुकौ बलीवर्दौ, तत्पृष्ठतएव रोहतु आर्य्या।

Digitized by Google

॥ आर्य्यकः तथा करोति ॥

चेटः। पादुक्कालचालिदाणं णेउराणं वीसंतोसद्दो, भउक्कंते अ पवहणे, तधा तक्केमि संपदं अज्जआए आरूढाए होदव्वं; ता गच्छामि। आध, गोणा, आध (१) ॥ इति परिक्रामति ॥

प्रविश्य वीरकः ॥ अरे रे, अरे जअ, जअमाण, चंदणअ, समं वट्टदु णरवदिहिअअं च, बंधणं चावि। अग्गे, पुरत्थिमे पदोलीदुआरे चिट्ठ तुमं; तुमं पि पठिमे; तुमं पि दक्खिणे; तुमं उत्तरे। जोवि एसो पाआरखंडो एदमभिरुहिअ चंदणेण समं गदुअ अवलोएमि। एहि, चंदणअ, एहि, इदोदाव (२)।

प्रविश्य संभ्रान्तश्चन्दनकः। अरे, रे, वीरअ, विरअ, विसलु, भीमङ्गअ, दंडकाल अ, दंडसूरअमुहा।

आअच्छध वीसद्धा, तुरिअं जत्तहं लद्ध करेजाह,
लद्धो जेण ण रक्खो पहवदु गोत्तन्तरं गन्तुं।

---

(१) पादोत्कालचालितानां नूपुराणां विश्रान्तः शब्दः, भाराक्रान्तश्च प्रवहणं, तथा तर्कयामि साम्प्रतं आर्य्यया आरूढया भवितव्यं; तद्गच्छामि, यात, गोणा, यात।

(२) अरे रे, अरे जय, जयमान, चन्दनक, समं व्रजति नरपतिहृदयं च, बन्धनं चापि। अरे पुरस्तात् प्रतोलीद्वारे तिष्ठ त्वं; त्वमपि पश्चिमे; त्वमपि दक्षिणे; त्वमपि उत्तरे। योऽपि एष प्राकारखण्डः एतमभिरुह्य, चन्दनेन समं गत्वा, अवलोकयामि। एहि, चन्दनक, एहि, इतस्तावत्।

Digitized by Google

अविअ।

उज्जाणेसु, सहासु अ, मग्गे, णअरीए, आवणे, घोसे,
तं, तं, जोइह तुरिआ, संका वा जाअए जत्थ।
रे, रे, वीरअ, किं दरिसेसि, भणाहि दाव वीसद्धं,
भेत्तूण अ बंधणअं को सो गोवालदारअं हरइ,
कस्स अट्ठमो दिणअरो, कस्स चउत्थोअ वट्टदे चंदो,
छट्ठोअ भग्गवगहो, भूमिसुओ पंचमो कस्स,
भण, कस्स जम्मछट्ठो जीवो, णवमोतेव अ सूरसुओ।
जीअंते चंदणए, को सो गोवालअं हरइ युग्मं (१)।

---

(१) अरे रे वीरक, विरज, विश्रब्ध, भीमाक्रन्द, दण्डकाल, दण्डशूरप्रमुखाः।

आगच्छत विश्रब्धास्त्वरितं याचां लघु कुरुत,
लक्ष्मीर्येन न राज्ञः प्रभवति गोचान्तरं गन्तुं।

अपिच।

उद्यानेषु, सभासु, च, मार्गे, नगर्य्यां, आपणे, घोषे,
तं, तं, अन्वेषयत त्वरितं, शङ्का वा जायते यत्र।
रे रे वीरक, किं दर्शयसि, भणसि तावत् विश्रब्धं,
भित्वा च बन्धनकं कः स गोपालदारकं हरति,
कस्याष्टमोदिनकरः, कस्य चतुर्थस्य वर्त्तते चन्द्रः,
षष्ठस्य भार्गवग्रहो, भूमिसुतः पञ्चमः कस्य;
भण, कस्य जन्मषष्ठोजीवो, नवमस्थैव सूरसुतः,
जीवति चन्दनके, कः स गोपालकं हरति।

Digitized by Google

वीरकः। भट्ट चंदणअ, अवहरदि कोवि तुरिअं। चंदणअ, सवामि तुज्झ हिअएण, जह अद्धूदिद दिनअरे गोवालअदारओ खुडिदो (१)।

चेटः। जाध, गोणा, जाध (२)।

चंद ॥ दृष्ट्वा ॥ अरे, रे, पेक्ख, पेक्ख; ओहाडिओ पवहणोवज्जदि मज्झेण राअमग्गस्स। एदं ताव विआरेह, कस्स, कहिं पवसिओ पवहणो (३)।

वीरकः ॥ अवलोक्य ॥ अरे, पवहणवाहआ, मा दाव एदं पवहणं वाहेहि। कस्स केरकं एदं पवहणं? कोवा दूध आरूढो? कहिं वा वचदि? (४)

---

(१) हे भट चंदनक, अपहरति कोऽपि त्वरितं, चन्दनक, अपामि तव हृदयेन, यथा अर्द्धोदितदिनकरे गोपालकदारकः खुटितः पलायित इत्यर्थः।

(२) यात, गोणा, यात।

(३) अरे, रे, पश्य, पश्य; अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य। एतं तावद्विचारय, कस्य, कुत्र प्रेषितं प्रवहणं।

(४) अरे, प्रवहणवाहक, मा तावदेतं प्रवहणं वाहय। कस्य ह्यतमेतत् प्रवहणं? कोवा दूढारूढः? कुत्र वा व्रजति।

चेटः। एसे खु पवहणे अज्जचारुदत्तस्स कीलके; दुधअज्जआ वसंतसेणा आरूढा; पल्हाणं पुप्फकरंडअं जिण्णुज्जाणं कीलिदुं चारुदत्तस्स णिज्जदि (१)।

वीरकः ॥ चंदनकमुपसृत्य ॥ एसो पवहणवाहओ भणादि; अज्जचारुदत्तस्स पवहणं, वसंतसेणा आरूढा, पुप्फकरंडअं जिण्णुज्जाणं णीअदित्ति (२)।

चंद। ता गच्छदु (३)।

वीरकः। अणवलोइदो जेव्व? (४)

चंद। अधरं (५)।

वीरकः। कस्स पत्तिएण? (६)

चंद। अज्जचारुदत्तस्स (७)।

---

(१) एतत् खलु प्रवहणं आर्यचारुदत्तस्य कीलकं, दुहार्या वसन्तसेना आरूढा; प्रह्लानं पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य निर्यातति।

(२) एष प्रवहणवाहकोभणति; आर्यचारुदत्तस्य प्रवहणं, वसन्तसेनारूढा, पुष्पकरण्डकजीर्णोद्यानं नीयते इति।

(३) तद्गच्छतु।

(४) अनवलोकितएव?

(५) अधर्कि।

(६) कस्य प्रत्ययेन?

(७) आर्य चारुदत्तस्य।

Digitized by Google

वीरकः। को अज्जचारुदत्तो? का वा वसंतसेणा? जेण अणवलोइदं वच्चदि (१)।

चंद। अरे, अज्जचारुदत्तं ण आणासि? णवा वसंतसेणिअं? जइ अज्जचारुदत्तं, वसंतसेणिअं वा, ण आणासि, ता गअणे जोएहासहिदं चंदं पि तुमं ण आणासि।

को तं गुणारविंदं सीलमिअंकं जणो ण आणादि,
आवणदुक्खमोक्खं, चउःसाअरसारअं रअणं।
दोजेव्व पूअणीआ इह णअरीए तिलअभूदाअ,
अज्जा वसंतसेणा, धम्मणिही चारुदत्तोअ (२)।

वीरकः। अरे, चंदनआ;

---

(१) कआर्य्यचारुदत्तः? का वा वसन्तसेना? येनानवलोकितं व्रजति।

(२) अरे, आर्य्यचारुदत्तं न जानासि? नवा वसन्तसेनां? यदि आर्य्यचारुदत्तं, वसन्तसेनां वा, न जानासि, तदा गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि।

कस्तं गुणारविन्दं शीलसृगाङ्कं जनोन जानाति,
आपणदुःखमोचं, चतुःसागरसारं रत्नं।
द्वावेव पूजनीयौ, इह नगर्य्यां तिलकभूतौ च,
आर्य्या वसन्तसेना, धर्मनिधिश्चारुदत्तश्च।

Digitized by Google

जाणामि चारुदत्तं, वसंतसेणं च सुट्ठु जाणामि,
पत्ते अ लाअकज्जे, पिअरंपि अहं ण जाणामि (१)।

आर्य्यकः ॥ स्वगतं ॥ अयं मे पूर्व्ववैरी, अयं मे पूर्व्वबन्धुः। यतः।

एककार्य्यनियोगेऽपि नानयोस्तुल्यशीलता,
विवाहे च चितायाञ्च यथाऽऽहुतभुजोर्द्वयोः।

चंद। तुमं तन्निओ सेणावई रञ्ञोपत्तइट्ठो; एदे धारिदा मए वद्धा, अवलोएहि (२)।

वीरकः। तुमं पि रञ्ञोपत्तइट्ठो बलवई; ता तुमं जेव्व अवलोएहि (३)।

चंद। मए अवलोइदं, तुए अवलोइदं भोदि (४)।

वीरकः। जं तुए अवलोइदं, तं रञ्ञा पालएण अवलोइदं (५)।

---

(१) जानामि चारुदत्तं, वसन्तसेनाञ्च सुष्ठु जानामि,
प्राप्ते च राजकार्य्ये, पितरमपि अहं न जानामि।

(२) त्वं चिन्तापरः सेनापतीराज्ञः प्रत्ययितः; एतौ धारितौ मया बलीवर्द्दौ, अवलोकय।

(३) त्वमपि राज्ञः प्रत्ययितोबलपतिः; तस्मात्त्वमपि अवलोकय।

(४) मयावलोकितं, त्वयावलोकितं भवति।

(५) यत्त्वयावलोकितं, तत् राज्ञा पालकेनावलोकितं।

Digitized by Google

चंद। अरे, उणामेहि धुरं (१)।

चेटः ॥ तथा करोति ॥

आर्य्यकः ॥ स्वगतं॥ अपि रक्षणीयमवलोकयन्ति। अथ स्वस्थोऽसि मन्दभाग्यः। अथवा।

भीमस्यानुकरिष्यामि, वाञ्छः प्रस्खलभविष्यति;
वरं व्यायतोमृत्युर्न गृहीतस्य बन्धने।

अथवा। साहसस्य तावदनवसरः।

चंद ॥ नाट्येन प्रवहणमारूढावलोकयति॥

आर्य्यकः। शरणागतोऽस्मि।

चंद ॥ संस्कृतमाश्रित्य॥ अभयं शरणागतस्य।

आर्य्यकः।

त्यजति किल तं जयश्रीर्जहति च मित्राणि बन्धुवर्गस्य,
भवति च सद्योपहास्यो, यः खलु शरणागतं त्यजति।

चंद। कधं? अज्जओगोवालदारओ, सेणवित्तासिदो विअ पत्तरहो, साउणिअस्स हत्थे णिवडिदो ॥ विचिन्त्य॥ एसो अणवराधो सरणाअदो; अज्जचारुदत्तस्स पवहणं आरूढो; पाणप्पदस्स मे अज्जसव्विलअस्स मित्तं; अलदो, रायणिओओ। ता किं दाणिं एत्थ जुत्तमणुचिट्ठिदुं। अधवा, जं भोदु, तं भोदु, पढमं जेव्व अभअं दिण्णं (२)

---

(१) अरे, उन्नामय धुरं।

(२) कथं आर्य्यकोगोपालदारकः, श्येनवित्रासितइव

भीदाभअपदाणं दत्तस्स परोवआररसिअस्स,
जइ होइ, होउ णासो, तहविअ खोए गुणोजेव्व।

॥ सभयमवतीर्य ॥ दिट्ठोअज्जो ॥ इत्यर्द्धोक्तेन ॥ अज्ज आ वसन्तसेणा। तदो एसा भणादि; जुत्तं णेदं, सरिसं णेदं, जं अहं अज्ज चारुदत्तं अहिसारिदुं गच्छंती, राअमग्गे परिभूदा (१)।

वीरकः। चंदनआ, एत्थ मह संसओ समुप्पण्णो (२)।

चंद। कधं दे संसओ? (३)

पक्षी, आकुनिकस्य हस्ते निपतितः। एष अनपराधः शरणागतः; आर्यचारुदत्तस्य प्रवहणं आरूढः; प्राणप्रदस्य मे आर्य शर्विलकस्य मित्रं; अन्यतो, राजनियोगः। तत्किमिदानीमत्र युक्तमनुष्ठातुं। अथवा, यद्भवतु तद्भवतु, प्रथममेवाभयं दत्तं।

(१) भीताभयप्रदानं ददतः परोपकाररसिकस्य,
यदि भवति, भवतु नाम स्तथापि खलु लोके गुणएव।

दृष्टआर्य्यः, आर्य्या वसन्तसेना। तत् एषा भणति; युक्तं नेदं, सदृशं नेदं, यदहं आर्य्यचारुदत्तं अभिसर्त्तुं गच्छन्ती, राजमार्गे परिभूता।

(२) चन्दनक, अत्र महान् संशयः समुत्पन्नः।

(३) कथं ते संशयः?

Digitized by Google

वीरकः। संभमघग्घरकंठो तुमं जादोसि जं तुए भणिदं,

दिट्ठो मए अज्जो; पुणो अज्जआ वसंतसेणे त्ति।

एत्थ मे अप्पच्चओ (१)।

चंद। अरे, को अप्पच्चओ तुह? वअं दक्खिणत्ता अव्वत्त भाषिणो, खस, खत्तिक्कडो, क्कडट्ठो, ऽविलअ, कर्णाट, कर्ण, प्रावरण, अंध्रविड, चोल, वीण, बर्ब्बर, खेरखान, मुख, मधु घानप्रभृतीनां, म्लेछजातीनां, अनेकदेशभाषाभिज्ञा, यथेष्टं मंत्रयामो, दिट्ठा दिट्ठो वा, अज्जोवा अज्जआ वा, किं शब्द विचारः स्त्रीपुन्नपुंसकव्याख्यानमप्रस्तुतं (२)।

वीरकः। णं अहंपि पलोएमि; राअआणा एसा; अहं रण्णोपत्तइदो (३)।

---

(१) संभ्रमघर्घरकण्ठस्त्वं जातोऽसि यत्त्वया भणितं,

दृष्टोमया खलु आर्य्यः; पुनरार्य्या वसन्तसेनेति।

अत्र मे अप्रत्ययः।

(२) अरे कः अप्रत्ययस्तव? वयं दाक्षिणात्या अव्यक्त भाषिणः, खसेत्यादीनि कुलदेशोपहितानि म्लेच्छजातिनामा नीति बोध्यं। मंत्रयामोभाषामहे दृष्टो दृष्टा वा, आर्य्योवा आर्य्या वा।

(३) ननु अहमपि प्रलोकयामि; राजाज्ञा एषा; अहं राज्ञः प्रत्ययितः।

Digitized by Google

चंद। ता किं अहं अप्पवञ्चो संवुत्तः (१)।

वीरकः। णं सामिणिओओ (२)।

चंद ॥ स्वगतं॥ अज्जगोवालदारओ अज्जचारुदत्तस्स पवहणमहिरुहिअ अवक्कमदित्ति, जइ कहिज्जदि, तदो अज्ज चारुदत्तो रण्णा सासिज्जइ; ता कोएत्थ उवाओ॥ विचिन्त्य॥ कण्णाटकलहएणओअं करेमि ॥ प्रकाशं॥ अरे, वीरअ, मए चंदणकेण पलोइदं, पुणोवि तुमं पलोएसि; कोतुमं? (३)

वीरकः। अरे, तुमंपि को? (४)

चंद। पूइज्जंतो, माणिज्जंतो तुमं अप्पणो जादिं अणुसरेसि (५)।

वीरकः ॥ सक्रोधं॥ अरे, का मह जादी? (६)

---

(१) तत्किमहमप्रत्ययितः सम्वृत्तः।

(२) ननु स्वामिनियोगः।

(३) आर्य्य गोपालदारकआर्य्यचारुदत्तस्य प्रवहण मधिरूढ अपक्रामतीति, यदि कथ्यते, तदा आर्य्यचारुदत्तो राज्ञा शास्यते; तत्कोऽत्र उपायः। कर्णाटकलहप्रयोगं करोमि। अरे, वीरक, मया चन्दनकेन प्रलोकितं, पुनरपि त्वं प्रलोकयसि, कस्त्वं?

(४) अरे त्वमपि कः?

(५) पूज्यमानोमान्यमानस्त्वमात्मनोजातिं अनुस्मरसि।

(६) अरे, का मम जातिः?

Digitized by Google

चंद। को भणउ (१)।

वीरकः। भणउ; अहवा ण भणउ! (२)

जाणंतोवि हि जादिं तुज्झ ण भणामि सीलविहवेण,
चिट्ठउ महच्चिअ मणे, किं च कदत्थेण भग्गेण (३)।

वीरकः। णं, भणउ, भणउ (४)।

चंद ॥ संज्ञां ददाति॥

वीरकः। अरे, किं णेदं (५)।

चंद। सिढिलिआअलहत्थो, पुरिसाणं कुक्कुडंठिसंठावणो,
कत्तरिवावुडहत्थो, तुमं पि सेणावई जादो (६)।

वीरकः। अरे चंदनआ, तुमंपि मानिज्जंतो, अप्पणोकेरिकं जादिं ण सुमरेसि (७)।

---

(१) कोभणतु।

(२) भणतु; अथवा न भणतु।

(३) जानन्नपि खलु जातिं तव भणामि शीलविभवेन,
तिष्ठतु ममैव मनसि, किञ्च कपित्थेन भग्नेन।

(४) ननु, भणतु, भणतु।

(५) किं नेदं।

(६) शीर्णशृगालकहस्तः, पुरुषाणां कुक्कुटग्रन्थिसंस्थापनः,
कर्त्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः।

(७) अरे चन्दनक, त्वमपि मान्यमान, आत्मनः कृतां जातिं न स्मरसि।

Digitized by Google

चंद। अरे, का मह चंदणअस्स चंदविसुद्धस्स जादी? (१)

वीरकः। को भणउ (२)।

चंद। भणउ, भणउ (३)।

वीरकः ॥ नाम्नैव संज्ञां ददाति ॥

चंद। अरे, किं णेदं (४)।

वीरकः। अरे, सुणाहि (५)।

जादी तुज्झ विसुद्धा, मादा भेरी, पिदावि ते पडहो,
दुम्मुह करअअभादा, तुमं पि सेणावइ जादो (६)।

चंद ॥ सक्रोधं॥ अहं चंदनओ चुआरओ! ता पलोए हि पवहणं (७)।

वीरकः। अरे, पवहणवाहआ, पडिवत्तावेहि, पवहणं पलोइस्सं (८)।

चेटः ॥ तथा करोति ॥

---

(१) अरे, का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः?

(२) को भणतु।

(३) भणतु, भणतु।

(४) अरे, किं नेदं।

(५) अरे, शृणु।

(६) जातिस्तव विशुद्धा, माता भेरी, पितापि ते पटहः,
दुर्मुख करटकभ्राता, त्वमपि सेनापतिर्जातः।

(७) अहं चन्दनकश्चर्मकारः! तदा प्रलोकय प्रवहणं।

(८) अरे प्रवहणवाहक, परिवर्त्तय प्रवहणं प्रलोकयिष्यामि।

Digitized by Google

॥ वीरकः बाह्येन प्रवहणमारोढुमिच्छति चंदनकः सहासं केशेषु गृहीत्वा पातयति, पादेन ताडयति ॥

वीरकः ॥ सक्रोधमुत्थाय ॥ अरे, अहं तुए वीसद्धे, राआणत्तिं करेन्तो, सहसा केसेसु गेण्हिअ पादेन ताडिदो। ता सुणु, रे; अहिअरणमज्झे जदि दे चउरंगं ण कड्ढावेमि, तदो ण होमि वीरओ (१)।

चंद। अरे राअउलं, अहिअरणं वा, वच; किं तए सुणअ सरिसेण (२)।

वीरकः ॥ तथेति निष्क्रान्तः ॥

चंद ॥ दिशोऽवलोक्य ॥ गच्छ, रे पवहणवाहआ, गच्छ। जइ कोवि पुच्छदि तदो भणेसि, चंदनअवीरएहिं अवलोइदं पवहणं वच्चदि। अज्जे वसन्तसेणे, इमं च अहिण्णाणं दे देमि (३)।

---

(१) अरे, अहं त्वया विश्रब्धो, राजाज्ञप्तिं कुर्वन्, सहसा केशेषु गृहीत्वा पादेन ताडितः। तत् शृणु, रे; अधिकरण मध्ये यदि ते चतुरङ्गं न क्षतयामि, तदा न भवामि वीरकः।

(२) अरे राजकुलं, अधिकरणं वा व्रज; किं त्वया शुनकसदृशेन।

(३) गच्छ, रे प्रवहणवाहक, गच्छ। यदि कोऽपि पृच्छति तदा भण, चन्दनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति। आर्ये वसन्तसेने, इदमभिज्ञानं ते ददामि।

Digitized by Google

॥ इति खड्गं प्रयच्छति ॥

आर्य्यकः ॥ खड्गं गृहीत्वा सहर्षमात्मगतं ॥

अये अस्तं मया प्राप्तं, स्पन्दते दक्षिणोभुजः,
अनुकूलञ्च सकलं, हन्त संरक्षितोऽयहं ।

चंद । अज्जए ।

एत्थ मए विस्सादा, पडिट्ठाविदा, चंदणअंपि सुमरेमि,
जं भणामि, एस लुद्धो णेहस्स रसेण वोल्लामो (१)।

आर्य्यकः ।

चन्दनस्यन्द्रशीलाढ्यो, दैवादद्य सुहृन्मम,
चन्दनं भो स्मरिष्यामि, सिद्धादेशस्तथा यदि ।

चंद । अभअं तुह देउ हरोविण्हु बंभा रवीअ चंदोअ ।
हत्तूण सत्तुवक्खं सुभणिसुभे जधा देवी (२)।

चेटः ॥ प्रवहणेन निष्क्रान्तः ॥

---

(१) आर्य्ये ।

अत्र मया विश्वस्ता प्रत्ययिता, चन्दनकमपि स्मरामि;
ननु भणामि, एष लुब्धः, स्नेहस्य रसेन सुवदामः ।

(२) अभयं तव ददातु हरोविष्णुर्ब्रह्मा रविश्च चन्द्रश्च,
हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ।

Digitized by Google

चंद ॥ नेपथ्याभिमुखमवलोक्य ॥ अरे, णिक्कमंतस्स पिअव अस्सो मे सव्विलओ पुट्ठिदोव्वेव्व अणुलग्गोगदो। भोदु, पधाणदंडधारओ, वीरओ, राअपच्चअआरो विरोधिदो; ता जाव अहंपि पुत्तभादुपडिबुद्धो एदंजेव्व अणुगच्छामि (१)।

॥ इति निष्क्रान्ताः सर्व्वे ॥

प्रवहणविपर्य्ययोनाम षष्ठोऽङ्कः।

---

(१) अरे, निष्क्रामतोमम प्रियवयस्यः, शर्व्विलकः पृष्ठतएवानुलग्नोगतः। भवतु, प्रधानदण्डधारको, वीरको, राजप्रत्ययकारकोविरोधितः; तत् यावदहमपि पुत्रभ्रातृपरिवृतएतमेवानुगच्छामि।

अथ सप्तमाङ्कः।

ततः प्रविशति चारुदत्तस्य विदूषकस्य।

विदू। भो, पेक्ख, पेक्ख, पुप्फकरण्डअजिण्णुज्जाणस्स सस्सिरीअदं (१)।

चारु। वयस्य, एवमेतत्; तथाहि;

वणिजइव भान्ति तरवः, पण्यानीव स्थितानि कुसुमानि,
गुल्कमिव साधयन्तोमधुकरपुरुषाः प्रविचरन्ति।

विदू। भो, इमं अवक्कारअमणीयं सिलाअलं उवविसदु भवं (२)।

चारु ॥ उपविश्य॥ वयस्य, चिरयति वर्द्धमानकः।

विदू। भणिदो मए, वड्ढमाणओ, वसन्तसेणिअं गेण्हिअ, लहुं लहुं आअच्छत्ति (३)।

चारु। भणितस्तत्किं चिरयति।

---

(१) भोः, पश्य, पश्य, पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकतां।

(२) भोः, इदमसंस्काररमणीयं; शिलातलमुपविशतु भवान्।

(३) भणितोमया, वर्द्धमानकः, वसन्तसेनां गृहीत्वा, लघु लघु आगच्छेति।

Digitized by Google

किं यात्यस्य पुरः, श्रमैः प्रवहणं तस्मान्तरं मार्गते,
भग्नेऽक्षे परिवर्त्तनं प्रकुरुते, क्लिश्नोऽथ वा प्रग्रहः,
कर्म्मान्तोजितदारुवारितगतिर्मार्गान्तरं याचते,
खैरं प्रेतितगोयुगः, किमथवा स्वच्छन्दमागच्छति।

॥ प्रविश्य गुप्तार्यकप्रवहणस्थः चेटः ॥

चेटः। जाध, गोणा, जाध (१)।

आर्य्यकः ॥ स्वगतं ॥

नरपतिपुरुषाणान्दर्शनाद्भीतभीतः,
स्खलिगतचरणत्वात्सावशेषापसारः;
अविदितमधिरूढोयामि, साधो सुयाने,
परभृतइव नीडे रचितोवायसीभिः।

अहो, नगरात्सुदूरमपक्रान्तोऽस्मि; तत्किमस्मात् प्रवहणादवतीर्य्य वृक्षवाटिकागहनं प्रविशामि। उताहो, प्रवहणस्वामिनं पश्यामि। अथवा, कृतं वृक्षवाटिकाग्रहणेन, अभ्युपपन्नवत्सलः खलु तत्र भवानार्य्यचारुदत्तः श्रूयतां, तत्प्रत्यक्षी कृत्य गच्छामि।

सतावदस्माद्व्यसनार्णवोत्थितंनिरीक्ष्य साधुःसमुपैति निर्वृतिं,
शरीरमेतद्गतमीदृशीन्दशां धृतं मया तस्य महात्मनोगुणैः।

चेटः। इमं तं उज्जाणं, जाव उपसप्पामि ॥ उपसृत्य ॥ अज्जमित्तेअ (२)।

---

(१) यात, गोणा, यात।

(२) इदं तदुद्यानं यावदुपसर्पामि आर्य्यमैत्रेय।

विदू। भो, पिअं दे णिवेदेमि; वड्ढमाणओ मंतेदि, आगदाए वसंतसेणाए होदव्वं (१)।

चारु। प्रियन्नः प्रियन्नः।

विदू। दासीपुत्ता, किं चिरददोसि (२)।

सेटः। अज्ज मित्तेअ, मा कुप्प, जाणत्थलके विसुमरिदेत्ति कदुअ, गदागदिं कलेन्ते चिलदूदेम्हि (३)।

चारु। वर्द्धमानक, परिवर्त्तय प्रवहणं। सखे मैत्रेय, अवतारय वसन्तसेनां।

विदू। किं णिअलेण से बद्धा गोडा, जेण सअं णोदरदि ॥ उत्थाय प्रवहणमुद्वाह्य॥ भो, ण वसन्तसेणा, वसंतसेणो क्खु एसो (४)।

चारु। वयस्य, अलं परिहासेन; न कालमपेक्षते स्नेहः। अथवा स्वयमेवावतारयामि ॥ इत्युत्तिष्ठति॥

आर्य्यकः ॥ दृष्ट्वा॥ अये, अयमेव प्रवहणस्वामी, न केवलं श्रुतिरमणीयो, दृष्टिरमणीयोऽपि; हन्त, रक्षितोऽस्मि।

---

(१) प्रियं ते निवेदयामि; वर्द्धमानको मन्त्रयति, आगतया वसन्तसेनया भवितव्यं।

(२) दासीपुत्र, किं चिराधितोऽसि।

(३) आर्य्य मैत्रेय, मा कुप्य, यानास्तरणं विस्मृतमिति कृत्वा, गतागतं कुर्व्वन् चिराधितोऽस्मि।

(४) किं निगडेनास्याः पादौ बद्धौ, येन स्वयं नावतरति। न वसन्तसेना, वसन्तसेनः खल्वेषः।

Digitized by Google

चारु ॥ प्रवहणमधिरुह्य दृढा च॥ अये तत्कोऽयं?

करिकरसमबाहुः, सिंहपीनोन्नतांसः,
पृथुतरसमवक्षास्ताम्रलोलायताक्षः,
कथमिदमसमानं प्राप्तएवंविधोयो
वहति निगडयुग्मं, पादलग्नं महात्मा ।

ततः कोभवान्?

आर्य्यकः। शरणागतोगोपालप्रकृतिरार्य्यकोऽस्मि।

चारु। किं, घोषादानीय योऽसौ राज्ञा पालकेन बद्धः।

आर्य्यकः। अथकिं।

चारु। विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः;
अपि प्राणानहं जह्यां, न तु त्वां शरणागतं।

आर्य्यकः ॥ हर्षं नाटयति॥

चारु। वर्द्धमानक, चरणाभ्यिगलमपनय।

चेटः। जं अज्जोआणवेदि ॥ तथा कृत्वा॥ अज्ज अवणीदाणि णिअलाणि (१)।

आर्य्यकः। खेदमयान्यन्यानि दृढतराणि रज्जानि।

विदू। सङ्गच्छेहि णिअलाइं एसोवि मुक्को; सम्पदं अम्हे वञ्चिस्सामो (२)।

---

(१) यदार्य्याज्ञापयति। आर्य्य अपनीतानि निगडानि।

(२) संगच्छस्व निगडेषु एषोऽपि मुक्तः; साम्प्रतं वयं व्रजिष्यामः।

चारु। धिक् भ्रान्तं।

आर्य्यकः। सखे, चारुदत्त, अहमपि प्रणयेनेदं प्रवहणमारूढः, तत् चलन्तव्यं।

चारु। अलं; क्लान्तोऽस्मि स्वयंग्राहप्रणयेन भवता।

आर्य्यकः। अभ्यनुज्ञातोभवता गन्तुमिच्छामि।

चारु। गम्यतां।

आर्य्यकः। भवत्सवतरामि।

चारु। सखे, नावतर्त्तव्यं। प्रत्यापनीतसंयमनस्य भवतो अलघुसंचारा गतिः। सुलभपुरुषसञ्चारेऽस्मिन्प्रदेशे प्रवहणं विश्वासमुत्पादयति; तत्प्रवहणेनैव गम्यतां।

आर्य्यकः। यथाह भवान्।

चारु। क्षेमेण व्रज बान्धवान्।

आर्य्यकः। ननु मया सभोभवान् बान्धवः।

चारु। स्मर्त्तव्योऽस्मि कथान्तरेषु भवता।

आर्य्यकः। स्वात्मापि विस्मर्य्यते।

चारु। त्वां रक्षन्तु पथि प्रयान्तममराः

आर्य्यकः। संरक्षितोऽहं त्वया।

चारु। स्वैर्भाग्यैः परिरक्षितोऽसि।

आर्य्यकः। ननु हेतवापि हेतुर्भवान्।

चारु। यत्नोद्यते पालके महती रक्षा वर्त्तते, तत् शीघ्रमवक्रामतु भवान्।

Digitized by Google

आर्य्यकः। एवं पुनर्दर्शनाय ॥ निष्क्रान्तः ॥

चारु। श्रुत्वैवं मनुजपतेर्महद्व्यलीकं,
स्थातुं हि क्षणमपि न प्रभुस्समस्मिन्।
मैत्रेय, क्षिप निगडं पुराणकूपे;
पश्येयुः क्षितिपतयोहि चारदृष्ट्या।

॥ वामाक्षिस्पन्दनं सूचयित्वा ॥ सखे, मैत्रेय, वसन्तसेना दर्शनोत्सुकोऽयं जनः ॥ पश्य ॥

अपश्यतोऽद्य तां कांतां वामं स्फुरति लोचनं,
अकारणपरिचस्तं हृदयं व्यथते मम।

तद्देहि, गच्छावः ॥ परिक्रम्य ॥ कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनं ॥ विचार्य ॥ प्रविरलजनेन पथा, वसन्तसेनायै नैव पथा गच्छामः ॥ इति निष्क्रान्ताः सर्व्वे ॥

आर्य्यकापहरणं नाम सप्तमोऽङ्कः।

Digitized by Google

अथाष्टमाङ्कः।

ततः प्रविश्यार्द्रचीवरहस्तोभिक्षुः।

भिक्षुः। अम्भाः!

कलेध धम्मसंचयं, जग्गोध ज्झाणपउहेण,
विषमा इंदिअचोला हलंति चिरसञ्चिदं धम्मं।

अविअ।

पञ्चज्जाए जेण मालिदा, इच्छिअ मालिअ, गाम लक्खिदे,
अवलेअ चंडाल मालिदे, अवसं से सग्गा गाहदि।
णिलमुण्डअ, मुण्ड मुण्डिदे, चित्तू ण मुण्डिदे, कीस मुंडिदे,
जाहपुण अ चित्त मुण्डिदे, साउ सुद्धु णिल ताहमुण्डिदे (१)

---

(१) हे अम्भाः।

कुरुध्वं धर्मसञ्चयं, नित्यं जागृत ध्यानपटहेन,
विषमाइन्द्रियचोराहरन्ति चिरसञ्चितं धर्मं।

पञ्चेन्द्रियाणियेनमारितानि, अविद्याश्चमारयित्वा, गाचंरक्षितं,
अवलम्बाहङ्कारोमारितो, ऽवश्यं स पुनः स्वर्गं गाहते।

हे शिरोमुण्डक, मुण्डं मुण्डितं, चित्तं न मुण्डितं, किंमुण्डितं।
यस्य पुनश्च चित्तं मुण्डितं, साधुः शुद्धः तस्य शिरोमुण्डितं।

Digitized by Google

गिहिदं कसाओदके एअ चीवले, जाव एदं लहिअ, आलकाहकेलके उज्जाणे पविसिअ, पोक्खलिणीए पक्खालिअ, लहुं लहुं अवक्कमिस्सं (१)।

॥ परिक्रम्य तथा करोति। नेपथ्ये ॥ चिट्ठ, अरे दुट्ठअमणक, चिट्ठ (२)।

भिक्षुः ॥ हद्धा सभयं॥ ही अविदमाणहे! एसे से लाअआलअंठाणे आअदे; एकेण भिक्खुणा अवलाहेकिदे, अण्णंपि जहिं जहिं भिक्खुं पेक्खदि, तहिं तहिं गोणट्ठणासं विन्धिअ ओवाहेदि। ता कहिं अअलणे अलणं गमिस्सं। अधवा, भट्टालके ज्जेव बुड्ढे मे अलणे (३)

॥ प्रविश्य सखड्गेन विटेन सह अकारः ॥ चिट्ठ, रे दुट्ठ अमणक, चिट्ठ! आवाणअमज्झपविट्ठस्स विअ ते तुम्हमूलअस्स सीसं ते भोडइस्सं (४) ॥ इति ताडयति ॥

---

(१) गृहीतं कषायमिदं चीवरं, यावदिदं गृहीत्वा, श्लाघनक कृतेउद्यानेप्रविश्य,पुष्करिण्यां प्रक्षाल्य,लघु लघुअवक्रमिष्यामि।

(२) तिष्ठ, रे दुष्टश्रमणक, तिष्ठ।

(३) भो आश्चर्यं! एषराजश्यालकसंस्थानकआगतः। एकेन भिक्षुणा अपराधे कृते, अन्यमपि यत्र यत्र भिक्षुं पश्यति, तत्र तत्र नासिकां विद्धा अपवाहयति; तस्मात्कुत्र अहरणः शरणं गमिष्यामि। अथवा भट्टारकएव बुद्धोमे शरणं।

(४) तिष्ठ, रे दुष्ट श्रमणक, तिष्ठ। आपानकमध्यप्रविष्टस्यापि तवमूलकस्य शीर्षं ते भंक्ष्यामि।

Digitized by Google

विटः। काणेल्लीमातः! न युक्तं निर्वेदधृतकषायं भिक्षुं ताडयितुं; तत्किमनेन। इदन्तावत्सुखोपगम्यमुद्यानं पश्यतु भवान्।

अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म,
हृदयमिव दुरात्मनामगुप्तंनवमिव राज्यमनिर्जितोपभोग्यं।

भिक्षुः। आअदं, पसीददु उवासके (१)।

अकारः। भावे, पेक्ख, पेक्ख, आक्कोअदि मं (२)।

विटः। किं ब्रवीति।

अकारः। उवासकेत्ति मं भणादि। किं, दुगे णाविन्दे? (३)

विटः। बुद्धोपासकइति भवन्तं स्तौति।

अकारः। सुणु, अमणका, सुणु (४)।

भिक्षुः। तुमं धण्णे, तुमं पुण्णे (५)

अकारः। भावे, धण्णे पुण्णेत्ति मं भणादि। किं, दुगे अस्सावके, कोट्टके वा? (६)

---

(१) स्वागतं, प्रसीदतु उपासक।

(२) विदन्, पश्य, पश्य, आक्रोशति मां।

(३) उपासक, इति मां भणति; किमहं नापितः?

(४) शृणु श्रमणक।

(५) त्वं धन्यस्त्वं पुण्यः।

(६) धन्यः पुण्यइति मां भणति; किमहं श्रावको, कोष्ठकावा?

Digitized by Google

विटः। काणेल्लीमातः! ननु धन्यस्सं, पुण्यस्सं, इति भवन्तं स्तौति।

शकारः। भावे, ता कीश एसे इध आगदे? (१)

भिक्षुः। इदं चीवरम्भं पक्षालिदुं (२)।

शकारः। अले दुट्ठश्रमणक; एसे मम वहिणीवदिणा श्रय्युज्जाणाणं पवले पुप्फकलंडुज्जाणे दिण्णे; जहिं दाव शुण्ण हका शिआला पाणिअं पिअन्ति; हगेवि पवलपुलिशे मणुश्शके ण णहाआमि। तहिं तुमं पुक्खलणीए पुलाणकुलुत्थजूश श्रवलादं उद्दश्शगन्धिआदं चीवलादं पक्खालेशि। ता तुमं एक्कपहालिअं कलेमि (३)।

विटः। काणेल्लीमातः! तथा तर्जयामि यथानेन चिर प्रव्रजितेन भवितव्यं।

शकारः। कथं, भावे जाणादि (४)।

---

(१) तस्मात् कथमेष इहागतः।

(२) इदं चीवरकं प्रक्षालितुं।

(३) अरे, दुष्ट श्रमणक, एतन्मम भगिनीपतिना सर्व्वोद्यानानां प्रवरं पुष्पकरण्डोद्यानं दत्तं; यत्र तावत् शुनकाः शृगालाः पानीयं पिबन्ति; अहमपि प्रवरपुरुषोमनुष्यकः न स्नामि। तत्र त्वं पुष्करिण्यां पुराणकुलित्थयूषसवर्णानि उग्र गन्धीनि चीवराणि प्रक्षालयसि। तत् त्वामेकप्रहारिकं करोमि।

(४) कथं विद्वान् जानाति।

Digitized by Google

विटः। किमत्र श्रेयं; पश्य;

अद्यार्यस्य तथैव केशविरहाद्वैरी लताटच्छविः;
कालस्याक्षयतया च चीवरवृतः स्कन्धे न जातः क्षिणः;
नाभ्यस्ता च कषायवस्त्ररचना दूरं निगूढान्तरं,
वस्त्रान्तश्च पटोक्षयाग्रथिलं स्कन्धे न सन्तिष्ठते।

भिक्षुः। उवासके, एवं अचिरप्पव्वजिदे हगे (१)।

प्रकारः। ता कीस तुमं जातमेत्तकं जेव्व, ण पव्वजिदे (२)॥ इति ताडयति॥

भिक्षुः। णमो बुद्धस्स (३)।

विटः। किमनेन ताडितेन तपस्विना? मुच्यतां; गच्छतु।

प्रकारः। अले, चिट्ठ दाव, जाव सम्पधारेमि (४)।

विटः। केन सार्द्धं।

प्रकारः। अत्तणो हडुक्केण (५)।

विटः। हन्त, न गतं।

प्रकारः। पुत्तका हलक्का, भट्टके पुत्तक, एसे श्रमणके अवि णाम किं गच्छदु, किं चिट्ठदु; स्वयं णावि गच्छदु, णावि

---

(१) उपासक, एवं अचिरप्रव्रजितोऽहं।

(२) किमर्थं त्वं जातमात्रएव न प्रव्रजितः।

(३) नमोबुद्धस्य।

(४) अरे तिष्ठ तावत्, यावत् संप्रधारयामि।

(५) आत्मनोहृदयेन।

Digitized by Google

चिट्ठदु । भावे, संपधारिदं मए हदएण सह; एसे मह हदए भणादि (१)।

विटः। किं ब्रवीति?

शकारः। मावि गच्छदु, मावि चिट्ठदु; मावि उच्चसदु, मावि णीसचसदु; दधब्भेव्व झत्ति पडिअ मलेदु (२)।

भिक्षुः। णमो बुद्धस्स, अरणागदोम्हि (३)।

विटः। गच्छतु।

शकारः। णं समएण (४)।

विटः। कीदृशः समयः।

शकारः। तधा कद्दमं फेलदु, जधा पाणिअं पंकाविलं ण होदि। अधवा, पाणिअं पुञ्जीकदुअ कद्दमं फेलदु (५)।

---

(१) पुनक हृदय, भट्टारक पुनक, एष श्रमणकः अपि नाम किं गच्छतु, किं तिष्ठतु, स्वयं नापि गच्छतु, नापि तिष्ठतु। संप्रधारितं मया हृदयेन सह; एतन्मम हृदयं भणति।

(२) मापि गच्छतु, मापि तिष्ठतु; मापि उच्छ्वसितु, मापि निःश्वसितु; दृढमेव झटिति पतित्वा म्रियतां।

(३) नमोबुद्धस्य, शरणागतोऽस्मि।

(४) ननु समयेन।

(५) तथा कर्दमं क्षिपतु, यथा पानीयं पङ्कावित्वं न भवति। अथवा, पानीयं पुञ्जीकृत्य कर्दमं क्षिपतु।

विटः। अहो मूर्खता।

विपर्य्यस्तमनस्कैष्टैः क्रियाप्रकरणवर्जनैः,
मांसवृद्धैरियं मूर्खैर्भाराक्रान्ता वसुन्धरा।

भिक्षुः ॥ नार्योवाक्यमिति ॥

शकारः। किं भणादि? (१)

विटः। स्तौति भवन्तं।

शकारः। भणु, भणु, पुणोवि भणु (२)।

॥ तथा कृत्वा निष्क्रान्तोभिक्षुः ॥

विटः। काणेलीमातः! पश्चेदानस्य शोभां।

अमी हि वृक्षा फलपुष्पशोभिताः, कठोरनिष्यन्दसनोपकेष्टिताः,
नृपाश्रया रक्षिजनेव पालिता नराः सदाराइव चान्ति निर्वृतिं।

शकारः। सुट्ठु भावे भणादि (३)।

वनकुसुमविचिन्तिता च भूमी,
कुसुमभरेण विनामिताश्च वृक्षाः;
द्रुमशिखरगताच रम्यमाणा, पवनफलानीव वानरा लभन्ति।

---

(१) किं भणति।

(२) भणु, भणु, पुनरपि भणु।

(३) सुष्ठु भावोभणति।

वनकुसुमविचिन्तिता च भूमी, कुसुमभरेण विनामिताश्च वृक्षाः;
द्रुमशिखरगताच रम्यमाणा, पवनफलानीव वानरा लभन्ति।

Digitized by Google

विटः। काणेलीमातः! इदं निशातलमधास्यतां।

शकारः। एशोह्मि आशिदे॥ इति विटेन सह उपविशति॥ भावे, अज्जवि तं वशंन्तसेणिअं मुमलामि; दुज्जणवअणं विअ हडक्काहो ण ओदलदि (१)।

विटः ॥ स्वगतं॥ तथा निरस्तोऽपि स्मरति तां।

अथवा। स्त्रीभिर्विमानितानां कापुरुषाणां विवर्द्धते मदनः,
यत्पुरुषस्य सएव नुभवतिमृदुर्नैव वा भवति।

शकारः। भावे, कावि वेला थावरकचेडस्स भणिदश्श, पवहणं गेण्हिअ, लहुं लहुं आगच्छेत्ति। अज्जवि णागच्छदित्ति, चिलम्हि बुभुक्खिदे; मज्झन्हे ण शक्कीअदि पादेहिं गन्तुं। ता पेक्ख, पेक्ख;

णहमज्झगदे शूले दुप्पेक्खे कुविदवाणलशलिके,
भूमी दहशंतप्ता, हदपुत्तशदेव्व गन्धारी (२)।

---

(१) एषोऽस्मि आसितइति। भाव, अद्यापि तां वसन्त सेनां स्मरामि; दुर्जनवचनमिव हृदयान्नावतरति।

(२) भाव, कापि वेला स्थावरकचेटस्य भणितस्य, प्रवहणं गृहीत्वा, लघु लघु आगच्छेति। अद्यापि नागच्छतीति, चिरमस्मि बुभुक्षितः; मध्याह्ने न शक्यते पादाभ्यां गन्तुं। तत् पश्य, पश्य;

नभोमध्यगतः सूरोदुष्प्रेक्ष्यः कुपितवानरसदृक्षः,
भूमी दहशंतप्ता, हतपुत्रशतेव गान्धारी।

Digitized by Google

विटः। एवमेतत्।

छायासु प्रतिमुक्तयूथकवलं निद्रायतो गोकुलं;
तृष्णार्त्तैश्च निपीयते वनमृगैरल्पं पयः सारसं;
यस्मात्पादतिरश्चितैर्न नगरीमार्गो नरैः सेव्यते;
तस्मात् भूमिमपास्य च प्रवहणं मन्ये क्षणं संस्थितं।

चारुदत्तः। भावे,

गिम्हम्मि मम णिद्दोणे, भाव, सुज्जस्स पादे,
अउणिद्धगविहङ्गा सुक्खच्छायासु सीआ;
णरपुरिसमणुच्चा उद्धदीहं मुअन्ता,
घणसअणणिसण्णा आदवं णिव्वहन्ति।

भावे। अज्जवि स चेडे णागच्छदि। अत्तणो विणोदस्स णिमित्तं किं पि गाइस्सं ॥ इति गायति ॥ भावे, सुदं तुए जं मए गाइदं? (१)

विटः। किमुच्यते; गन्धर्वोभवान्।

---

(१) ग्रीष्मे मम निद्रोणे, भाव, सूर्यस्य पादः;
अकुनिद्धगविहङ्गाः तरुच्छायासु सीनाः,
नरपुरुषमनुष्यादीर्घमुष्णं मुञ्चन्तो
गृहशयनणिषण्णाश्चातपं निर्व्वहन्ति।

भाव, अद्यापि स चेटः नागच्छति। आत्मनो विनोदस्य निमित्तं किमपि गास्यामि। भाव, श्रुतं त्वया यन्मया गीतं।

Digitized by Google

प्रकारः। कधं, गन्धव्वो ण भविस्सं?

हिंगुज्जला, जीरकभद्दमुत्थे, वचाहगण्ठी, सगुडाहमुण्ठी,
एआ मए सेविदगन्धजुत्ती, कधं ण हग्गो मधुरस्सरत्ति?
भावे, पुणोवि दाव गाइस्सं ॥तथा करोति॥ भावे, भावे,
सुदं तुए जं मए गाइदं (१)।

विटः। किमुच्यते; गन्धर्वो भवान्।

प्रकारः। कधं गन्धव्वो ण भवामि।

हिङ्गुज्जले, दीणमरिचचुण्णे वग्घारिदे, तेलघिएहि मिस्से,
भुत्ते मए, पारद्धदीअमंसे; कधं ण हग्गो मधुरस्सरत्ति?
भावे, अज्जवि चेडे णागच्छदि (२)।

विटः। स्वस्थोभवतु भवान्; संप्रत्येवागमिष्यति।

॥ ततः प्रविशति प्रवहणाधिरूढा वसन्तसेना चेटश्च ॥

---

(१) कथं, गन्धर्वो न भविष्यामि?

हिङ्गूज्ज्वला, जीरकभद्रमुस्ता, वचायाग्रन्थिः, सगुडा शुण्ठी,
एषा मया सेविता गन्धयुक्ता, कथं नाहं मधुरस्वर, इति?
भाव, पुनरपि तावत् गास्यामि। भाव, भाव, श्रुतं त्वया
यन्मया गीतं।

(२) कथं गन्धर्वो न भवामि।

हिङ्गूज्ज्वलं, दत्तमरीचचूर्णं व्याघारितं, तैलघृतैः मिश्रं,
भुक्तं मया, भारभृतीयमांसं; कथं नाहं मधुरस्वरइति?
भाव, अद्यापि चेटोनागच्छति।

Digitized by Google

चेटः। भीदे क्खु हगो, मज्जहण्हिके मुज्जे; मा दाणिं कुविदे लाअग्गाकलंठाणे उविग्गदि। ता तुलिदं वहामि। जाध, गोणा, जाध (१)।

वसन्तसेना। हद्धी हद्धी! ण उ वड्ढमाणअस्स अग्गं सर संजोग्गो; किलेदं? किं णउ अज्जचारुदत्तेण वाहणपडिस्समं परिहरन्तेण, अण्णोमणुस्सो, अण्णपवहणं, पेसिदं भविस्सदि? फुरदि दाहिणं लोअणं, वेवदि मे हिअअं, सुण्णाओ दिसाओ, सव्वं ज्जेव विसंठुलं पेक्खामि (२)।

प्रकारः॥नेमिघोषमाकर्ण्य॥ भावे, आगदे पवहणे (३)।

विटः। कथं जानासि?

प्रकारः। किं ण पेक्खदि भावे? वुड्ढुग्घुअले विअ घुलघुला अमाणे लक्खीअदि (४)।

---

(१) भीतः खल्वहं; माध्याह्निकः सूर्य्यः; मा दानीं कुपितः राजश्यालसंस्थानकोभविष्यति। तत् त्वरितं वहामि। यात, वृषभा, यात।

(२) हा धिक्, हा धिक्; न खलु वर्द्धमानकस्यायं स्वरसंयोगः किंनेदं? किं न खलु आर्य्यचारुदत्तेन वाहनपरिश्रमंपरिहरता, अन्योमनुष्यः, अन्यत् प्रवहणं, प्रेषितं भविष्यति। स्फुरति दक्षिणं लोचनं, वेपतेमे हृदयं; शून्यादिशः, सर्व्वमेवविसंष्ठुलं पश्यामि।

(३) आगतं प्रवहणं।

(४) किं न पश्यति भावः? वृद्धघूत्कारइव घुरघुरायमाणं लक्ष्यते।

Digitized by Google

विटः ॥ हुङ्हा ॥ साधु खचितं; अवसागतः।

प्रकारः। पुचका थावलक, चेडा, आगलेसि? (१)

चेटः। अधइं? (२)

प्रकारः। पवहणेवि आगले? (३)

चेटः। अधइं? (४)

प्रकारः। गोणावि आगले? (५)

चेटः। अधइं? (६)

प्रकारः। तुमंपि आगदे? (७)

चेटः ॥ सचारं ॥ भट्टके, अहंवि आगदे (८)।

प्रकारः। ता पवेशहि पवहणं (९)।

चेटः। कदलेण मग्गेण (१०)।

---

(१) पुचक स्थावरक, चेट, आगतोऽसि?

(२) अथकिं?

(३) प्रवहणमपि आगतं?

(४) अथ किं?

(५) वृषभो अपि आगतौ?

(६) अथ किं?

(७) त्वमपि आगतः?

(८) भट्टारक, अहमपि आगतः।

(९) तस्मात् प्रवेशय प्रवहणं।

(१०) कतरेण मार्गेण।

Digitized by Google

प्रकारः। एदेण जेव्व पगारसण्डेण(१)।

चेटः। भट्टके, गोणा मलेत्ति, पवहणेवि भज्जदि, हगे वि चेडे मलामि (२)।

प्रकारः। अले, लाअग्गालके हगो, गोणा मले अवलं कीलिस्सं; पवहणे भग्गेऽवलं घडादस्सं; तुमं मले अणे पवहणवाहके ऊविस्सदि (३)।

चेटः। अम्हं उववणं ऊविस्सदि; हगो अत्तकेलके ण ऊविस्सं(४)।

प्रकारः। अले, अव्वंवि णस्सदु, पगारसण्डेण पवेसेहि पवहणं(५)।

चेटः। विभज्ज से पवहण अमं आमिणा विभज्ज। अले

---

(१) एतेनैव प्राकारखण्डेन।

(२) भट्टारक, वृषभाश्रियन्ते, प्रवहणमपि भज्यते, अहमपि चेटोश्रिये।

(३) अरे, राजश्यालकोऽहं; वृषभा मृता अपरं क्रेष्यामि; प्रवहणं मग्नं अपरं कारयिष्यामि; त्वं मृतः अन्यः प्रवहणवाहकोभविष्यति।

(४) सर्व्वं उपपन्नं भविष्यति; अहमात्मनः कृते न भविष्यामि।

(५) अरे, सर्व्वमपि नश्यतु; प्राकारखण्डेन प्रवेशय प्रवहणं।

Digitized by Google

पवहणे भोदु, भट्टके गदुअ णिवेदेमि ॥ प्रविश्य ॥ कधं ण भग्गो? भट्टके एत्ते उवत्थिदे पवहणे (१)।

अकारः। णंछिआ गोणा ण मआ, लम्मतुमंपि ण मले? (२)

चेटः। अधदं? (३)

अकारः। भाव, आगच्छ; पवहणं पेक्खामो। भावे, तुमं पि मे गुरु, पढमगुरु, पेक्खीअदि आदलके अब्भन्तलकेत्ति, तुमं दाव पवहणं अग्गादो अहिरुह (४)।

विटः। एवं भवतु ॥ इत्यारोहति ॥

अकारः। अधवा चिट्ठ तुमं; तुह एक्कलके पवहणे जेव्व तुमं अग्गादो अहिरुहसि? हगो पवहणआमी अग्गादो पवहणं अहिरुहामि (५)।

---

(१) विभंज रे प्रवहणं समं स्वामिना विभंज। अन्यत् प्रवहणं भवतु, भट्टारकं गत्वा निवेदयामि। कथं न भग्नं? भट्टारक, एतदुपस्थितं प्रवहणं।

(२) ननु, पुंश्चलीज, वृषभान न हताः, त्वमपि न हतः।

(३) अथकिं?

(४) भाव, आगच्छ, प्रवहणं पश्यामः। भाव, त्वमपि मे गुरुः, प्रथमगुरुः, प्रेक्ष्यसे सादरकः अभ्यन्तरकइति, तं तावत् प्रवहणमग्रतोऽधिरोह।

(५) अथवा तिष्ठ त्वं; तव प्रस्तुतं प्रवहणं येन त्वमग्रतोऽधिरोहसि? अहं प्रवहणस्वामी अग्रतः प्रवहणमधिरोहामि।

विटः। भवानेवं ब्रवीति।

प्रकारः। जइवि हगो एवं भणामि, तधावि तुए मेला अले, अहिरुहेत्ति भट्टके, भणिअं (१)।

विटः। आरोहतु भवान्।

प्रकारः। एसे संपदं अहिलुहामि। पुत्तका थावलका चेडा, पडिवत्तावेहि पवहणं (२)।

चेटः ॥ परावृत्य ॥ अहिलुहदु भट्टालके (३)।

प्रकारः ॥ अधिरुह्यावलोक्य च शङ्कां नाटयित्वा त्वरित मवतीर्य्य विटं कण्ठे अवलम्ब्य ॥ भावे, मडे! पवहणाधिरूढा लक्खणी चोले वा पलिवसदि; ता जइ लक्खणी, तदो उभवि मूसे; अध चोले, ता उभेवि खज्जे (४)।

---

(१) यद्यप्यहमेवं भणामि, तथापि तवैष आचारः, अधिरोहेति भट्टारकं, भणितुं।

(२) एष सामन्तं अधिरोहामि। पुत्रक स्थावरक चेट परिवर्त्तय प्रवहणं।

(३) अधिरोहतु भट्टारकः।

(४) भाव, अहं खिन्ने; प्रवहणाधिरूढा राक्षसी चोरोवा प्रतिवसति; तत् यदि राक्षसी, तदा उभावपि मुषितौ; अथ चोरः, तदा उभावपि खादितौ।

Digitized by Google

विटः। न भेतव्यं; कुतोऽत्र वृषभयाने राजश्यालस्यावसरः। मा नाम; ते मध्याह्नार्कतापखिन्नदृष्टेः स्थावरकस्य सकञ्चुकां छायां दृष्ट्वा, भ्रान्तिरुत्पन्ना।

शकारः। पुत्तका थावलका चेडा जीवेसि? (१)

चेटः। अथदं? (२)

शकारः। भावे, पवहणादिं दुत्तिआ पडिवअदि; ता अवलोएहि (३)।

विटः। कथं? स्त्री!

अवनतशिरसः प्रयासभीरुं पथि, वृषभादव वर्षताडिताक्षाः;
ममहि यदसि गौरवप्रियस्य कुलजनदर्शनकातरं हि चक्षुः।

वसं ॥सविस्मयमात्मगतं॥ कधं, मम एअणाणं आआस अरो जेव्व राअआलओ; ता संवुत्तदंहि, मन्दभाआ! एसो दाणिं मम मन्दभाइणीए ऊसरच्छेतपडिदाविअ वीअमुट्ठी णिप्फलो दुध आगमणो संवुत्तो; ता किं एत्थ करइस्सं? (४)

---

(१) पुचक स्थावरक चेट जीवसि?

(२) अथकिं?

(३) प्रवहणात्स्त्री प्रतिवर्षति; तदवलोकय।

(४) कथं मम नयनयोरायासकर एव राजश्यालः। तत् संवृतासि, मन्दभाग्या! एतदिदानीं मम मन्दभागिन्या

शकारः। कादरे खलु एसे वुड्ढचेडे पवहणं णावलोएदि। भावे, आलोएहि पवहणं (१)।

विटः। कोदोषः। भवलेवं तावत्।

शकारः। कधं मिआलआ उड्डएन्ति, वाअसा वसन्ति; ता, जाव भावे अक्खीहिं भक्खीअदि, दन्तेहिं पेक्खीअदि, ताव इमे पसाहइस्सं (२)।

विटः ॥ वसन्तसेनां दृष्ट्वा, सविषादमात्मगतं॥ कथं! अये, मृगी व्याघ्रमनुसरति। भोः कष्टं!

शरच्चन्द्रप्रतीकाशं पुलिनान्तरशायिनं,
हंसी हंसं परित्यज्य, वायसं समुपस्थिता।

॥ जनान्तिकं॥ वसन्तसेने न युक्तमिदं, नापि सदृशमिदं; पूर्वं मानादवज्ञाय इदार्थे जननीवज्ञात्?

॥ वसन्तसेना शिरस्यालपति ॥

ऊषरक्षेत्रपतितइव बीजमुष्टिः निष्फलमिहागमनं सम्पृक्तं; तत्किमत्र करिष्यामि।

(१) कातरः खल्वेष वृद्धचेटः प्रवहणं नावलोकयति। भाव आलोकय प्रवहणं।

(२) कधं मृगाला उड्डयन्ते, वायसाश्च जग्धि; तत् यावत् भावः अक्षिभ्यां भक्ष्यते, दन्तैः प्रेक्ष्यते, तावदहं पसाधयिष्ये।

Digitized by Google

विटः। अग्रौढीर्य्यस्वभावेन वेशभावेन मन्यते।

ननूक्तमेव मया भवतीं प्रति।

सममुपचर, भद्रे, सुप्रियं वाप्रियं वा।

वसं। पवहणविपञ्जासेण आअदा, सरणागदम्हि (१)।

विटः। न भेतव्यं, न भेतव्यं। भवत्येनं वञ्चयामि ॥ प्रकार मुपगम्य ॥ काणेल्लीमातः! सत्यं राक्षस्येवाच प्रतिवसति।

प्रकारः। भावे, भावे, जइ रक्खसी पडिवसदि, ता कीस ण तुमं मूसेदि? अथवा, चोडे, ता किं तुमं ण भक्खिदे? (२)

विटः। किमनेन विरूपितेन; यदि पुनरुद्यानपरम्परया पद्भ्यामेव नगरीमुज्जयिनीं प्रविशावः, तदा कोदोषः स्यात्।

प्रकारः। एवं किदे, किं भोदि (३)।

विटः। एवं कृते, व्यायामः सेवितो, धुर्य्याणां च परिश्रमः परिहृतोभवति।

प्रकारः। एवं भोदु। थावलआ चेडा, णेह पवहणं; अथवा, चिट्ठ, चिट्ठ। देवदाणं वन्दणाणं च अग्गदोचलणेण गच्छामि। णहि, णहि, पवहणं अहिलुहिअ गच्छामि। जेण

---

(१) प्रवहणविपर्य्यासेनागता, शरणागताऽस्मि।

(२) यदि राक्षसी प्रतिवसति, तत्किं न त्वां मुष्णाति? अथवा चौरः तदा किं त्वं न भक्षितः?

(३) एवं कृते किं भवति।

दूअदो मं पेक्खिअ भणिस्सदि, एसे से लट्ठिअग्गाहे भट्टा लके गच्छदि (१)।

विटः ॥ स्वगतं ॥ दुःकरं विषमोषधीकर्त्तुं। भवत्वेवं तावत् ॥ प्रकाशं ॥ काणेलोमातः, एषा वसन्तसेना भवन्तमभिसारयितुमागता।

वसं। यन्तं, पावं! (२)

शकारः ॥ सहर्षं॥ भावे, मं पवलपुरिसमणुस्सं वासुदेवाकं (३)।

विटः। अथकिं?

शकारः। तेण हि अपुव्वा सिरी समासादिदा, तस्सिं काले मए रोसाविदा; सम्मदं पादेसुं पडिअ पसादेमि (४)।

विटः। साध्वभिहितं।

---

(१) एवं भवतु। स्थावरक चेट, नय प्रवहणं; अथवा, तिष्ठ, तिष्ठ। देवतानां ब्राह्मणानां चायतः चरणेन गच्छामि। नहि, नहि, प्रवहणमधिरुह्य गच्छामि। येन दूरतो मां प्रेक्ष्य भणिष्यन्ति, एष स राज्ञियश्यालोभट्टारकोगच्छति।

(२) श्रान्तं, पापं, प्रतिहतममङ्गलमिति।

(३) मां प्रवलपुरुषमनुष्यं वासुदेवाकं।

(४) तेन हि अपूर्वाश्रीः समासादिता, तस्मिन् काले मया रोषिता; साम्प्रतं पादयोः पतित्वा प्रसादयामि।

Digitized by Google

शकारः। एसे पादेसुं पडेमि ॥ इति वसन्तसेनामुपसृत्य ॥ अम्मिके, अम्बिए, सुणु मम विण्णत्तिं।

एसे पडामि चलणेसु विसालणेत्ते
हत्थञ्जलिं दसणखे तव सुद्धदन्ति;
जं तं मए अवकिदं मदणाउलेण,
तं खम्मिदाम्बि, वलगत्ति; तवम्हि दासे (१)।

वसं ॥ सक्रोधं॥ अवेहि, अणय्यं मन्तेसि (२) ॥ इति पादेन ताडयति ॥

शकारः ॥ सक्रोधं ॥

जे चुंविदे अंबिकमादुकेहिं, गदे ण देवाणवि जे पणामं,
से पाडिदे पादतलेण मुण्डे, वणे मिआलेण जधा मुदङ्गे (३)।

---

(१) एष पादयोः पतामि। हे मातः, अम्बिके, शृणु मम विज्ञप्तिं।

एष पतामि चरणयोर्विशालनेत्रे
हस्ताञ्जलिं दशनखे तव शुद्धदन्तिः;
यत्तन्मया अपकृतं मदनातुरेण,
तत्क्षम्यतामि, वरगात्रि; तवास्मि दासः।

(२) अपेहि, अनार्य्य मन्त्रयसि।

(३) यच्चुम्बितं अम्बिकामातृकाभिः, गतंन देवानामपि यत्प्रणामं।
तत्पातितं पादतलेन मुण्डं, वने शृगालेन यथामृताङ्गं।

अले, थावरअ चेडा, कहिं तुए एआ समाआदिदा (१)।

चेटः। भट्टके गामअअडेहिं रद्धे राअमग्गे, तदो चारुदत्तस्स रुक्खवाडिआए पवहणं थाविअ, तहिं ओदलिअ, जाव चक्कवट्टिअं करेमि, ताव एआ पवहणविपल्लासेण इह आरुढेत्ति तक्केमि (२)।

अकारः। कधं; पवहणपलट्टणेण आगदा, ण मं अहिभीलिदुं; ता ओदल, ओदल, मम केलकादो पवहणादो। तुमं तं दलिद्दअट्ठवाहपुत्तहकं अहिसारेसि, मम केलकादं गोणादं वाहेसि; ता ओदल, ओदल, गब्भदासि, ओदल, ओदल (३)।

---

(१) अरे स्थावरक चेट, कुत्र त्वया एषा समासादिता।

(२) भट्टक, ग्रामशकटैरुद्धे राजमार्गे, तदा चारुदत्तस्य वृक्षवाटिकायां प्रवहणं स्थापयित्वा, तत्रावतीर्य, यावत् चक्रं परिवर्त्तिं करोमि, तावदेषा प्रवहणविपर्य्यासेनेहारूढेति तर्कयामि।

(३) कथं; प्रवहणविपर्य्ययेणागता, न मामभिभीलितुं; तदवतर, अवतर, मम सकात् प्रवहणात्। त्वं तं दरिद्रसार्थ वाहपुत्रकमभिसारयसि, मदीयान् वृषभान् वाहयसि, तदवतर, अवतर, गर्भदासि, अवतर, अवतर।

Digitized by Google

वसं। तं अज्जचारुदत्तकं अहिसारेमित्ति; जं सच्चं, अलं किदघ्घि इमिणा वअणेण। सम्पदं जं भोदु, तं भोदु (१)।

अकारः। एदेहिं दे दशणहप्पलमण्डलेहिं,
हत्थेहिं, चाटुशदताडणलम्पडेहिं,
वट्टामि दे वलतणुं णिअजाणकादो,
केशेशु, वालिदद्धं वि जहा जडाउ (२)।

विटः। अग्राह्यामूर्द्धजेष्वेताः स्त्रियोगुणसमन्विताः;
न लतापल्लवच्छेदमर्हन्तु पवनोद्भवाः।

तदुत्तिष्ठ, त्वमहमेनामवतारयामि। वसन्तसेने, अवतीर्य्यतां।

वसं ॥ अवतीर्य्य एकान्ते स्थिता ॥

अकारः ॥ स्वगतं॥ जे शे मम वंचणावमाणेण तदा लोअग्गी अंधुच्छिदे, अज्ज, एदाए पादप्पहालेणाणेण पज्जलिदो; तं अंपदं मालेमि णं। भोदु एव्वं दाव ॥ प्रकाशं॥ भावे, भावे,

---

(१) तमार्य्यचारुदत्तमभिसारयसीति; यत्सत्यं, अलङ्कृतास्मि अमुना वचनेन। साम्प्रतञ्च यद्भवतु, तद्भवतु।

(२) एताभ्यां ते दशनखोत्पलमण्डलाभ्यां,
हस्ताभ्यां, चाटुशततादनलम्पटाभ्यां,
कर्षामि तव वरतनुं निजयानका,
त्केशेषु, वालिदयितामिव यथा जटायुः।

जदि च्छसि लम्बदग्गाविग्गालं पावालग्गं मुत्तग्गदेहिं जुत्तं,
मंसं च खादुं, तह तुट्ठि कादुं, चुक्क चुक्क चुक्कु चुक्कचुक्क त्ति (१)।

विटः। ततः किं।

शकारः। मम पिग्गं करेहि (२)।

विटः। वाढं, करोमि; वर्जयित्वा अकार्य्यं।

शकारः। भावे, अकाज्जाह गंधेवि णत्थि; रक्खशी कावि णत्थि (३)।

विटः। उच्यतां तर्हि।

शकारः। मारेहि वसंतसेणिग्गं (४)।

विटः ॥ कर्णौ पिधाय ॥

बालां, स्त्रियञ्च, नगरस्य विभूषणञ्च,
वेश्यामवेश्यसदृशप्रणयोपचारां,
एनामनागसमहं यदि घातयामि,
केनोडुपेन परलोकनदीं तरिष्ये।

---

(१) योऽसौ मम वचनावमानेन तदा रोषाग्निः संधुक्षितः, अद्य एतस्याः पादप्रहारेणानेन प्रज्वलितः; तत्साम्प्रतं मारयाम्येनां। भवतु एवं तावत्।

यदीच्छसि लम्बदग्राविग्रालं प्रावारकं सूचग्रतैर्युक्तं,
मांसञ्च खादितुं, तथा तुष्टिं कर्त्तुं, चुक्क चुक्क चुक्कु चुक्कचुक्क इति।

(२) मम प्रियं कुरु।

(३) अकार्य्यस्य गन्धोऽपि नास्ति, राक्षसी कापि नास्ति।

(४) मारय वसन्तसेनां।

Digitized by Google

शकारः। अहं ते भेडकं दृश्यं। अण्णं च, विविक्ते उज्याणे दृध मारन्तं को तुमं पेक्खिश्शदि (१)।

विटः। पश्यन्ति मां दशदिशो, वनदेवताश्च,
चन्द्रश्च, दीप्तकिरणश्च दिवाकरोऽयं,
धर्मानिलौ च, गगनञ्च, तथान्तरात्मा,
भूमिस्तथा, सुकृतदुष्कृतसाक्षिभूता।

शकारः। तेण हि पडन्तोवलिदं कदुअ मालेहि (२)।

विटः। मूर्ख, अपध्वस्तोऽसि।

शकारः। अधम्मभीलू एशे वुड्ढ खोज्जे। भोदु; थावल चेडं अणुणेमि। पुत्तका, थावलका, चेडा; शोवणखलुआदं दृश्यं (३)।

चेटः। अहंवि पहिलिश्शं (४)।

शकारः। शोवणे दे पीठके कालदृश्यं (५)।

---

(१) अहं ते उडुपं दास्यामि। अन्यच्च, विविक्ते उद्याने दृढं मारयन्तं कस्यां प्रेक्षिष्यते।

(२) तेन हि पटान्तरे वारितां कृत्वा, मारय।

(३) अधर्मभीरुरेष वृद्धशृगालः। भवतु; स्थावरक चेटमनुनयामि। पुत्रक, स्थावरक, चेट; सुवर्णकटकानि दास्यामि।

(४) अहमपि परिधास्यामि।

(५) सौवर्णं ते पीठकं कारयिष्यामि।

Digitized by Google

चेटः। अहंवि उववित्तिश्रं (१)।

श्रकारः। सव्वं दे उच्छिट्टं दाश्रं (२)।

चेटः। अहंवि खाद्दश्रं (३)।

श्रकारः। श्रव्वचेडकाणं महत्तलकं कलदृश्रं (४)।

चेटः। भट्टके ऊविश्रं (५)।

श्रकारः। ता मणेहि मम वश्रनं (६)।

चेटः। भट्टके, श्रव्वं करेमि, वज्जिअ श्रकज्जं (७)।

श्रकारः। श्रकज्जाह गंधे वि णत्थि (८)।

चेटः। भणादु भट्टके (९)।

श्रकारः। एणं वसंतसेणिअं मालेहि (१०)।

---

(१) अहमपि उपवेक्ष्यामि।

(२) सर्व्वं ते उच्छिष्टं दास्यामि।

(३) अहमपि खादिष्यामि।

(४) सर्व्वचेटकानां महत्तरकं कारयिष्यामि।

(५) भट्टको भविष्यामि।

(६) तन्मन्यस्व मम वचनं।

(७) भट्टक, सर्व्वं करोमि, वर्जयित्वा अकार्य्यं।

(८) अकार्य्यस्य गन्धोऽपि नास्ति।

(९) भणतु भट्टकः।

(१०) एनां वसन्तसेनां मारय।

Digitized by Google

चेटः। पसीददु भट्टके। दूअं मए अणज्जेण अज्जा पवहणपडिवत्तणेण आणीदा (१)।

अकारः। अले चेडा, तवावि ण पहवामि (२)।

चेटः। पहवदि भट्टके अलीलाह, ण चालित्ताह; ता पसीददु, पसीददु, भट्टके; भाआमि खु अहं (३)।

अकारः। तुमं चेडे मम भविअ, कस्स भाआसि (४)।

चेटः। भट्टके; परलोआस्स (५)।

अकारः। के रे परलोए (६)।

चेटः। भट्टके, सुकिददुक्खिदस्स परिणामे (७)।

अकारः। केरिसो सुकिदस्स परिणामे (८)।

---

(१) प्रसीदतु भट्टकः। दूतं मयानार्य्येण आर्य्या प्रवहण परिवर्त्तनेनानीता।

(२) अरे चेट, तवापि न प्रभवामि।

(३) प्रभवति भट्टारकः अरीरस्य, न चारित्र्यस्य; तत्प्रसीदतु, प्रसीदतु, भट्टकः; विभेमि खल्वहं।

(४) त्वं चेटो मम भूत्वा कस्मात् विभेषि।

(५) भट्टारक; परलोकात्।

(६) कः स परलोकः।

(७) भट्टक, सुकृतदुष्कृतस्य परिणामः।

(८) कीदृशः सुकृतस्य परिणामः।

Digitized by Google

चेटः। आदिशो भट्टके वज्जशोवण्णमण्डिदे (१)।

शकारः। दुःकिदश्श कीलिशे (२)।

चेटः। आदिशे हगे पडपिंडभक्खके भूदे। ता, अक्कज्जं ण कलदूशं (३)।

शकारः। अले ण मालिश्शशि ॥ इति बहुविधं ताडयति ॥ (४)

चेटः। पिट्ठदु भट्टके; मालेदु भट्टके; अक्कज्जं ण कलदूशं। जेण म्हि गब्भदासे विणिम्मिदे भाअधेअदोशेहिं, अधिअश्च ण कीणिश्शं, तेण अहं अकज्जं पडिहलामि (५)।

वसं। भाव, शरणागदम्हि (६)।

---

(१) यादृशो भट्टको वज्रसुवर्णमण्डितः।

(२) दुष्कृतस्य कीदृशः।

(३) यादृशोऽहं परपिण्डभक्षकोभूतः। तत् अकार्यं न करिष्यामि।

(४) अरे, न मारयिष्यसि।

(५) ताडयतु भट्टकः; मारयतु भट्टकः; अकार्यं न करिष्यामि। येनास्मि गर्भदासोविनिर्मितो भागधेयदोषैः, अधिकञ्च न क्रीणिष्यामि, तेनाकार्यं परिहरामि।

(६) शरणागताऽस्मि।

Digitized by Google

विटः। काणेल्लीमातः! मर्षय, मर्षय। साधु, स्थावरक, साधु!

अप्येष नाम परिभूतदृशोदरिद्रः
प्रेष्यः परत्र फलमिच्छति, नास्य भर्त्ता;
तस्मादमी कथमिवाद्य न यान्ति नाशं,
ये वर्द्धयन्त्यसदृशं, सदृशं त्यजन्ति।

अपिच।

रम्भानुसारी विषमः कृतान्तोयदस्य दासं तव चेश्वरत्वं,
श्रियं त्वदीयां यदयं न भुङ्क्ते, यदेतदाशां न भवान् करोति।

अकारः ॥ स्वगतं ॥ अधम्मभिरुए वुड्ढखोडे; परलोअभिरू एसे गब्भदासे; हगे लट्ठिअग्गाले कस्स भाआमि, वरपुलिसमणुस्से ॥ प्रकाशं ॥ अरे गब्भदास चेडे, गच्छे तुमं; अइं ओवलके पविसिअ, वीसन्ते एअन्ते चिट्ठ (१)।

चेटः। जं भट्टके आणवेदि ॥ वसन्तसेनामुपसृत्य ॥ अज्जए एत्तिके मे विहवे (२) ॥ इति निष्क्रान्तः॥

---

(१) अधर्म्मभीरुकोवृद्धशृगालः; परलोकभीरुरेष गर्भदासः; अहं राष्ट्रियशृगालः कस्य विभेमि, वरपुरुषमनुष्यः, अरे गर्भदास, चेट, गच्छ त्वं; अयि अपवारके प्रविश्य, विश्रान्त एकान्ते तिष्ठ।

(२) यत् भर्त्ता आज्ञापयति। एतावान् मे विभवः।

Digitized by Google

शकारः ॥ परिकरं बध्नन् ॥ चिट्ठ, वशन्तशेणिए, चिट्ठ; मालदृश्शं (१)।

विटः। आः ममायतोव्यापादयिष्यसि ॥ इति गले गृह्णाति॥

शकारः ॥ भूमौ पतति ॥ भावे, भट्टके मालीअदि ॥ इति मोहं नाटयति ॥ चेतनां लब्ध्वा ॥

सव्वकालं मए पुट्ठे मंशेण अ घिएण अ,
अज्ज कज्जे समुप्पन्ने, जादे मे वैलए कधं।

॥विचिन्त्य॥ भोदु; लब्भे मए उवाए। दिण्णा वुड्ढखोडेण शिर स्थालण शंणा। ता, एदं पेशिअ, वशंतशेणिअं मालदृश्शं; एव्वं दाव ॥ प्रकाशं॥ भावे, जं तुमे मए भणिदे, तं कधं हगे एव्वं वड्ढकाहिं · मल्लकप्पमाणाहिं कुलेहिं जादे, अकज्जं कलेमि? एव्वं एदं अंगीकालीवेदुं मए भणिदं (२)।

---

(१) तिष्ठ, वसन्तसेने, तिष्ठ; मारयिष्यामि।

(२) भावो भट्टकं मारयति।

सर्व्वकालं मया पुष्टोमांसेन च घृतेनच,
अद्य कार्य्ये समुत्पन्ने, जातोमे वैरिकः कथं।

भवतु; लब्धोमया उपायः। दत्त्वा वृद्धशृगालेन शिरस्था लनसंज्ञा। तदेतं प्रेष्य, वसन्तसेनां मारयिष्यामि; एवं तावत्। भाव, यत् त्वं मया भणितः, तत्कथमहं वृद्धत्तरैः पत्रपुट प्रमाणैः कुलैर्जातः, अकार्य्यं करोमि? एवमेतदङ्गीकारयितुं मया भणितं।

Digitized by Google

विटः। किं कुलेनोपदिष्टेन, शीलमेवात्र कारणं;

भवन्ति सुतरां स्त्रीणां सुवेषे कण्टकिद्रुमाः।

शकारः। भावे, एसा तव अग्गदो लज्जाअदि; ण मं अंगीकलेदि। ता गच्छ; थावलअ चेडे मए पिट्ठिदे गदेवि; एसे पलादअ गच्छदि। ता तं गेण्हिअ, आअच्छदु भावे (१)।

विटः ॥ स्वगतं॥

अस्मात्समक्षं हि वसन्तसेना गौण्डीर्यभावान्न भजेत मूर्खं;

तस्मात्करोम्येष विविक्तमस्था; विविक्तविश्रम्भरसोहि कामः।

॥ प्रकाशं॥ एवं भवतु; गच्छामि।

वसं ॥ पटान्ते गृहीत्वा ॥ णं भणामि, शरणागदम्हि (२)।

विटः। वसन्तसेने, न भेतव्यं, न भेतव्यं। काणेलीमातः, वसन्तसेना तव हस्ते न्यासः।

शकारः। एवं मम हस्ते एसा णासेण चिट्ठदु (३)।

विटः। सत्यं।

---

(१) एषा तवाग्रतोलज्जते; न मामङ्गीकरोति। तद्गच्छ; स्थावरक चेटः मया ताडितः गतोऽपि; एष प्रपलाय्य गच्छति। तस्मात्तं गृहीत्वा, आगच्छतु भावः।

(२) ननु भणामि, शरणागतास्मि।

(३) एवं मम हस्ते एषा न्यासेन तिष्ठतु।

Digitized by Google

अकारः। सत्यं (१)।

विटः ॥ किंचिद्गत्वा ॥ अथवा मयि गते, नृशंसोहन्या देनां; तदपवारितशरीरः पश्यामि तावदस्य चिकीर्षितं ॥ इत्येकान्ते स्थितः ॥

अकारः। भोदु, माडिश्शं। अधवा; कवडकावडिके एशे वन्हणे वुट्टखोडे, कदावि श्रीवालिदशलीले गडिश्र, शिश्राले भविश्र, ऊलुभुलिं कलेदि। ता, एदस्श वञ्चणाणिमित्तं एवं दाव करदश्शं ॥ कुसुमावचयं कुर्वन्नात्मानं मंडयति॥ वाशू, वाशू, वशंतशेणि एहि (२)।

विटः। अये, कामी संवृत्तः; हन्त निर्दृत्तोऽस्मि॥ गछामीति निष्क्रान्तः॥

अकारः। सुवलशंदेमि, पिश्रम्बदेमि, पडेमि शीशेण शवेट्टणेण, तधाविमंणेच्छशि, शुद्धदन्ति, किंशेवशं कट्टमश्रा मणुश्शा: (३)।

---

(१) सत्यं।

(२) भवतु, मारयिष्यामि। अथवा; कपटकापटिक एष ब्राह्मणः वृद्धशृगालः, कदापि अपवारितशरीरोगत्वा, शृगालीभूत्वा, कपटं करोति; तदेतस्य वञ्चनानिमित्तंएवं तावत् करिष्यामि। हे वाले, हे वाले, वसन्तसेने, वसन्तसेने, एहि।

(३) सुवर्णं ददामि, प्रियं वदामि, पतामि शीर्षेण सवेष्टनेन, तथापि मां नेच्छसि, शुद्धदन्ति, किं सेवकं कष्टमयामनुष्याः।

Digitized by Google

वसं। को एत्थ सन्देहो ॥ अवनतमुखी खलचरितमित्यादि श्लोकद्वयं पठति ॥

खलचरितनिकृष्टजातदोषः, कथमिह मां परिलोभये धनेन;
सुचरितचरितं विशुद्धदेहं, न हि कमलं मधुपाः परित्यजन्ति।
यत्नेन सेवितव्यः पुरुषः कुलशीलवान् दरिद्रोऽपि,
शोभा हि पण्स्त्रीणां सदृशजनसमाश्रयः कामः।

अविश्र।

सहआरपादवं सेविश्र, पलाशपादवं अंगीकरइस्सं (१)।

शकारः। दाशी पधीए! दलिद्दचारुदत्ताके शहआल पादवे कडे, हगे उण पडाशे भणिदे, किंशुकेवि ण कडे। एव्वं तुमं मे गालिं देन्ती, अज्जवि तं जेव्व चारुदत्ताकं शुम शेशि (२)।

वसं। हिअअगदो जेव्व किंत्ति न सुमरीअदि (३)।

---

(१) कोऽत्र सन्देहः। अपिच। सहकारपादपं सेविला, न पलाशपादपमङ्गीकरिष्यामि।

(२) दास्याः पुत्रि! दरिद्रचारुदत्तकः सहकारपादपः कृतः, अहं पुनः पलाशोभणितः, किंशुकोऽपि न कृतः। एवं त्वं मह्यं गालीं ददती, अद्यापि तमेव चारुदत्तकं स्मरसि।

(३) हृदयगतएव किमिति न स्मर्य्यते।

Digitized by Google

शकारः। अज्जवि दे हिअअगदं, तुमं समं जेव्व, मोडेमि। ता दलिद्दअत्तवाहअमणुश्शकामुकिणि, चिट्ठ, चिट्ठ (१)।

वसं। भण, भण पुणोवि, सलाहणिआइं एदाइं अक्खराइं (२)।

शकारः। परित्ताअदु, दासीएपुत्ते, दलिद्दचारुदत्ताके तुमं (३)।

वसं। परित्ताअदि जदि मं पेक्खदि (४)।

शकारः। किं से अक्के, वालिपुत्ते, महिन्दे,
लंभापुत्ते, कालणेमी, सुवन्धू,
रुद्देएआ दोणपुत्ते, जडाउ,
चाणक्के वा, धुन्धुमाले, तिअंकू? (५)

---

(१) अद्यापि ते हृदयगतं, त्वां समभेव, माटयामि। तद्दरिद्रधार्थवाहकमनुष्यकामुकि, तिष्ठ, तिष्ठ।

(२) भण, भण पुनरपि, श्लाघनीयानि अक्षराणि।

(३) परित्रायतां दास्याः पुत्रः चारुदत्तकः त्वां।

(४) परित्रायते यदि मां प्रेक्षते।

(५) किंस अक्रो, वालिपुत्रो, महेन्द्रो,
रम्भापुत्रः, कालनेमिः, सुबन्धुः,
रुद्रेरात्मा, द्रोणपुत्रो, जटायुः,
चाणक्यो, वा धुन्धुमारः, त्रिनेत्रः।

Digitized by Google

अथवा। एदेवि दे ण लक्खन्ति।

चाणक्केण जधा सीदा मालिदा भालिधे युगे,
एव्वं दे मोडइस्सामि, जडाउविअ दोवदिं (१)।

॥ इति ताडयितुमुद्यतः॥

वसं। हा अत्ते कहिं सि! हा अज्जचारुदत्त! एसो जणो असंपुण्णमणोरधोजेव्व विवज्जदि। ता उड्ढं अक्कंदइस्सं? अथवा, वसंतसेणा उड्ढे अक्कंददित्ति लज्जणीअं। क्खु, एदं; णमो अज्जचालुदत्तस्स (२)।

अकारः। अज्जवि, गब्भदासी, तस्स जेव्व पावस्स णामं गेह्णदि॥ इति कंठे पीडयन्॥ मुअल, गब्भदासि, मुअल (३)।

वसं। णमो अज्जचालुदत्तस्स (४)।

---

(१) अथवा एतेऽपि ते त्वां न रक्षन्ति।

चाणक्येन यथा सीता, मारिता भारते युगे,
एवं त्वां मोटयिष्यामि, जटायुरिव द्रौपदीं।

(२) हा मातः कुत्रासि! हा आर्य्य चारुदत्त! एष जनः असम्पूर्णमनोरथएव विपद्यते। तदूर्द्धमाक्रन्दिष्यामि; अथवा, वसन्तसेना ऊर्द्धमाक्रन्दतीति लज्जनीयं; खल्वेतत्, नमः आर्य्यचारुदत्तस्य।

(३) अद्यापि, गर्भदासी, तस्यैव पापस्य नाम गृह्णाति। मुञ्च, गर्भदासि, मुञ्च।

(४) नम आर्य्य चारुदत्तस्य।

Digitized by Google

शकारः। मल, गब्भदाशि, मल (१) ॥ नाट्येन कंठे निपीडयन् मारयति। वसन्तसेना मूर्छिता पतति निश्चेष्टा॥

शकारः ॥ सहर्षं ॥

एदं दोषकलंडिअं, अविणअस्सावासभूदं खलं,
खत्तं तस्स किलागदस्स रमणे कालागदं आअदं।
किं एत्थे शमुदाहलामि णिअअं वाहणपूलत्तणं,
णीशासेवि मले दअं च सुमला, शीदा जधा भालदे।
दुच्छंतं मम णेच्छशित्ति, गणिआ लोशेण मे मालिदा,
सुण्णे पुप्फकलंडके त्ति सहसा पाशेण उत्ताशिदा।
शेवावञ्चिदभादुके मम पिदा मादेव शा दोप्पदी,
जेशे पेक्खदि णेदिशं ववशिदं पुत्ताह पूलत्तणं (२)।

---

(१) म्रियतां, गर्भदासि, म्रियतां।

(२) एतां दोषकरण्डिकामविनयस्यावासभूतां खलां,
रक्तां तस्य किलागतस्य रमणे कालागतामागतां;
किमेष समुदाहरामि निजकं वाहोः पूरत्वं,
निश्वासेऽपि म्रियते दयश्च सुमृता, सीता यथा भारते।
दुच्छन्नं मां नेच्छसीति, गणिका रोषेण मे मारिता;
शून्ये पुष्पकरण्डके इति सहसा पाशेन उत्त्रासिता।
सेवावञ्चितभ्रातृके मम पिता मातेव सा द्रौपदी,
यस्याः पश्यति नेदृशं व्यवसितं पुत्रस्य पूरत्वं।

भोदु; संपदं वुड्ढखोडे आगमिश्शदित्ति; ता ओअलिअ चिट्ठामि ॥ तथा करोति (१) ॥ प्रविश्य चेटेन सह ॥

विटः। अनुनीतोमया स्थावरकस्चेटः। तद्यावत्काणेल्ली मातरं पश्यामि ॥ परिक्रम्यावलोक्य च॥ अये, मार्गएव पादयोर्निपतितः। अनेन च पतता स्त्री व्यापादिता। भोः पाप! किमिदमकार्य्यमनुष्ठितं त्वया। तवापि पापिनः पतनात् स्त्रीवधदर्शनेनातीव पातितावयं। अनिमित्तमेतत्, यत्सत्यं वसन्तसेनां प्रति शंकितं मे मनः, सर्वथा देवताः स्वस्ति करिष्यन्ति ॥ शकारमुपसृत्य॥ काणेल्लीमातः, एवं मया अनुनीतः स्थावरकस्चेटः।

शकारः। भावे आअदं दे; पुत्तका यावलक चेडा तवापि आअदं (२)।

चेटः। अधदं? (३)

विटः। मदीयं न्यासमुपनय।

शकारः। कीदिशे णामे! (४)

---

(१) भवतु, संप्रतं वृद्धश्वशुरगालः आगमिष्यतीति; ततः अपसृत्य तिष्ठामि।

(२) स्वागतं ते; पुत्रक, स्थावरक तवापि स्वागतं।

(३) अथ किं?

(४) कीदृशोन्यासः।

Digitized by Google

विटः। वसन्तसेना।

श्रकारः। गदा (१)।

विटः। क्व।

श्रकारः। भावस्स जेव्व पिट्ठदो (२)।

विटः ॥ सवितर्क्कं॥ न गता सा खल्वनया दिशा।

श्रकारः। तुमं कदमाए दिशाए गदे? (३)

विटः। पूर्व्वया दिशा।

श्रकारः। श्रवि दक्खिणाए गदा (४)।

विटः। श्रहं दक्खिणया।

श्रकारः। श्रवि उत्तलाए (५)।

विटः। श्रत्याकुलं कथयसि; न मुञ्चति मे श्रन्तरात्मा, तत्कथय सत्यं।

श्रकारः। श्रवामि भावस्स शीशं श्रत्तणकेलकेहिं पादेहिं, ता संठावेहि हिश्रश्रं, एसा मए मालिदा (६)।

---

(१) गता।

(२) भावस्यैव पृष्ठतः।

(३) त्वं कतमया दिशा गतः?

(४) सापि दक्षिणया गता।

(५) सापि उत्तरया।

(६) श्रपामि भावस्य शीर्षं श्रात्मनः क्षताभ्यां पादाभ्यां, ततः संस्थापय हृदयं, एषा मया मारिता।

Digitized by Google

विटः ॥ सविषादं॥ सत्यं, त्वया व्यापादिता?

शकारः। जइ मम वअणे ण पत्तिआअसि, ता पेक्ख पठमं खट्ठिअग्गिआलसंक्काणाह पूरणत्तणं (१) ॥ इति दर्शयति॥

विटः। हा हतोऽस्मि मन्दभाग्यः! ॥ इति मूर्च्छितः पतति॥

शकारः। ही, ही, उवरदे भावे (२)।

चेटः। शमश्शअदु, शमश्शअदु, भावे। अविआलिअं पव हणं आणंतेण जेव्व मए पठमं मालिदा (३)।

विटः ॥ समाश्वस्य सकरुणं॥ हा वसन्तसेने।

दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रति
र्हा हालंकृतभूषणे सुवदने क्रीडारसोद्भाषिनि!
हा सौजन्यनदि प्रहासपुलिने! हा मादृशामाश्रये!
हा, हा! नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः।

॥ सास्रं कष्टं॥

किन्तु, नाम, भवेत्कार्य्यमिदं येन त्वया कृतं।
अपापा पापकल्पेन नगरश्रीर्निपातिता।

---

(१) यदि मम वचने न प्रत्ययसे, तत्पश्य प्रथमं राष्ट्रिय श्यालसंस्थानस्य पूरत्वं।

(२) ही, ही, उपरतोभावः।

(३) समाश्वसितु, समाश्वसितु, भावः। अविचारितं प्रव हणमानयता एव मया प्रथमं मारिता।

Digitized by Google

॥ खगतं ॥ अथवा कदाचिदयं पाप दुष्टमकार्य्यं मयि संक्रामयेत्। भवतितोगच्छामि ॥ इति परिक्रामति ॥

शकारः ॥ उपगम्य धारयति ॥

विटः। पाप, मामास्पाक्षीः। अलं त्वया; गच्छाम्यहं।

शकारः। अले, वसन्तसेणिअं अअं जेव्व मालिअ; मं दूसिअ, कहिं पलाअसि; अज्जदं दुद्दिणे हगे अणाधे पाविदे (१)।

विटः। अपध्वंसोऽसि।

शकारः। अत्थं अदं देमि सुवण्णअं दे, कहावणं देमि अवेडिअं दे; एसे दुअद्दाण पलक्कमे मे, सामाण्णए भोदु मणुस्साणं (२)।

विटः। धिक् तवैवास्तु।

चेटः। अंतं पावं (३)।

शकारः ॥ हसति ॥

विटः। अप्रीतिर्भवतु, विमुच्यतां हि हासो,
धिक् प्रीतिं परिभवकारिकामनार्य्यां
माभूच्च त्वयि मम संगतं कदाचि
दाक्षिप्तं धनुरिव निर्गुणं त्यजामि।

---

(१) अरे, वसन्तसेनां स्वयमेव मारयित्वा, मां दूषयित्वा, कुत्र पलायसे; सांप्रतमीदृशोऽहं अनाथः प्राप्तः।

(२) अर्थं शतं ददामि सुवर्णं ते, कहापणं ददामि सर्वेष्टिकं ते; एष दुःशब्दानां फलक्रमो मे, सामान्यकोभवतु मनुष्यकाणां।

(३) शान्तं पापं।

Digitized by Google

शकारः। भावे, पसीद, पसीद; एहि, एलिणीए पविशिअ कीलम्ह (१)।

विटः। अपतितमपि तावल्लेवमानं भवन्तं,
पतितमिव जनोऽयं मन्यते मामनार्यं।
कथमहमनुयायां त्वां, त्वत्सखीकमेनं,
पुनरपि नगरश्रीशङ्कितार्द्धोचिदृष्टं।

॥ सकरुणं॥ वसन्तसेने!

अन्यस्यामपि जातौ मा वेश्याभूस्त्वं हि सुन्दरि,
चारित्र्यगुणसंपन्ने जायेथा विमले कुले।

शकारः। मम केरके पुप्फकरंडकजिण्णुज्जाणे वसन्तसेणिअं मालिअ, कहिं पलाअसि? एहि, मम आवुत्तस्स अग्गदो ववहारं देहि (२)॥ इति धारयति॥

विटः। आं, तिष्ठ जाल्म॥ इति खड्गमाकर्षति॥

शकारः॥ सभयमपसृत्य॥ किं रे भीदेसि, ता गच्छ (३)।

विटः॥ स्वगतं॥ न युक्तमवस्थातुं। भवतु, यत्रार्य्यश्चारुदत्तकचंदनकप्रभृतयः संति, तत्र गच्छामि॥ इति निष्क्रान्तः॥

---

(१) भाव, प्रसीद, प्रसीद; एहि, सरस्यां प्रविश्य क्रीडावः।

(२) मदीयपुष्पकरण्डकजीर्णोद्याने वसन्तसेनां मारयित्वा, कुत्र पलायसे? एहि, मम आवुत्तस्यायतोव्यवहारं देहि।

(३) किं रे भीतोऽसि तद्गच्छ।

Digitized by Google

शकारः। णिधणं गच्छ। अले थावलक पुत्तका, कीलिशे मए कडे? (१)

चेटः। भट्टके, महंते अकज्जे कडे (२)।

शकारः। अले चेडे, किं भणाशि, अकज्जे कडेत्ति? भोदु एव्वं दाव ॥ नानाभरणान्यवतार्य्य ॥ गेल्ह एदं अलंकारअं; मए ताव दिण्णे, जेत्तिके वेले अलंकलेमि, तेत्तिकं वलं मम अणंतव (३)।

चेटः। भट्टके, जेव्व एदे शोहंति, किं मम एदेहिं (४)।

शकारः। ता गच्छ; एदाइं गोणाइं गेण्हिअ, मम केल आए पासादवालगापडोलिआए चिट्ठ, जाव हगे आ अच्छामि (५)।

---

(१) निधनं गच्छ। अरे स्थावरक पुचक, कीदृशं मया कृतं?

(२) भट्टक, महदकार्य्यं कृतं।

(३) अरे चेट, किं भणसि, अकार्य्यं कृतमिति? भवतु, एवं तावत्। गृहाणेममलङ्कारं; मया तावद्दत्तं, यावत्यां वेलायां अलंकरोमि, तावतीं वेलां त्वमात्मानमलङ्कुरु।

(४) भट्टके, एव एते शोभन्ते; किं मम एतैः?

(५) तदा गच्छ, एतान् वृषभान् गृहीत्वा, मदीयायां प्रासादवालायप्रतोलिकायां तिष्ठ, यावदहमागच्छामि।

Digitized by Google

चेटः। जं भट्टके आणवेदि (१) ॥ इति निष्क्रान्तः॥

शकारः। अत्तपलित्ताणे भावे गदे अदंशणं; चेडेवि पाशादवालशापडोलिआए णिअलपूलिअं कदुअ थावदस्सं। एव्वं मंते लक्खिदे भोदि। ता गच्छामि; अधवा, पेक्खामि दाव एदं किं एषा मला, आदु पुणोवि मालदश्शं ॥ अवलोक्य॥ कधं सुमला। भोदु; एदिणा पावालेण पच्छादेमि णं। अधवा, णामंकिदे एशे, ता केवि अच्चपुलिशे पचक्खिज्जाणेदि। भोदु; एदिणा वादालीपुच्छिदेण शुक्खपण्णपुडेण पच्छादेमि ॥ तथा कृत्वा, विचिन्त्य॥ भोदु; एव्वं दाव, संपदं अधिअलणं गच्छिअ ववहालं लिहावेमि। जहा अत्थश्श कालणाए शट्ठवाह चालुदत्ताकेण मम केलकं पुप्फकलंडकं जिण्णुज्जाणं पवेशिअ, वसन्तशेणिआ वावादिदेत्ति। चालुदत्तविणाशाय कलेमि कवडं एवं। णअलिए विशुद्धाए पशुघादंव्व दालुणं। भोदु, गच्छामि ॥ इति निष्क्रम्य दृष्ट्वा सभयं॥ अविदमादिके! जेण जेण गच्छामि मग्गेण, तेणज्जेव्व एशे दुट्ठशमणके गहिद कशाओदकं चीवलं गेल्हिअ आअच्छदि; एशे मऐ णसि क्खिअ वाहिदे कदवेले कआवि मं पेक्खिअ, एदेण मालिदत्ति पआ सदस्सदि; ता कधं गच्छामि ॥ अवलोक्य॥ भोदु; एदं अद्ध

(१) यद्भट्टकआज्ञापयति।

पडिदं पागासखंडं उल्लंघिअ गच्छामि।

एअेहि तुलिदे लंका एअखीए मअअ गच्छन्ती,

भूमीए पाआले इअूमग्गिहले विअ मइन्दे (१)।

॥ इतिनिष्क्रान्तः ॥

---

(१) आत्मपरिचाणे भावोगतः अदर्शनं; चेटमपि प्रासाद वालायप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि। एवं मन्योरचितोभवति। तद्गच्छामि; अथवा, पश्यामि तावदेनां किमेषा मृता अथवा पुनरपि मारयिष्यामि। कथं, सुप्तता। भवतु; एतेन प्रावरकेण प्रच्छादयाम्येनां; अथवा। नामाङ्कितएषः तत्कोऽपि आर्य्यपुरुषः प्रत्यभिज्ञास्यति। भवतु; एतेन वाताखोपुञ्छितेन शुष्कपर्णपुटेन प्रच्छादयामि। भवतु; एवं तावत् सांप्रतं अधिकरणं गत्वा व्यवहारं लेख यामि, यथा अर्थस्य कारणाय सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रविश्य वसन्तसेना व्यापादि तेति। चारुदत्तविनाशाय करोमि कपटं नवं नमस्यो विष्णु द्वायां पशुघातमिव दारुणं। अविदमादिके! येन येन गच्छामि मार्गेण, तेनैव एष दुष्टश्रमणकोगृहीतकषायोदकं चीवरं गृहीत्वा आगच्छति; एष मया नमसि क्षिप्त्वा वाहितः हतवैरः कदापि मां प्रेक्ष्य, एतेन मारितेति प्रकाशयिष्यति;

प्रविश्य पटाक्षेपेण संवाहकोभिचुः। पच्छाडिदे एदे मए चीवलखण्डे, किं णु ऊ शाहाए शुक्खावइश्शं। दूध वाणला विलुप्पन्ति। किं णु ऊ भूमीए धूलीदोशे होदि; ता कहिं पशारिअ शुक्खाविश्शं ॥ दृष्ट्वा ॥ भोदु, दूध वादालीपुञ्जिदे शुक्खवन्तसंचए पशालइश्शं ॥ तथा कृत्वा। एमोवुद्धश्श ॥ इत्यु पविशति॥ भोदु, धम्मक्खलादं उदाहलामि॥ पञ्चज्जणज्जेण मालिदे इत्यादिपूर्व्वोक्तं पठति॥ अथवा; अलं मम एदेण शम्भोण, जाव ताए बुड्ढोवाशिआए पचुवकालं ण करेमि, जाए दिशाणं सुवण्णकाणं कदे जूदिअलेहिं णिक्किदे, तदो पऊदि ताए कीदं विअ अत्ताणअं अवगच्छामि ॥ दृष्ट्वा॥ किं णु ऊ पशेोदले समूशशदि? अथवा,

वादाइवेण तत्ता, चीवलतोएण निम्मिदापत्ता,
एदे विद्दिअपत्ता मच्छे पत्ताविअ फुरन्ति (१)।

वसं ॥ संज्ञां लब्धा हस्तं दर्शयति॥

तत्कथं गच्छामि। भवतु एतं अर्द्धपतितं प्राकारखण्डमुल्लङ्घ्य गच्छामि।

एषोऽहं त्वरितं तुलितः खद्वानगर्य्यां गमने गच्छन्।
भूम्यां पाताले हनूमत्किखरे इव महेन्द्रः।

(१) प्रक्षालितमेतन्मया चीवरखण्डं, किं नु खलु शाखायां शुष्कं करिष्यामि। दूध वानरा विलुम्पन्ति। किं नु खलु

भिक्षुः। हा, हा, शुद्धालंकारभूषिदे दत्थिआ हत्थे णिक्क मदि! कधं, दुदिए विहत्थे ॥ वञ्चविधं निर्वर्ण्य॥ पञ्चभिश्चा णामि विअ एदं हत्थं। अथवा, किं विचारेण? अज्जं; जे जेव्व हत्थे जेण मे अभअं दिण्णं। भोदु, पेक्खिस्सं ॥ नाम्नेोल्लाप्य दृष्ट्वा प्रत्यभिज्ञाय च ॥ आ जेव्व बुद्धोवासिआ (१)।

वसं ॥ पानीयमाकाङ्क्षति ॥

भूम्यां धूलीदोषोभवति; तत्कुत्र प्रसार्य्य शुष्कं करिष्यामि। भवतु, इह वातालीपुञ्जिते शुष्कपत्रसञ्चये प्रसारयिष्यामि। नमोबुद्धाय। भवतु, धर्म्माचराणि उदाहरामि। अथवा; अलं ममैतेन स्वर्गेण, यावत्तस्यावसन्तसेनायाबुद्धोपासिकायाः प्रत्युपकारं न करोमि, यया दशानां सुवर्णकानां कृते द्यूतकराभ्यां निष्क्रीतः ततःप्रभृति तया क्रीतमिवात्मानमवगच्छामि। किन्नु खलु पर्णोदरे समुच्छ्वसिति? अथवा,

वातातपेन तप्तानि, चीवरतोयेनार्द्राणि पत्राणि,
एते विस्रोर्णपत्राः मन्ये पत्रादव स्फुरन्ति।

(१) शुद्धालङ्कारभूषितः स्त्रीहस्तोनिष्क्रामति! कथं; द्वितीयोऽपि हस्तः। प्रत्यभिजानामि इव एतं हस्तं। अथवा, सत्यं; सएव हस्तः येन मे अभयं दत्तं। भवतु, पश्यामि। सैव बुद्धोपासिका।

Digitized by Google

भिक्षुः। कधं, उदअं मग्गेदि। दूले च दिग्घिआ। किं दाणिं एत्थ करिस्सं? भोदु, एदं चीवरं से उवरि गालइस्सं (१)॥ तथा करोति॥

वसं॥ संज्ञां लब्ध्वा उत्तिष्ठति। भिक्षुः पटान्तेन वीजयति॥

वसं। अज्ज, को तुमं? (२)

भिक्षुः। किं मं ण सुमलेदि बुद्धोवासिआ, दअसुवण्ण णिक्कीदं (३)।

वसं। सुमलेमि ण उण जधा अज्जो भणादि, वरं अहं उवरदा जेव्व (४)।

भिक्षुः। बुद्धोवासिए किं णेदं (५)।

वसं॥ सनिर्व्वेदं॥ जं सरिसं वेसभावस्स (६)।

---

(१) कथमुदकं याचते। दूरे च दीर्घिका। किमिदानीं मत्र करिष्यामि? भवतु, एतत् चीवरं अस्याउपरि चालयिष्यामि।

(२) आर्य्य, कस्त्वं?

(३) किं मां न स्मरति बुद्धोपासिका, दशसुवर्णनिष्क्रीतं।

(४) स्मरामि न पुनर्यथा आर्य्योभणति, परमहमुपरता एव।

(५) बुद्धोपासिके किं नेदं।

(६) यत्सदृशं वेशभावस्य।

Digitized by Google

भिक्षुः। उट्ठेउ, उट्ठेउ, बुद्धोवासिआ। एदं पादवसमीवजादं लदं ओलंबिअ (१) ॥ इति लतां नामयति। वसन्तसेना गृहीत्वा उत्तिष्ठति ॥

भिक्षुः। एदस्सिं विहारे मम धम्मबहिणिआ चिट्ठदि; तहिं समस्सलिदमणाभविअ उवासिआ, गेहं गमिस्सदि। ता मंदं मंदं गच्छदु बुद्धोवासिआ ॥ इति परिक्रामतः॥ दृष्ट्वा॥ ओसलध अय्या, ओसलध; एसा तलुणी दुत्थिआ, एसे भिक्खुत्ति; मुद्धे मम एसे धम्मे; हत्थसंजदमुहसंजददंदिअ संजदे, गे खु माणुसे, किं करेदि तस्स राअउले परलोअ हत्थे णिस्सले (२)।

॥ इति निष्क्रान्ताः सर्वे॥

इति मृच्छकटिकायां वसन्तसेनामोटनोनामाष्टमोऽङ्कः।

---

(१) उत्तिष्ठतु, उत्तिष्ठतु, बुद्धोपासिका। एतां पादपसमीपजातां लतामवलम्ब्य।

(२) एतस्मिन् विहारे मम धर्मभगिनी तिष्ठति; तत्र समाश्वसमनाभूत्वा उपासिका, गेहं गमिष्यति। ततः शनैः शनैर्गच्छतु बुद्धोपासिका। अपसरत आर्य्या, अपसरत, एषा तरुणी स्त्री, एष भिक्षुरिति, मुग्धेमम एषधर्म्मः; हस्तसंयत मुखसंयतेन्द्रियसंयतः, स खलु मनुष्यः, किं करोति तस्य राजकुलं परलोकोहस्ते निश्चलइति।

अथ नवमाङ्कः।

ततः प्रविशति शोधनकः। शोधनकः। आणत्तन्हि अधिअरणभोइएहिं; अरे शोहणआ, ववहारमंडवं गदुअ, आसणाइं सज्जीकलेहित्ति। ता जाव अधिअरणमंडवं सज्जिदुं गच्छामि॥ परिक्रम्यावलोक्य च॥ एदं अधिअरणमंडवं, एअं पविशामि॥ प्रविश्य संमार्ज्यासनमाधाय॥ विविक्तं कारिदं मए अधिअरणमंडवं, विरइदा मए आसणा; ता जाव अधिअरणिआणं उण णिवेदेमि॥ परिक्रम्यावलोक्य च॥ कधं, एशे लट्ठिअशालेदुट्ठदुज्जणमनुशे दूदोएव्व आअच्छदि; ता दिट्ठिपधं परिहरिअ गमिश्शं (१)॥ इत्येकान्ते स्थितः॥ ततः प्रविशति उज्ज्वलवेशधारी शकारः।

---

(१) आज्ञप्तोऽस्मि अधिकरणभोजकैः; अरे शोधनक, व्यवहारमण्डपं गत्वा, आसनानि सज्जीकुरु इति। तत् यावदधिकरणमण्डपं सज्जितुं गच्छामि। इदमधिकरणमण्डपमेषोऽहं प्रविशामि। विविक्तं कारितं मयाधिकरणमण्डपं, विरचितानि च मयासनानि; तत् यावदाधिकरणिकानां निवेदयामि। कथमेषराष्ट्रियशालोदुर्ज्जनमनुष्यदूतएवागच्छति; तद्दृष्टिपथं परिहृत्य गमिष्यामि।

शकारः। स्नातोऽहं सलिलजलैः पानीयैः, उद्याने उपवनकानने निषण्णः;
नारीभिः सह युवतीभिः स्त्रीभिः, गन्धर्वैः सुविहितैः अङ्गकैः।
क्षणेन गण्डी क्षणजूलके मे, क्षणेन मे चंचलकुन्तले वा,
क्षणेन मुक्के क्षण उद्धचूडे, चित्तेविचित्ते हगे लाअशाले।

अविअ। विअगंठिगब्भपविट्ठेण विअ कीडएण अत्तलं मग्गमाणेण, पाविदं मए महद्दत्तलं; ता कअ एदं किविण चेट्टिअं पालदअं ॥ स्मृत्वा ॥ आं, णुमलिदं, मए दलिद्दचारुदत्तअ संभावीअदि। भोदु, अधिअलणमंडवं गदुअ, अग्गदो ववहालं लिहावदअं, जधा चारुदत्ताकेण वअन्तअेणिआ मोडिअ मालिदा; ता जाव अधिअलणमंडवं जेव्वगच्छामि ॥ परिक्रम्यावलोक्य च ॥ एदं तं अधिअलणमंडवं, एत्थ पविशामि ॥ प्रविश्यावलोक्य च ॥ कधं, आसणादं दिण्णादं चिट्ठदित्ति; दाव आअशंत्ति अधिअरणभोदुआ, एदशिं दुव्वत्तले मुऊत्तअं उवविशिअ पडिवालदअं (१) ॥ तथास्थितः ॥

(१) स्नातोऽहं सलिलजलैः पानीयैः, उद्याने उपवनकानने निषण्णः; नारीभिः सह युवतीभिः स्त्रीभिः, गन्धर्वैः सुविहितैः अङ्गकैः।

शोधनकः ॥ अन्यतः परिक्रम्य पुरोदृष्ट्वा ॥ एदे अधिअरणिआआअच्छन्ति। ता जाव उवसप्पामि (१)॥ इति उपसर्पति॥ ततःप्रविशति श्रेष्ठिकायस्थादिपरिवृतआधिकरणिकः॥

अधि। भो, भो, श्रेष्ठिकायस्थौ।

तौ। आणवेदु अय्यो (२)।

अधि। अहो व्यवहारपराधीनतया दुष्करं खलु परचित्तग्रहणमाधिकरणिकैः।

चणेन ग्रन्थिः चणं जूटकोमे, चणेन मे चञ्चलकुण्डलावा,
चणेन मुक्ताः चणमूर्द्धचूडा, चिचविचिचः अहं राजश्यालः।

अपिच। विषग्रन्थिगर्भप्रविष्टेनेव कीटकेनान्तरं मार्गमाणेन, प्राप्तं मया महदन्तरं; तत्कथ्येदं क्षपणचेष्टितं पालयिष्यामि। अं, स्मृतं, दरिद्रचारुदत्तस्य सम्भाव्यते। भवतु, अधिकरणमण्डपं गत्वा, अग्रतोव्यवहारं लेखयिष्यामि, यथा चारुदत्तेन वसन्तसेना मोचयित्वा मारिता; तत् यावदधिकरणमण्डपमेव गच्छामि। एतत्तदधिकरणमण्डपमत्र प्रविशामि। कथमासनानि दत्तानि तिष्ठन्ति; तावदागच्छन्ति अधिकरणभोजकाः, एतस्मिन् दूर्व्वाचत्वरे मुहूर्त्तमुपविश्य प्रतिपालयिष्यामि।

(१) एवे अधिकरणिका आगच्छन्ति, तत् यावदुपसर्पामि।

(२) आज्ञापयतु आर्य्यः।

Digitized by Google

कश्चं कार्य्यमुपक्षिपन्ति पुरुषान्यायेन दूरीकृतं,
खान्दोषान् कथयन्ति नाधिकरणे रागाभिभूताः खलं;
तैःपक्षापरपक्षवर्द्धितबलैर्दोषैर्नृपः स्पृश्यते,
संक्षेपादपवादएव सुलभोद्रष्टुर्गुणोदूरतः।

अपिच।

कश्चं दोषमुदाहरन्ति कुपितान्यायेन दूरीकृताः,
खान्दोषान् कथयन्ति नाधिकरणे, सन्तोऽपि नष्टाभ्रुवं;
ये पक्षापरपक्षदोषसहिताः पापानि संकुर्व्वते,
संक्षेपादपवादएव सुलभोद्रष्टुर्गुणोदूरतः।

यतः। अधिकरणिकः खलु।

ग्राखज्ञः, कपटानुसारकुशलो, वक्ता, नच क्रोधन
स्तुल्योमित्रपरक्षकेषु, चरिते दृष्टेव दत्तोत्तरः;
क्षीवान्पालयिता, ग्रठान्व्यथयिता, धर्म्मेऽतिलोभान्वितो,
दारभावे परतल्पबद्धहृदयो, राज्ञस्य कोपापहः।

श्रेष्ठिकायस्थौ। अज्जस्स वि णाम गुणेदोसत्ति वुच्चदि अहएवं, ता चन्दालोएवि अंधआरोत्ति वुच्चदि (१)।

अधि। भद्र प्रोधनक, अधिकरणमण्डपस्य मार्ग मादेशय।

---

(१) आर्य्यस्यापि नाम गुणे दोषइति उच्यते यद्येवं, तदा चन्द्रालोकेऽपि अन्धकारइति उच्यते।

Digitized by Google

शोधनकाः। एदु, एदु, अधिअरणभोदओ एदु (१)।

॥ इति परिक्रामन्ति ॥

शोधनकः। एदं अधिअरणमण्डवं, ता पविसन्तु अधिअरणभोदआ ॥ सर्व्वे च प्रविशन्ति ॥ (२)।

अधि। भद्र शोधनक, बहिर्निःक्रम्य, आयतां, कः कः कार्य्यार्थीति।

शोधनकः। जं अज्जो आणवेदि ॥ इति निष्क्रम्य ॥ अज्जा अधिअरणिआ भणन्ति, केको दुध कज्जत्थीति (३)।

प्रकारः ॥ सहर्षं ॥ उवत्थिए अधिअरणिए ॥ सादोपं परिक्रम्य ॥ हगे, वलपुलिअमणुस्से वासुदेवे लट्ठिअग्गिआले खाअग्गाले कज्जत्थी (४)।

शोधनकः ॥ सभ्रमं ॥ होमादिके, पढमं जेव्व लट्ठिअग्गालेकज्जत्थी। भोदु; अज्ज, मुहुत्तं चिट्ठ, दाव अधिअरणि

---

(१) एतु, एतु, अधिकरणभोजकएतु।

(२) एतत् अधिकरणमण्डपं, तत्प्रविशन्तु अधिकरणभोजकाः।

(३) यदार्य्यआज्ञापयति। आर्य्या आधिकरणिकाभणन्ति, कः कदरह कार्य्यार्थीति।

(४) उपस्थिताआधिकरणिकाः। अह, वरपुरुषमनुष्यः वासुदेवः राष्ट्रियशालः राजशालः कार्य्यार्थी।

Digitized by Google

आर्यं णिवेदेमि ॥ उपगम्य ॥ अज्जा, एसो क्खु लट्ठिअग्गाले कज्जत्थी ववहालमुवत्थिदो (१)।

अधि। कथं, प्रथममेव राष्ट्रियश्यालः कार्यार्थी। यथा सूर्योदये उपरागोमहापुरुषनिपातमेव कथयति। शोधनक, व्याकुलेनाद्य व्यवहारेण भवितव्यं; भद्र, निष्क्रम्योच्यतां गच्छाद्य न दृश्यते तव व्यवहारइति॥

शोधनकः। जं अज्जो आणवेदित्ति (२)॥ निष्क्रम्य शकार मुपगम्य॥ अज्ज, अधिअरणिआभणंति। अज्ज गच्छ, ण दीअदि तव ववहाले (३)।

शकारः ॥ सक्रोधं॥ किं, ण दीअदि मम ववहाले? जद्द ण दीअदि, तदो आउत्तं लाआणं पालअं वहिणीवदिं विअ विअ, वहिणिअं अत्तिकं च विअविअ, एदं अधिअरणिअं फेलिअ, एत्थ अणं अधिअलणिअं गवदूअं (४) ॥इति गन्तु मिच्छति॥

---

(१) हन्त प्रथममेव राजश्यालः कार्यार्थी। भवतु; आर्य, मुहूर्त्तं तिष्ठ, तावत् अधिकरणिकानां निवेदयामि। आर्य्या एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः।

(२) यदार्य्य आज्ञापयति।

(३) आर्य्य, अधिकरणिकाभणन्ति,। अद्य गच्छ, न दृश्यते तव व्यवहारः।

(४) किं, न दृश्यते मम व्यवहारः? यदि न दृश्यते,

Digitized by Google

शोधनकः। अज्ज, लट्ठिअशालअ, मुहुत्तअं चिट्ठ, दाव अधिअरणिआणं णिवेदेमि ॥ आधिकरणिकावुपगम्य॥ एशे लट्ठिअशाले कुविदे भणादि (१)॥ इति तदुक्तं भणति॥

आधि। सर्व्वमस्य मूर्खस्य संभाव्यते। भद्र, उच्यतां, आगच्छ; दृश्यते तव व्यवहारः।

शोधनकः ॥ अकारमुपगम्य॥ अज्ज, अधिअरणिआ भणंति, आअच्छ (२)।

अकारः। पठमं भणन्ति न दीसदि, संपदं दीअदित्ति; ताणम भोद भोदा अधिअलणभोदआ; जेत्तिअं हगे भणिश्शं, तेत्तिअं पत्तिआवदश्शं, भोदु, पविशामि॥ प्रविश्योपसृत्य॥ सुसुहं अल्लाणं तुल्हाणंपि सुहं देमि, न देमि च (३)।

तदा आवृत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य, भगिनीं मातरञ्च विज्ञाप्य, एतमाधिकरणिकं दूरीकृत्यान्यमाधिकरणिकमत्र स्थापयिष्यामि।

(१) आर्य्य, राष्ट्रियशाल, मुहूर्त्तं तिष्ठ, तावत् आधिकरणिकानां निवेदयामि। एष राष्ट्रियशालः कुपितोभणति।

(२) आर्य्य, आधिकरणिकाभणन्ति, आगच्छ।

(३) प्रथमं भणन्ति न दृश्यते, साम्प्रतं दृश्यते; इति तत्

Digitized by Google

आधि ॥ स्वगतं॥ अहो स्थिरसंस्कारता व्यवहारार्थिनः ॥ प्रकाशं॥ उपविश्यतां।

शकारः। आं; अत्तणकेलका मे भूमी; ता जहिं मे रोअदि तहिं उवविशामि ॥ श्रेष्ठिनं प्रति॥ एश उवविशामि ॥ शोधनकं प्रति॥ णं, एत्थ उवविशामि ॥इति आधिकरणिक मस्तके हस्तं दत्वा॥ एश उवविशामि (१) ॥ इति भूमौ उपविशति ॥

आधि। भवान् कार्य्यार्थी।

शकारः। अधइं? (२)

आधि। तत्कार्य्यं कथय।

शकारः। कधे कज्जं कथयइस्सं। एअवडके मल्लकप्प माणाइ कुले हगे जादे। ता अअ्यउत्ते मम पिदा, ता आ

नाम भीतभीताधिकरणभोजका; यावदहं भणिष्यामि, तावत्प्रत्येष्यन्ते। भवतु, प्रविशामि। सुसुखं अस्माकं युष्माकमपि सुखं ददामि, न ददामि च।

(१) आं; आत्मीया ममैषा भूमी; यत्र मह्यं रोचते तत्रोपविशामि। एष उपविशामि। ननु अत्रोपविशामि। एष उपविशामि।

(२) अथकिं?

Digitized by Google

तादस्स होदु जामादा, लाअग्गिआले हग्गे, ममावि भइणी वदी राआ (१)।

आधि। सर्व्वं जायते।

किं कुलेनोपदिष्टेन, शीलमेवात्र कारणं;
भवन्ति नितरां स्फीताविपिने कण्टकिद्रुमाः।

॥ तदुच्यतां कार्य्यं ॥

शकारः। एव्वं भणामि। अवलद्धादवि ण अ मे किंवि कलइस्सदि; तदो तेण वहिणीवदिणा वरितुट्ठेण मे कीलिदुं लक्खिदुं अव्वुच्चाणाणं पवले पुप्फकरंडकजिण्णुज्जाणे दिण्णे; तहिं च पेक्खिदुं अणुदिअहं, शोआवेदुं शोधावेदुं, पोत्थावेदुं, लुणावेदुं, गच्छामि। देव्वजोएण पेक्खामि, न पेक्खामि वा, दत्थिअग्गलीलं णिवडिदं (२)।

---

(१) कर्णे कार्य्यं कथयिष्यामि। एतावद्दुर्द्धके मल्लकप्रमाणस्य कुले अहं जातः। राजश्वशुरोमम पिता राजा तातस्य भवति जामाता, राजश्यालोऽहं, ममापि भगिनीपतीराजा।

(२) एवंभणामि। अपराद्धस्यापि न च मेकिमपि करिष्यति; ततस्तेन भगिनीपतिना परितुष्टेन मे क्रीडितुं रचितुं सर्व्वोद्यानानां प्रवरं पुष्पकरण्डकजीर्णोद्यानं दत्तं; तत्र च प्रेचितुं अनुदिवसं पुष्पं कारयितुं, शोधयितुं, पुष्टं कारयितुं, लूनं कारयितुं, गच्छामि। दैवयोगेन पश्यामि, न पश्यामि वा, स्त्री शरीरं निपतितं।

Digitized by Google

आधि। अथ जायते का स्त्री विपत्तेति?

प्रकारः ॥ हंहो अधिअरणभोइआ, किमिति ण आणामि तं तादिसिं णअरमण्डणं कंचनमअभूषणिअं। केणवि कुपुत्तेण अत्थकारणवत्तीए कालणादो शूणं पुप्फकरण्डकजिण्णुज्जाणं पविसिअ, वाडुपाअवलक्कारेण वसन्तसेणिआ मालिदा; ण मए (१)॥ इत्यर्द्धोक्ते च मुखमाच्छादयति॥

आधि। अहो णगररक्खिणं प्रमादः! भो श्रेष्ठिकायस्थौ। न मयेति, व्यवहारपदं प्रथममभिलिख्यतां।

कायस्थः। जं अज्जो आणवेदि॥ तथा कृत्वा॥ अज्ज, लिहिदं (२)।

प्रकारः ॥ स्वगतं॥ हीमादिके! उत्तलाअन्तेण विअ पायसपिण्डलकेण, अज्ज मए अत्ता एव्व णिआमिदो। भोदु एव्वं दाव ॥ प्रकाशं॥ अहो अधिअरणभोइआ, णं भणामि, मए जेव्व दिट्ठा; किं कोलाहलं करेध (३) ॥ इति पादेन लिखनं प्रोञ्छन्ति॥

---

(१) अधिकरणभोजकाः, किमिति न जानामि तां तादृशीं नगरमण्डनं काञ्चनमयभूषणां। केनापि कुपुत्रेण अर्थकृत्य, वर्त्तस्य कारणात्, शून्यं पुष्पकरण्डकजीर्णोद्यानं प्रविश्य, वाटुपादपबलात्कारेण वसन्तसेना मारिता, न मया।

(२) यदार्य्यआज्ञापयति। आर्य्य, लिखितं।

(३) विस्मये! त्वरां कुर्व्वाणेनेव पायसपिण्डरकेण, अद्य

आधि। कथं त्वया ज्ञातं यथा स्वस्वर्थनिमित्तं वाऊपा
लेन व्यापादिता?

प्रकारः। हंहो; नूणं गुणगूणाए मोघठाणाए गीवा
लिआए णिसुवण्णकेहिं आहरणठ्ठाणेहिं तक्केमि (१)।

श्रेष्ठिकायस्थौ। जुज्यदिविअ (२)।

प्रकारः ॥ स्वगतं॥ दिट्ठिआ पत्युज्जीविदम्हि, अविदमा
दिके! (३)

श्रेष्ठिकाय। भो कं एसो ववहारो अवलंवदि?(४)

आधि। दुहं हि दिविधोव्यवहारः।

श्रेष्ठिकाय। केरिसौ?(५)

आधि। वाक्यानुसारेण, अर्थानुसारेण च। यस्यावदा

मया आत्मा एव निर्नाशितः। भवत्वेवं तावत्। अहो अधिक
रणभोजका, ननु भणामि, मया एव दृष्टा; किं कोलाहलं
कुरुत।

(१) हंहो; नूनं मोघस्थानया ग्रीवालिकया निःसुवर्ण
कैराभरणस्थानैः तर्कयामि।

(२) युज्यतेदृव।

(३) दिष्ट्या प्रत्युज्जीवितोऽस्मि।

(४) भो कमेषव्यवहारोऽवलम्बते?

(५) कीदृशौ?

Digitized by Google

क्यानुसारेण, स खल्वर्थिप्रत्यर्थिभ्यः। यस्यार्थानुसारेण सचाधिकरणिकबुद्धिनिष्पाद्यः।

श्रेष्ठिकाय। तावसन्तसेनामादरं अवलंबदि ववहारो (१)।

आधि। एवमिदं; भद्र शोधनक, वसन्तसेनामातरमनु द्वेजयन्नाक्षय।

शोधनकः॥ तथेति॥ निष्क्रम्य गणिकामाचा सह प्रविश्य॥ एदु, एदु, अज्जा (२)।

वृद्धा। गदा मे दारिआ मित्तघरअं अत्तणोजोव्वण मणुभविउं; एसो उण दीहाऊ भणादि, आअच्छ, आधि अलणिओ सद्दावेदि; ता मोहपरवअमिव अत्ताणअं अव गच्छामि, हिअअं मे थरहरेदि। अज्ज, आदेसेहि मे अधिअर णमण्डवस्स मग्गं (३)।

शोधनकः। एदु, एदु, अज्जा (४) ॥उभौ परिक्रामतः॥

---

(१) तस्मात् वसन्तसेनामातरमवलम्बते व्यवहारः।

(२) एतु, एतु, आर्य्या।

(३) गता मे दारिका मित्रगृहं आत्मनोयौवन मनु भवितुं; एष पुनर्दीर्घायुर्भणति, आगच्छ, आधिकरणिक आह्वयति; तन्मोहपरवशमिवात्मानमवगच्छामि, हृदयं मे प्रकम्पते। आदिश मह्यं अधिकरणमण्डपस्य मार्गं।

(४) एतु, एतु, आर्य्या।

Digitized by Google

शोधनकः। एदं अधिअरणमंडवं। एत्थ पविअदु अज्जा (१) ॥इत्युभौ प्रविशतः॥

वृद्धा ॥उपसृत्य॥ सुहं तुह्माणं भोदु भावमिस्साणं (२)।

आधि। भद्रे, स्वागतमास्यतां ॥ वृद्धा तथेत्युपविष्टा॥

अकारः॥साक्षेपं॥ आगदासि, वुड्ढकुट्टणि, आगदाशि?(३)

आधि। अये त्वं किल वसन्तसेनायामाता?

वृद्धा। अधइं? (४)

आधि। अथेदानीं वसन्तसेना क्व गता?

वृद्धा। मित्तघरअं (५)।

आधि। किन्नामधेयं तस्या मित्रं?

वृद्धा ॥स्वगतं॥ हद्धी, हद्धी, अदिलज्जणीयं खु एदं। ॥प्रकाशं॥ जणस्स पुकुणीओअअं अत्थो ण उण आधिअरणिअस्स (६)।

---

(१) एष अधिकरणमण्डपः। अत्र प्रविशत्वार्य्या।

(२) सुखं युष्माकं भवतु भावमिश्राणां।

(३) आगतासि, वृद्धकुट्टनि, आगतासि?

(४) अथकिं?

(५) मित्रगृहं।

(६) अतिलज्जनीयं खलु एतत्। जनप्रकृतीयोऽयमर्थः न पुनराधिकरणिकस्य।

Digitized by Google

आधि। अलं लज्जया, व्यवहारस्त्वां पृच्छति।

श्रेष्ठिकाय। ववहारोपुच्छदि, णत्थि दोसो, कधेहि (१)।

वृद्धा। कधं ववहारो जह, एवं, ता सुणंतु अज्जमिस्सा। सो खलु सत्थवाहविणयदत्तस्स णत्तिओ, सागरदत्तस्सतणओ, सुगिहिदणामहेओ अज्जचारुदत्तो णाम, सेट्ठिचत्तरे पडिवदि, तहिं मे दारिआ जोव्वणसुहमणुभवदि (२)।

प्रकारः। सुदं अज्जेहिं? लिक्खीयंतु एदे अक्खरा, चारुदत्तेण सह मम विवादे (३)।

श्रेष्ठिकाय। चारुदत्तोमिच्चेत्ति णत्थि दोसो (४)।

आधि। व्यवहारोऽयं चारुदत्तमवलम्बते।

श्रेष्ठिकाय। एवं विअ (५)।

---

(१) व्यवहारः पृच्छति, नास्ति दोषः, कथय।

(२) कथं व्यवहारोयमेवं, तदा शृण्वन्तु आर्यमिश्राः। स खलु सार्थवाहविनयदत्तस्य नप्ता, सागरदत्तस्य तनयः, सुगृहीतनामधेयः आर्यचारुदत्तोनाम, श्रेष्ठिचत्वरे प्रतिवसति, तत्र मे दारिका यौवनसुखमनुभवति।

(३) श्रुतमार्यैः? लिख्यन्तामेतान्यक्षराणि, चारुदत्तेन सह मम विवादे।

(४) चारुदत्तोमिचमिति नास्ति दोषः।

(५) एवमिव।

Digitized by Google

आधि। भनदत्त, वसन्तसेना आर्य्यचारुदत्तस्य गृहं गतेति लिख्यतां; व्यवहारस्य प्रथमः पादः। कथमार्य्यचारुदत्तोऽप्यस्माभिराक्षाययितव्यः। अथवा व्यवहारस्तमाक्षयति। भद्र शोधनक, गच्छ। आर्य्यचारुदत्तं खैरं असंभ्रान्तमनुद्विग्नं सादरमाक्षय, प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति।

शोधनकः। जं अज्जो आणवेदित्ति॥ निष्क्रान्तः, चारुदत्तेन सह प्रविश्य च॥ एदु, एदु, अज्जो (१)।

चारु॥ विचिन्त्य॥ परिज्ञातस्य मे राज्ञा शीलेन, चक्षुषेन च,

यत्सत्यमिदमाक्षानमवस्थामभिमन्यते।

॥ सवितर्कं स्वगतं॥

ज्ञातोनु किं स खलु बन्धनविप्रयुक्तो
मार्गं गतः प्रवहणेन मयापनीतः?
चारेक्षणस्य नृपतेः श्रुतिमागतोवा
येनाहमेवमभियुक्तइव प्रयामि।

अथवा किं विचारितेन। अधिकरणमण्डपमेव गच्छामि। भद्र शोधनक, अधिकरणस्य मार्गमादेशय।

शोधनकः। एदु, एदु, अज्ज (२) ॥ इति परिक्रामतः॥

---

(१) यदार्य्यआज्ञापयति। एतु, एतु, आर्य्यः।

(२) एतु, एतु, आर्य्यः।

Digitized by Google

चारु। ॥ सप्रश्रयं॥ तत्किमपरं।

रूक्षस्वरं वासति वायसोऽयममात्यभृत्यामुखराक्रयन्ति,
सव्यश्च नेत्रं स्फुरति, प्रसह्य ममानिमित्तानि हि खेदयन्ति।

शोधनकः। एदु, एदु, अज्जो (१)।

चारु ॥ सैरमसम्भ्रान्तं परिक्रम्यावलोक्य च॥

शुष्कतृचखिनोध्वाङ्क्ष आदित्याभिमुखस्तथा;
मयि चोद्यते वामं चक्षुर्घोरमसंशयं।

॥ पुनरन्यतोऽवलोक्य॥ अये कथमयं सर्व्वः।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः,
स्फुरितविततजिह्वः, शुक्लदंष्ट्राचतुष्कः,
अभिपतति सरोषोजिह्मिताभ्यामकुक्षि
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः।

अपिचेदं। स्खलति चरणं भूमौ न्यस्तं, नचार्द्रतमा मही;
स्फुरति नयनं, वामोबाहुर्भुजश्च विकम्पते,
शकुनिरपरस्त्रायं तावद्विरौति हि नैकशः,
कथयति महाघोरं, मृत्युं, नचाच विचारणा।

सर्व्वथा देवताः स्वस्ति करिष्यन्ति।

शोधनकः। एदु, एदु, अज्जो, इमं अधिअरणमण्डवं पविसदु अज्जो (२)।

---

(१) एतु, एतु, आर्य्यः।

(२) एतु, एतु, आर्य्योऽधिकरणमण्डपं प्रविशत्वार्य्यः।

Digitized by Google

चारु ॥ प्रविश्य समन्ताद्वलोक्य ॥ अहो अधिकरण मण्डपस्य परा श्रीः। दृढ हि।

चिन्तासक्तनिमग्नमन्त्रिसलिलं, दूतोर्म्मिभङ्गाकुलं,
पर्य्यन्तस्थितचारनक्रमकरं, नागाश्वहिंस्राश्रयं,
नानावाग्रककङ्कपक्षिरुचिरं कायस्थसर्पाश्रयं,
नीतिच्युतटच्च राजकरणं हिंस्रैः समुद्रायते।

भवतु ॥ प्रविशन्शिरोघातमभिनीय सवितर्कं ॥ अहह दृढमपरं।

सद्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा,
पन्थाः सर्पेण रुद्धोऽयं, स्वस्ति चास्मासु दैवतः।

तावत्प्रविशामि ॥ इति प्रविशति ॥

आधि। अयममौ चारुदत्तो, यएषः,

घोणोन्नतं मुखमपाङ्गविशालनेत्रं,
नैतद्विभाजनमकारणदूषणानां;
नागेषु, गोषु, तुरगेषु, तथा नरेषु,
नक्षाकृतिः सुसदृशं विजहाति वृत्तं।

चारु। भो अधिकृतेभ्यः स्वस्ति। हंहो नियुक्ता अपि कुशलं भवतां।

आधि ॥ ससंभ्रमं ॥ स्वागतमार्य्यस्य; भद्र गोधनक, आर्य्यं स्वासनमुपनय।

शोधनकः ॥ आसनमुपनीय ॥ एदं आसनं, एत्थ उवविसदु अज्जे (१)।

चारु ॥ उपविशति ॥

प्रकारः ॥ सक्रोधं ॥ आगदेशि रे दुत्थिआघादआ, आगदेशि? अहो णाए ववहारे, अहो धम्मे ववहारे, जं एअस्सघादुत्थिआघादुकाहु आसणेण्दीअदि सगव्वं, भोदु, णंदीअदु (२)।

आधि। आर्य्य चारुदत्त, अस्ति भवतोऽस्माआर्य्याया दुहित्रा सह प्रसक्तिः प्रणयः प्रीतिर्वा?

चारु। कस्याः।

आधि। अस्याः ॥ इति वसन्तसेनामातरं दर्शयति ॥

चारु ॥ उत्थाय ॥ आर्य्ये, अभिवादये।

वृद्धा। जाद चिरे मे जीव ॥ स्वगतं ॥ अअं सो चारुदत्तो; सुणिक्खित्तं खु दारिआए जोव्वणं (३)।

आधि। आर्य्य, गणिका तव मित्रं?

चारु ॥ लज्जां नाटयति ॥

---

(१) इदमासनमत्रोपविशत्वार्य्यः।

(२) आगतोऽसि रे स्त्रीघातक आगतोऽसि? अहोन्यायः व्यवहारः, अहो धर्म्माव्यवहारः, यदेतदन्यस्य स्त्रीघातकस्य आसनं दीयते सगर्व्वं; भवतु, ननु दीयतां।

(३) तात चिरं मे जीव। अयं स चारुदत्तः; सुनिक्षिप्तं खलु दारिकया यौवनं।

Digitized by Google

प्रकारः। लज्जाए, अदु भीलुदाए वा, चारित्तं अलिए णिगूहिदुं, सअं दूत्थिअं मालिअ अत्थकारणाए णिगूहदि, न तं हि भट्टको (१)।

श्रेष्ठिकाय। अज्ज चारुदत्त, भणाहि; अलं लज्जाए, ववहारो खु एसो (२)।

चारु ॥ सलज्जं॥ भो अधिकृता, मया कथमीदृशं वक्तव्यं। यथा गणिका मम मित्रमिति; अथवा; यौवनमत्रापराध्यति, न चारित्र्यं।

आधि। व्यवहारः सविश्रोयं, त्यज लज्जां हृदि स्थितां;

ब्रूहि सत्यमलं धैर्य्यं, कुलमत्र न गृह्यते।

अलं लज्जया, व्यवहारस्यां प्रकृति।

चारु। अधिकृत, केन सह मम व्यवहारः?

प्रकारः। अले, मए सह ववहारो (३)।

चारु। त्वया सह मम व्यवहारः सुदुस्सहः।

---

(१) लज्जया, अथवा भीरुतया वा, चारित्रं अलीकं निगूहितं, स्वयं स्त्रीं मारयित्वा अर्थकारणाय निगूहति न तत् भट्टकः।

(२) आर्य्य चारुदत्त, भण; अलं लज्जया, व्यवहारः खल्वेषः।

(३) अरे, मया सह व्यवहारः।

Digitized by Google

प्रकारः। अए इत्थिआघादआ, तं तादिसिं रत्नशतभूषणियं वसन्तसेणिअं मालिअ, संपदं कवडकावडिकी भविअ णिगूहेसि (१)।

चारु। असंबद्धः खलभसि।

आधि। आर्य्य चारुदत्त, अलमनेन; ब्रूहि, सत्यं अपि गणिका तव मित्रं।

चारु। एवमेवं।

आधि। आर्य्य, वसन्तसेना क्व।

चारु। गृहं गता।

श्रेष्ठिकाय। कथं गता, कदा गता? गच्छन्ती वा केन अनुगता? (२)

चारु ॥ स्वगतं॥ किं ब्रह्मणं गतेति ब्रवीमि।

श्रेष्ठिकाय। अज्ज कधेहि (३)।

चारु। गृहं गता; किमन्यद्ब्रवीमि।

प्रकारः। मम केलकं पुप्फकरंडकजिणुज्जाणं पवेसिअ,

---

(१) अरे स्त्रीघातक; तां तादृशीं रत्नशतभूषणां वसन्तसेनां मारयित्वा, साम्प्रतं कपटकापटिकोभूत्वा निगूहसि।

(२) कथं गता, कदा गता? गच्छन्ती वा केन अनुगता?

(३) आर्य्य कथय।

Digitized by Google

अत्थणिमित्तं वाऊपाअवलक्कारेण मारिदा, अण्ण संपदं वद्धिं घलं गदेति (१)।

चारु। आः असंबद्धप्रलापिन्।

अभ्युच्चितोऽपि सलिलैर्नवतोयदानां,
चापाग्रपक्षसदृशं भ्रमरान्तराले;
मिथ्यैतदाननमिदं भवतस्तथाहि
हेमन्तपद्ममिव निःप्रभतामुपैति।

आधि ॥ जनान्तिकं ॥

तुलनं चाद्रिराजस्य, समुद्रस्य च तारणं,
ग्रहणं चानिलस्येव, चारुदत्तस्य दूषणं।

॥ प्रकाशं ॥ आर्य्य चारुदत्तः; खल्वसौ कथमिदमकार्य्यं करिष्यति।

शकारः। किं पक्खवादेण ववहारे दीअदि? (२)

आधि। अपेहि मूर्ख।

वेदार्थान् प्राकृतस्त्वं वदसि, न च ते जिह्वा निपतिता?
मध्याह्ने वीक्षसेऽर्कं, न तव सहसा दृष्टिर्विचलिता?

---

(१) मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य, अर्थनिमित्तं वाऊपाग्रवलात्कारेण मारिता, अथ साम्प्रतं वर्द्धिं गृहं गतेति।

(२) किं पक्षपातेन व्यवहारोऽद्यतां?

Digitized by Google

दीप्ताग्नौ पाणिमन्तः क्षिपसि, न च ते तत्क्षणं दह्यतेऽसौ?
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः;
आर्य्य चारुदत्तः कथमयमकार्य्यं करिष्यति।

क्षला समुद्रमुदकोक्षयमाचरेषं,
दत्तानि येन हि धनान्यनपेक्षितानि,
स श्रेयसां कथमिवैकनिधिर्म्महात्मा
पापं करिष्यति धनार्थमवीरजुष्टं?

शकारः। किं पक्खवादेण ववहारे दीसदि?(१)

हद्धी। हदाश, जो दाणिं णासीकदं सुवण्णभंडअं रत्तिं चोरेहिं अवहरदत्ति, तस्स कालणादो चदुस्समुद्दसारभूदं रअणावलिं देदि, सो दाणिं अत्थकल्लवत्तस्स कारणादो, इमं अकज्जं करेदि? हा जादे, एहि मे पुत्ति॥ इति रोदिति॥(२)

आधि। आर्य्य चारुदत्त, किमसौ पद्भ्यां गता उत प्रवहणेनेति।

चारु। ननु मम प्रत्यक्षं न गता, तन्न जाने। किं पद्भ्यां गता उत प्रवहणेनेति।

---

(१) किं पक्षपातेन व्यवहारोदृश्यते।

(२) हताश, यदृदानीं न्यासीकृतं सुवर्णभाण्डं रात्रौ चौरैरपहृतमिति, तस्य कारणात् चतुःसमुद्रसारभूतां रत्नावलीं ददाति, यदृदानीं अर्थकल्पवर्त्तस्य कारणात्, इदमकार्य्यं करोति? हा जाते, एहि मे पुत्रीति।

Digitized by Google

प्रविश्य ॥ सामर्षोवीरकः ॥

पादप्पहारपरिभवविमाणणा वद्धगरुअवेरस्स।
अणुसोअंतस्स दृयं कधंपि रत्ती पभादा मे।

ता जाव अधिअरणमण्डवं उवसप्पामि ॥ प्रवेष्टकेन ॥ सुहं अज्जमिस्साणं (१)।

आधि। अये नगररक्षाधिकृतोवीरकः। वीरक, किमा गमनप्रयोजनं?

वीरकः। ही, वंधणभेअणसंभमे अज्जकं अण्णेसंन्तो, ओव्वाडिदं पवहणं वच्चदित्ति विआरं करेंन्तो अण्णेसंतो, अरे तुएवि आलोदृदे मएवि आलोदृदव्वोत्ति भणंतोजेव्व, चंदणमहत्तलएण पादेण ताडिदोम्हि। एदं सुणिअ अज्जमिस्सा पमाणं (२)।

---

(१) पादप्रहारपरिभवविमाननाबद्धगुरुकवैरस्य,
अनुशोचतहृयं कथमपि रात्रिः प्रभाता मे।
तद्यावदधिकरणमण्डपमुपसर्पामि। शुभमार्य्यमिश्राणां।

(२) ही, विस्मये, बन्धनभेदनसंभ्रमे आर्य्यकमन्वेषयन्, अपवारितं प्रवहणं व्रजतीति विचारं कुर्व्वन् अन्वेषयन्, अरे त्वयापि आलोकितं मयाप्यालोकितव्यमिति भणन्नेव, चन्दनमहत्तरकेण पादेन ताडितोऽस्मि। एतच्छ्रुत्वा आर्य्यमिश्राः प्रमाणं।

Digitized by Google

आधि। भद्र, जानीषे कस्यतत्प्रवहणमिति।

वीरकः। दूमस्स अज्जचारुदत्तस्स, वसंतसेणा आरुढा, पुप्फकरंडकजिण्णुज्जाणं कीलिदुं णीअदित्ति पवहणवाहएण कहिदं (१)।

शकारः। पुणोवि सुदं अज्जेहिं (२)।

आधि। एष भो निर्मलज्योत्स्नोराजुणा यस्यते शशी,
जलं कूलावपातेन प्रसन्नं कलुषायते।

वीरक, पश्चादिह भवतोन्यायं द्रक्ष्यामः। यएष अधिकरणे दार्यस्यस्तिष्ठति, तमेनमारुह्य, गत्वा पुष्पकरंडकोद्यानं, द्रक्ष्यतां; अस्ति तत्र काचिद्विपन्ना स्त्री न वेति।

वीरकः। जं अज्जो आणवेदि ॥ इति निष्क्रान्तः॥ प्रविश्य च॥ गदोम्हि तहिं, दिट्ठं च मए दूत्तिआकलेवरं सावदेहिं, विलुप्पं (३)।

श्रेष्ठिकाय। कधं तुए जाणिदं दूत्थिआकलेवरत्ति (४)।

---

(१) अस्य चारुदत्तस्य, वसन्तसेना आरूढा, पुष्पकरण्डक जीर्णोद्यानं क्रीडितुं नीयते, इति प्रवहणवाहकेन कथितं।

(२) पुनरपि श्रुतमार्यैः।

(३) यदार्य्यआज्ञापयति। गतोऽस्मि तत्र, दृष्टश्च मया स्त्रीकलेवरं श्वापदैर्विलुप्तं।

(४) कथं त्वया ज्ञातं स्त्रीकलेवरमिति।

Digitized by Google

वीरकः। सावसेसेहिं केसहत्थपाणिपादएहिं उवल क्खिदं मए (१)।

आधि। अहो धिग्वैषम्यं लोकव्यवहारस्य।

यथा यथेदं निपुणं विचार्य्यते, तथा तथा सङ्कटमेव दृश्यते;
अहा सुसन्ना व्यवहारनीतयोमतिस्तु, गौः पङ्कगतेव सीदति।

चारु ॥ खगतं॥

यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति,
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्थावशलीभवन्ति।

आधि। आर्य्य चारुदत्त, सत्यमभिधीयतां।

चारु। दुष्टात्मा परगुणमत्सरीमनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः,
किं योयद्वदति, मृषैव जातिदोषा
त्तद्वाच्यं भवति, न तद्विचारणीयं।

अपिच। योऽहं लतां कुसुमितामपि पुष्पहेतो
राक्षस्य नैव कुसुमावचयं करोमि,
सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे प्रगृह्य रुदतीं प्रमदां निहन्मि।

शकारः। हंहो, अधिअलणभोदआ; किं तुम्हे पक्खवादेण

---

(१) सावशेषैः केशहस्तपाणिपादैरुपलक्षितं।

ववहालं, पेक्खध, जेण अज्जवि एसे इदासचारुदत्ते आसणे धालीअदि (१)।

आधि। भद्र शोधनक। एवं क्रियतां॥ शोधनः तथाकरोति॥

चारु। विचार्य्यतां, भोअधिकृता, विचार्य्यताम् ॥ इति, आसनादवतीर्य्य भूमौ उपविशति॥

प्रकारः ॥ खगतं; सहर्षं नर्त्तित्वा॥ ही; अणेण मए कडे पावे अण्णस्स मत्थके निवडिदे; ता जहिं चालुदत्ताके उवविशदि तहिं हगे उवविशामि ॥ तथा कृत्वा ॥ चारुदत्ता, पेक्ख, पेक्ख मं; ता भण, भण, मए मारिदेत्ति (२)।

चारु। भोअधिकृता ॥ दुष्टात्मेति पूर्व्वार्द्धं पठति॥ सनि श्वासं खगतं॥

मैत्रेय, भोः किमिदमद्य ममोपघातो!
हा ब्राह्मणि द्विजकुले विमले प्रसूता!
हा रोहसेन नहि पश्यसि मे विपत्तिं!
मिथ्यैव नन्दसि परव्यसनेन नित्यं।

---

(१) हंहो, अधिकरणभोजकाः; किं यूयं पक्षपातेन व्यवहारं, पश्यत, येनाद्यापि एषदासश्चारुदत्तआसने धार्य्यते।

(२) अनेन मया कृतं पापं अन्यस्य मस्तके निपतितं, तत् यत्र चारुदत्तउपविशति तत्राहं उपविशामि। चारुदत्त, पश्य, पश्य मां; तत् भण, भण, मया मारिताइति।

Digitized by Google

प्रेषितस्य मया तदार्य्यान्वेषणाय मैत्रेयोवसन्तसेनायकाशं, शकटिकानिमित्तञ्च तस्य प्रदत्तान्यलङ्करणानि प्रत्यर्पयितुं; तत्कथं चिरयते ॥ ततः प्रविशति गृहीताभरणोविदूषकः ॥

विदू। पेसिदोम्हि अज्जचारुदत्तेण वसन्तसेणासआसं; तहिं अलङ्करणादं गेह्हिअ, जधा अज्ज मित्तेअ, वसन्तसेणाए वक्षोरोहसेणो अलंकारेण अलंकरिअ, जणणीसआसं पेसिदा, दूमस्सु आहरणं दादव्वं ण उण गेह्हिदव्वं, ता समप्पेहित्ति। ता जाव वसन्तसेणासआसं जेव्व गच्छामि ॥ परिक्रम्यावलोक्य च आकाशे ॥ कधं भाव रेभिलः। भो भाव रेभिल, किंनिमित्तं तुमं उव्विग्गो उव्विग्गो विअ लक्खीअसि ॥ आकर्ण्य ॥ किं भणासि? पिअवअस्सो चारुदत्तो अधिअरणमण्डवं सद्दावी अदित्ति, ता णउ अप्पेण कज्जेण होदव्वं ॥ विचिन्त्य ॥ ता पढा वसन्तसेणासआसङ्गमिस्सं; अधिअरणमण्डवं दावगमिस्सं ॥ परिक्रम्यावलोक्य च ॥ इदं अधिअरणमण्डवं, ता जाव पविसामि ॥ प्रविश्य ॥ सुहं अधिअरणभोदुआणं; कहिं मम पिअवअस्सो? (१)

---

(१) प्रेषितोऽस्मि आर्य्यचारुदत्तेन वसन्तसेनासकाशं; तच्चालङ्करणानि गृहीत्वा, यथा आर्य्यमैत्रेयो, वसन्तसेनाया वक्षोरोहसेनः अलङ्कारेणालङ्कृत्य, जननीसकाशं प्रेषितः, अस्याभरणं दातव्यं, न पुनर्गृहीतव्यं, तत्समर्पयेति। यावत्

आधि। नन्वेष तिष्ठति।

विदू। वअस्स सोत्थि दे (१)।

चारु। भविष्यति।

विदू। अवि क्खेमन्दे (२)।

चारु। एतदपि भविष्यति।

विदू। भो वयस्स, किं णिमित्तं उव्विग्गो उव्विग्गो विअ लक्खीअसि। कुदो वा सद्दादो (३)।

चारु। वयस्य।

मया खलु नृशंसेन परलोकमजानता,
स्त्रीरतिर्व्याविशेषेण; शेषमेषोऽभिधास्यति।

वसन्तसेनासकाशमेव गच्छामि। कथं भाव रेभिलः भो, भाव रेभिल, किं निमित्तं त्वमुद्विग्नइव लक्ष्यसे। किं भणसि? प्रियवयस्यस्यारदत्तः अधिकरणमण्डपं शब्दायते, इति; तत् न खलु अल्पेन कार्य्येण भवितव्यं। तत्पस्यात् वसन्तसेनासकाशं गमिष्यामि, अधिकरणमण्डपं तावत् गमिष्यामि। अयमधिकरणमण्डपः; तत् यावत् प्रविशामि। सुखं अधिकरणभोजकानां, कुच मम प्रियवयस्यः?

(१) वयस्य स्वस्ति ते।

(२) अपि क्षेमं ते।

(३) भो वयस्य, किं निमित्तं उद्विग्नः उद्विग्नइव लक्ष्यसे, कुतो वा आहतः?

Digitized by Google

विदू। किं किं?

चारु ॥ कर्णे॥ एवमेवं।

विदू। को एव्वं भणादि?(१)

चारु ॥ संज्ञया शकारं दर्शयति॥ नन्वेष तपस्वी हेतु भूतः कृतान्तोमां व्याहरति।

विदू॥ जनान्तिकं॥ एव्वं, कीस ण भणीअदि गेहं गदत्ति?(२)

चारु। उच्यमानमपि अवस्थादोषान्न गृह्यते।

विदू। भो भो अज्जा; जेन दाव पुरत्तावणविहारारा मदेउल्लतडागकूवजूवेहिं अलङ्किदा णअरी ऊज्जअणी, सो अ णीसो अत्थकल्लवत्तकारणदो ईदिसं अकज्जं अणुचिट्ठदित्ति? ॥ सक्रोधं॥ अरे रे काणेलीसुदा, रासभालसंठाणणआ, दुस्संखणआकिदजणदोसमण्डआ, वज्जसुवणमण्डिदमक्कडअ! भण भण मम अग्गदो, जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पिआअम्बिअ कुसुमावचयं ण करेदि, कदावि आअधत्ताए पल्लवच्छेऊ भोदित्ति; सो कधं एरिसं अकज्जं उहअ लोअविरुद्धं करेदि? चिट्ठ रे कुट्ठणिउत्ता, जाव एदिणा तव हिअअकुडिलेण दण्डअट्ठेण मत्थअं दे सदखण्डं करेमि(३)।

---

(१) कएवं भणति?

(२) एवं, किमर्थं न भण्यते गृहं गतेति।

(३) भो भो आर्याः; येन तावत् पुरस्थापनविहारा

शकारः ॥ सक्रोधं॥ सुणंतु सुणंतु अज्जमिस्सा। चारुदत्तेण सह मम विवादे, ववहारे वा, ता कीस एसे काक पदसीसमत्थकादुट्ठवटुका मम सिरे सदखण्डे करेदि। मा दाव से दासीएउत्ता, दुट्ठवटुका (१)।

विदू ॥ दण्डकाष्ठमुद्यम्य पूर्व्वोक्तं पठति॥

शकारः ॥ सक्रोधमुत्थाय ताडयति॥

विदू ॥ प्रतीपं ताडयति। अन्योन्यं ताडयतः विदूषकस्य कक्षादेशादाभरणानि पतन्ति॥

रामदेवालयतडागकूपयूपैरलङ्कृता नगरी उज्जयिनी, सः अनीशः अर्थकल्पवर्त्तकारणात् ईदृशमकार्य्यं अनुतिष्ठतीति? अरे रे कुलटापुत्र, राजश्यालक, संस्थानक, दुःशङ्कन हतजन दोषभाण्ड, वज्रसुवर्णमण्डितमर्कटक, भण, भण, ममायतः यदिदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामाक्रम्य कुसुमावचयं न करोति, आक्रष्टतया पल्लवच्छेदोभवतीति, सकथमीदृशमकार्य्यमुभयलोकविरुद्धं करोति! तिष्ठ रे कुट्टिनीपुत्र, यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करामि।

(१) गृह्णन्तु गृह्णन्तु आर्य्यमिश्राः; चारुदत्तेन सह मम विवादे, व्यवहारे वा, किमर्थमेष काकपदशीर्षमस्तकः दुष्ट वटुकः मम शिरः शतखण्डं करोति! मा तावत्, रे दास्याः पुत्र, दुष्टवटुक।

Digitized by Google

प्रकारः ॥ तानि गृहीत्वा दृष्ट्वा सभाध्वं॥ पेक्खन्तु, पेक्खन्तु अय्या; एदे खु ताए तवस्सिए केलका अलङ्कारा ॥ चारुदत्त-मुद्दिश्य॥ दूमस्स अत्थकज्जवत्तस्स कारणाए एसा मारिदा वावादिदा अ (१)।

॥ अधिष्ठिताः सर्व्वे अधोमुखाः स्थिताः॥

चारु ॥ जनान्तिकं॥

अयमेवंविधे काले दृष्टोभूषणविस्तरः,
अस्माकं भाग्यवैषम्यात्पतितः पातयिष्यति।

विदू। भो कीश भूदत्थं ण णिवेदीयदि? (२)

चारु। त्रयस्य।

दुर्व्वलं नृपतेश्चुर्न्नैतत्तलं निरीक्षते,
केवलं वदतोदैन्यमसाध्यं मरणं भवेत्।

आधि। कष्टं भोः कष्टं।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः,
ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः।

---

(१) पश्यन्तु, पश्यन्तु आर्य्याः; एते खलु तस्यास्तपस्विन्या अलङ्काराः। अस्य अर्थकल्पवर्त्तस्य कारणाय एषा मारिता व्यापादिता च।

(२) भोः किमर्थं भूतार्थोन निवेद्यते।

Digitized by Google

श्रेष्ठिकाय ॥ विलोक्य वसन्तसेनामातरमुद्दिश्य॥ अवहिदा दाव अज्जा, एदं सुवण्णभण्डअं अवलोअदु; सो जेव्व एसो णवेत्ति (१)।

वृद्धा ॥ अवलोक्य ॥ धरिसोएसो, एसो ण उण सो (२)।

प्रकारः। अं वुड्ढकुट्टणि, अक्खीहिं मन्तिदं वाआए मूकिदं (३)।

वृद्धा। हदास, अवेहि (४)।

श्रेष्ठिकाय। अप्पमत्तं कधेहि; सो जेव्व एसो ण वेत्ति (५)।

वृद्धा। अज्ज, सिप्पिकुसलदाए आवंधे दिट्ठिं; ण उण सो (६)।

आर्धि। भद्रे, अपि जानासेतान्याभरणानि।

---

(१) अवहिता तावदार्य्या, इदं सुवर्णभाण्डं अवलोक यतु; तदेवेदं नवेति।

(२) सदृशएष, एष न पुनः सः।

(३) वृद्धकुट्टिनि, अक्षिभ्यां मन्त्रितं वाचा मूकितं।

(४) हताश, अपेहि।

(५) अप्रमत्तं कथय; सएव एष न वेति।

(६) आर्य्य, शिल्पिकुशलतया अवबध्नाति दृष्टिं; न पुनः सः।

Digitized by Google

दृष्ट्वा। णं भणामि। णक्ष अण्णदो; अहवा कदावि, केणावि सिप्पिणा घडिदा भवे (१)।

आर्षि। पश्य श्रेष्ठिन्।

वस्त्वन्तराणि सदृशानि भवन्ति नूनं,
रूपस्य भूषणगुणस्य च कृत्रिमस्य,
दृष्ट्वा क्रियामनुकरोति हि शिल्पवर्गः
सादृश्यमेव कृतहस्ततया च दृष्टं।

श्रेष्ठिकाय। अज्ज चारुदत्तस्स केरकाणि एदाणि (२)।

चारु। न खलु, न खलु।

श्रेष्ठिकाय। ता कस्स? (३)

चारु। दुहाऽत्तभवत्यादुहितुः।

श्रेष्ठिकाय। कधं एदाइं ताए विआअं गदाइं? (४)

चारु। एवं गतानि, आं इदं।

श्रेष्ठिकाय। अज्ज चारुदत्त, एत्थ सच्चं वत्तव्वं। पेक्ख,

---

(१) ननु भणामि। न खलु अन्यतः; अथवा, कदापि शिल्पिना घटितोभवेत्।

(२) आर्य्य चारुदत्तीयान्येतानि।

(३) तदा कस्य?

(४) कथमेतानि तस्याविवाहं गतानि?

Digitized by Google

पेक्ख, सच्चेण सुहं खु लब्भइ, सच्चालावे ण होइ पावं; सच्चंति वे वि अक्खला, मा सच्चं अलिएण गुहेहि (१)।

चारु। आभरणान्याभरणानीति न जाने; किं तस्मादृहा दानीतानीति जाने।

शकारः। उज्जाणं पवेसिअ पढमं मालेमि, कवड़काबड़िआए संपदं णिगूहेमि (२)।

आधि। आर्य्य चारुदत्त, सत्यमभिधीयतां।

इदानीं सुकुमारेऽस्मिन् निःशङ्कं कर्कशाः कशाः,
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः।

चारु। अपापानां कुले जाते मयि पापं न विद्यते,
यदि सम्भाव्यते पापं, अपापेन च किं मया।

स्वगतं॥ नच मे वसन्तसेनाविरहितस्य जीवितेन कृत्यं। प्रकाशं॥ भोः किं बहुना?

मया किल नृशंसेन लोकद्वयमजानता,
स्त्रीरत्नञ्च विशेषेण शेषमेषोऽभिधास्यति।

---

(१) आर्य्य चारुदत्त, अत्र सत्यं वक्तव्यं। पश्य, पश्य, सत्येन सुखं खलु लभ्यते सत्यालापेन न भवति पातकं, सत्यमिति द्वे अक्षरे, मा सत्यं अलीकेन गूहय।

(२) उद्यानं प्रवेश्य प्रथमं मारयसि, कपटकापटिकतया शास्त्रतं निगूहसि।

शकारः। वावादिदा; अले तुमंपि भण, मए वावादि इत्ति (१)।

चारु। त्वयैवोक्तं।

शकारः। घुणेध, घुणेध, भट्टालका; एदेण मालिदा। एदेण जेव्व संशए छिन्ने एदस्स दलिद्दचारुदत्तस्स शालीले दण्डे धालीअदु (२)।

आधि। शोधनक यथाह राज्ञियः। भो राजपुरुषा गृह्यतामयं चारुदत्तः ॥ राजपुरुषा गृह्णन्ति ॥

वृद्धा। पसीदन्तु पसीदन्तु अज्जमिस्सा; जो दाव चोरेहिं अवहदस्स ॥ इत्यादि पूर्व्वोक्तं पठति॥ ता जदि वावादिदा मम दारिआ, वावादिदा; जीवदु मे दीहाऊ। अणंच। अत्थि पच्चत्थिणं ववहारो; णअ अहं अत्थिणी; ता मुंचध एदं (३)।

---

(१) व्यापादिता; अरे त्वमपि भण, मया व्यापादितेति।

(२) घृणुत, घृणुत, भट्टारका; एतेन मारिता। एतेनैव संशये च्छिन्ने एतस्य दरिद्रचारुदत्तस्य शरीरे दण्डो धार्य्यतां।

(३) प्रसीदन्तु प्रसीदन्तु आर्य्यमिश्राः; यस्मात् चौरैरपहृतस्य। तदा यदि व्यापादिता मम दारिका, व्यापादिता; जीवतु मे दीर्घायुः। अन्यच्च। अर्थिप्रत्यर्थिनोर्व्यवहारः नचाहमर्थिनी; तत् मुञ्चतैनं।

Digitized by Google

प्रकारः। अपेहि गर्भदासि; गच्छ; किं तव एदिणा? (१)

आधि। आर्य्ये गम्यतां। हे राजपुरुषा निष्क्रामयतैनं।

दृष्ट्वा। हा जाद, हा पुत्तअ॥ इति रुदती निष्क्रान्ता॥ (२)

प्रकारः॥ खगतं॥ कडं मए एदस्स अत्तणो सरिसं; संपदं गच्छामि (३)॥ निष्क्रान्तः॥

आधि। आर्य्य चारुदत्त; निर्घृणे वयं प्रमाणं; शेषे तु राजा; तथापि शोधनक विज्ञाप्यतां राजा पालकः।

अयं हि पातकी विप्रो, न वध्योऽमनुरब्रवीत्;
राष्ट्रादस्मात्तु निर्व्वास्यो विभवैरक्षतैः सह।

शोधनक। जं अज्जो आणवेदि॥ इति निष्क्रम्य पुनः प्रविश्य, सासं॥ अज्जा, गदम्हि। तहिं सालआ पालओ भणादि, जेण अत्थकम्मवत्तस्स कारणादो वसन्तसेणा मारावादिदा, तं तहिं जेव्व आहरणादु गले बंधिअ, डिंडिअ दक्खिणसाणं णेदूय, सूले भज्जेधत्ति। जो कोवि अवरो एरिसमकज्जमणुचिट्ठदि सो एदिणा सणिआरदण्डेण साधि अदि (४)।

---

(१) अपेहि गर्भदासि, गच्छ; किं तवैतेन।

(२) हा तात, हा पुत्रक।

(३) कृतं मयैतस्य आत्मनः सदृशं, साम्प्रतं गच्छामीति।

(४) यदार्य्य आज्ञापयति। आर्य्या, गतोऽस्मि; तत् राजा पालकोभणति, येन अर्थकर्मवर्त्तस्य कारणात् वसन्तसेना

चारु। अहो अविवेकोविमृष्यकारी राजा पालकः।

अथवा। दुर्दृशे व्यवहाराय मन्त्रिभिः परिपालिताः,
स्थाने खलु महीपालागच्छन्ति कृपणां श्रियं।

अपिच। दुर्दृशैः श्वेतकाकीयैः राज्ञः शासनदूषकैः,
अपापानां सहस्राणि हन्यन्ते च हतानि च।

सखे मैत्रेय गच्छ मद्वचनादस्मामपश्चिममभिवादयस्व। पुत्रञ्च मे रोहसेनं परिपालयस्व।

विदू। मूले छिन्ने कुदो पादवस्स पालणं (१)।

चारु। मामैवं

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः;
मयि योयस्तव स्नेहोरोहसेने स युज्यतां।

विदू। भो वअस्स, अहन्ते पिअवअस्सोभविअ, तुए विरहिदं पाणाइं धारेमि? (२)

व्यापादिता, तं तत्रैव आभरणानि गले बद्ध्वा, डिण्डिमं ताडयित्वा, दक्षिणश्मशानं नीत्वा, मूले भञ्जत। इति यः कोऽप्य परदुर्दृशमकार्यमनुतिष्ठति, स एतेन निकारदण्डेन शास्यते।

(१) मूले छिन्ने, कुतः पादपस्य पालनं?

(२) भो वयस्य, अहं ते प्रियवयस्यो भूत्वा, त्वया विरहितान् प्राणान् धारयामि?

Digitized by Google

चारु। रोहसेनमपि तावद्दर्शय।

विदू। एवं जुज्जदि (१)।

आधि। भद्र शोधनक, अपसार्यतामयं वाहकः ॥ शोधन तथा करोति ॥

आधि। कः कोऽत्र भो चाण्डालानां दीयतामादेशः। ॥ इति चारुदत्तं विसर्ज्य निष्क्रान्ताः सर्वे राजपुरुषाः ॥

शोधनकः। इदो आअच्छदु अज्जो (२)।

चारु ॥ सकरुणं॥ मैत्रेय, योऽयमेवं विधे काले इत्यादि पठति ॥ आकाशे ॥

विषसलिलतुलाग्निप्रार्थिते मे विचारे,
कवचमिह शरीरे वीक्ष्य दातव्यमद्य;
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि,
पतसि नरकमध्ये पुत्रपौत्रैः समेतः।
अयमागतोऽस्मीति ॥ निष्क्रान्ताः सर्वे॥

व्यवहारोनाम नवमोऽङ्कः समाप्तः।

---

(१) एवं युज्यते।

(२) इत आगच्छतु आर्यः।

Digitized by Google

अथ दशमाङ्कः।

ततः प्रविशति चाण्डालद्वयेनानुगम्यमानश्चारुदत्तः।

उभौ। तल्किं ण कलअद कालण णववहबन्धणअणे णिउणा,
अद्दलेण सीसकेअणसूलालोवेसु कुअलं ह्म,
अोअलध, अज्जा, अोअलध। एशे अज्जचारुदत्ते दिण्ण
कलवीडदामे गहिदे, अम्हेहिं वज्झपुलिसेहिं, दीवेजेव्व मन्द
णेहे थोअं थोअं खअं जादु (१)।

चारु। ॥ सविषादं॥

नयनसलिलसिक्तं पांशुरुच्छोढताङ्गं,
पिढवनसुमनोभिर्वेष्टितं मे शरीरं;
विरसमिह रटन्तोरक्तगन्धानुलिप्तं,
बलिमिव परिभोक्तुं वायसास्तर्कयन्ति।

---

(१) तत्किं न कलयत कारणं नववधबन्धनगणे निपुणाः
अचिरेण शीर्षच्छेदनशूलारोपेषु कुशलौ खः।
अपसरत, आर्य्या, अपसरत। एष आर्य्यचारुदत्तः दत्त
करवीरदामा गृहीतः, आवाभ्यां बध्यपुरुषाभ्यां, दीपइव
मन्दस्नेहकः स्तोकं स्तोकं क्षयं याति।

Digitized by Google

चाण्डालौ। ओअलध, अज्जा, ओअलध। किं पेक्खध? छिज्जंत्तं अप्पुलिअं कालपरसुधाराहिं, सुअणसउणाधिवासं अज्जणपुलिअद्दुमं एदं। आअच्छ, ले चालुदत्ता, आअच्छ(१)।

चारु। पुरुषभाग्यानामविचिन्त्याः खलु व्यापाराः यदहमीदृशीं दशामनुप्राप्तः।

सर्व्वगात्रेषु विन्यस्तैरक्तचन्दनहस्तकैः,
पिष्टचूर्णावकीर्णश्च, पुरुषोऽहं प्रभूकृतः।

॥ अथतोनिरूप्य ॥ अहोतारतम्यं नराणां ॥ सकरुणं ॥

अमी हि दृष्ट्वा मदुपेतमेतन्मर्त्यं धिगस्त्वित्युपजातबाष्पाः,
अशक्नुवन्तः परिरक्षितुं मां, स्वर्गं लभस्वेति वदन्ति पौराः।

चाण्डालौ। ओअलध, अज्जा, ओअलध, किं पेक्खध?

दुंदे पराहिअंते, गोप्पअवे, अंकमं च तालाणं,
सुप्पुरिअपाणविपत्ती, चत्तालि दूमेण दट्ठव्वा(२)।

---

(१) अपसरत, आर्य्या, अपसरत। किं पश्यत? छिद्यमानं सत्पुरुषं कालपरशुधाराभिः, सुजनशकुनाधिवासं सज्जन पुरुषद्रुममेतं। आगच्छ, रे चारुदत्त, आगच्छ।

(२) अपसरत, आर्य्या, अपसरत, किं पश्यत?

द्वन्द्वः प्रवाह्यमाणो, गोप्रसवः, संक्रमश्च तारणां,
सुपुरुषप्राणविपत्तिश्चत्वारो दूमेन द्रष्टव्याः।

Digitized by Google

एकः। हञ्जे, आहीन्ता; पेक्ख, पेक्ख।

णअली पधाणभूअम्मी अन्ते कदन्तअसाए,

किं, रुअदि अन्तलिक्खे? आदु अणभ्मे पडदि वज्जे? (१)

द्वितीयः। अरे, गोहा।

णअ रुअदि अन्तलिक्खे, णेअ अणभ्मे पडदि वज्जं,

महिलासमूहमेघे निवडद् णअणंबुधाराहिं।

॥ अपिच ॥

वज्झम्मि णीअमाणे जणस्स सव्वस्स रोदमाणस्स,

णअणसलिलेहिं सित्ते सक्कादो ण उग्गमद् रेणु (२)।

चारु ॥ निरूप्य सकरुणं॥

एताः पुनर्हर्म्यगताः स्त्रियोमां वातायनार्द्धेन विनिःसृतास्याः,

हा चारुदत्तेत्यभिभाषमाणा,वाष्पं प्रणाशीभिरिवोत्सृजन्ति।

---

(१) अरे, आहीन्ता; पश्य, पश्य।

नगरी प्रधानभूते वध्यमाने कृतान्तास्यया,

किं रोदिति अन्तरीक्षं? अथवा अनभ्रं पतति वज्रं?

(२) अरे गोहा।

नच रोदिति अन्तरीक्षं, नैव अनभ्रं पतति वज्रं,

महिलासमूहमेघे निपतति नयनाम्बुधाराभिः।

॥ अपिच ॥

वध्ये नीयमाने जनस्य सर्व्वस्य रुदतः,

नयनसलिलसिक्तो रथ्यातोन उन्मति रेणुः।

Digitized by Google

चाण्डालौ। आअच्छ, ले चालुदत्ता, आअच्छ; इमं घोसणट्ठाणं। आहणेध डिंडिमं, घोसेध घोसणं (१)।

उभौ। सुणाध, अज्जा, सुणाध; एसे सत्थवाहविणअदत्तस्स णत्तिके सागरदत्तस्स पुत्तके, अज्जचारुदत्ते णाम; एदिणा किल अकज्जकालिणा, गणिआ वसन्तसेना अत्थकल्लवत्तस्स कारणादो, सुण्णं पुप्फकलण्डअजिणुज्जाणं पवेसिअ, वाऊपासबलक्कारेण मालिअत्ति, एसे शेलोत्ति गहिदे सअं अ पडिवण्णे; तदो लण्णा पालएण अम्हे आणत्ता, एदं मालेदुं। जदि अवले इदिसे उभअलोअविलुद्धं अकज्जं कलेदि, तंपि लाआ पालए एवंज्जेव्व आणवेदि (२)।

चारु ॥ सनिर्व्वेदं खगतं॥

---

(१) आगच्छ, रे चारुदत्त, आगच्छ; इदं घोषणास्थानं। आहत डिण्डिमं, घोषयत घोषणं।

(२) शृणुत, आर्य्याः, शृणुत; एष सार्थवाहविनयदत्तस्य नप्ता, सागरदत्तस्य पुत्रकः, आर्य्यचारुदत्तोनाम; एतेन किलाकार्य्यकारिणा, गणिका वसन्तसेना अर्थकल्यवर्त्तस्य कारणात्, शून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य, वाऊपाशबलात्कारेण मारितेति, एतत्तस्योग्रं गृहीतं खयञ्च प्रतिपन्नः; तदा राज्ञा पालकेन वयमाज्ञप्ताएतं मारयितुं। यद्यपरदृष्टमुभयलोकविरुद्धमकार्य्यं करोति, तमपि राजा पालकएवमेव आज्ञा।

Digitized by Google

मद्यशतपरिपूतं गोत्रमुद्भासितं मे,
यदसि निविडचैत्यब्रह्मघोषैः पुरस्तात्,
मम मरणदशायां वर्त्तमानस्य पापै
स्त्वदसदृशमनुष्यैर्घुष्यते घोषणायां।

॥ उद्दीप्य कर्णौ पिधाय ॥ प्रिये वसन्तसेने।

शशिविमलमयूखशुभ्रदन्ति,
सुरुचिरविद्रुमसन्निभाधरौष्ठि,
तव वदनभवामृतं निपीय,
कथमवशोह्यशोविषं पिबामि।

सभो। ओअलध, अज्जा, ओअलध।

एअ गुणलअणणिही, सज्जनदुक्खाणंउत्तलणसेदू,
असुवण्णमण्डणअं अवणीअदि अज्ज णअलीदो।

॥ अणंच ॥

सव्वे क्खु होदु लोए लोए सुह संथिदाणं तत्तिल्ला,
विणिवडिदाणं एलाणं पिअआली दुल्लहो होदि (१)।

---

(१) अपसरत, आर्य्या, अपसरत।

एषगुणरत्ननिधिः, सज्जनदुःखानामुत्तरणसेतुः,
असुवर्णमण्डनकं अपनीयतेऽद्य नगरीतः।

॥ अन्यच्च ॥

सर्व्वः खलु भवति लोके लोकः सुखसंस्थितानां चिन्तायुक्तः,
विनिपतितानां नराणां प्रियकारी दुर्लभोभवति।

Digitized by Google

चारु ॥ सर्व्वतोऽवलोक्य ॥

अमी हि वस्त्रान्तरलम्बवक्त्राः
प्रयान्ति मे दूरतरं वयस्याः;
परोऽपि बन्धुस्समसंस्थितस्य
मित्रं न कश्चिद्विषमस्थितस्य।

चाण्डालौ। अोग्गलणं कदं विवत्तं लाअमग्गं; ताआणेध एदं दिण्णवज्झचिण्हं (१)।

चारु ॥ निःश्वस्य ॥ मैत्रेय, भोः किमिदमित्यादिपठति ॥

नेपथ्ये। हा तात, हा पिअवअस्स (२)।

चारु ॥ आकर्ण्य सकरुणं॥ भोः स्वजातिमहत्तरदुःखान्मयहं भवतस्सकाशात्प्रतियहं कर्त्तुं।

चाण्डालौ। किं अम्हाणं हत्थादो पडिग्गहं करेसि (३)।

चारु। शान्तं, पापं; नापरीचितकारी दुराचारः पालक इव चाण्डालः; तत्परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये।

चाण्डालौ। एवं करीअदु (४)।

---

(१) अपसारणं कृतं विविक्तराजमार्गः; तदा नयतैनं दत्तवधचिह्नं।

(२) हा तात हा प्रियवयस्य।

(३) किमस्माकं हस्तात् प्रतियहं करोषि।

(४) एवं क्रियतां।

Digitized by Google

नेपथ्ये। हा तात, हा आवुक! (१)

चारु ॥ श्रुत्वा सकरुणं ॥ भोः खजातीत्यादि पठति ॥

चाण्डालौ। अले पउला, खणं अंत्तलं देव्व, एसे अज्ज चारुदत्ते पुत्तमुखं पेक्खदु ॥ नेपथ्याभिमुखं॥ अज्ज इदो आअच्छ, ले दालआ आअच्छ (२) ॥ ततः प्रविशति दारक मादाय विदूषकः॥

विदू। तुवरदु, तुवरदु, भद्दमुहो; पिदा दे मारिदुं णीअदि (३)।

दारकः। हा आवुक, हा तात! (४)

विदू। हा पिअवअस्स, कहिं मये तुमं पेक्खिदव्वो (५)।

चारु ॥ पुत्रं मित्रं च वीक्ष्य ॥ हा पुत्र, हा मैत्रेय॥ सकरुणं॥ भोः कष्टं।

चिरं खलु भविष्यामि परलोके पिपासितः,
अत्यल्पमिदमस्माकं निवापोदकभोजनं।

---

(१) हा तात, हा पितः!

(२) हे प्रचुरजनाः, क्षणमन्तरं दत्त, एषआर्य्यचारुदत्तः पुत्रमुखं पश्यतु। आर्य्य इतआगच्छ, रे दारक आगच्छ।

(३) त्वरतां, त्वरतां, भद्रमुख; पिता ते मारयितुं नीयते।

(४) हा पितः, हा तात!

(५) हा प्रियवयस्य, कुत्र मया त्वं द्रष्टव्यः।

Digitized by Google

किं पुचाय प्रयच्छामि ॥ आत्मानमवलोक्य ॥ यज्ञोपवीतं दृष्ट्वा। आ दृदं तावदस्ति मम च।

अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणं,
देवतानां पितृणाञ्च भागोयेन प्रदीयते।

॥ इति यज्ञोपवीतं ददाति॥

चाण्डालः। आअच्छ, ले चारुदत्ता, आअच्छ (१)।

द्वितीयः। अले, अज्ज चालुदत्तं णिलुवदेण णामेण आलवेशि। अले पेक्ख।

अभुदये अवसाणे तहअ लत्तिं दिवं अहदमग्गा,
उद्दामेव्व किशोली णिअदी, क्खु पडिचिदुं जादि।

॥ अणंच॥

भुक्खावदेशा शे किं पणमिअ मस्तएण कात्रव्वं,
लाउग्गाहिदे विअ चंदेण वन्दणीओ जणपदस्श(२)।

---

(१) आगच्छ रे चारुदत्त आगच्छ।

(२) अरे, आर्य्य चारुदत्तं निरुपपदेन नाम्ना आलपसि। अरे पश्य।

अभ्युदये अवशाने तथाच राचिन्दिवं अहतमार्गा,
उद्दामेव किशोरी नियतिः, खलु परीचितुं याति।

॥ अन्यच ॥

भुक्ष्याव्यपदेशाः किमस्य प्रणमितमस्तकेन कर्त्तव्यं,
राजगृहीतोऽपि च चन्द्रेन वन्दनीयोजनपदस्य।

Digitized by Google

बालकः। अले, अले चाण्डाला, कहिं आवुकं णेध (१)।

चारु। वत्स।

अंसेन विभ्रत्करवीरमालां, स्कन्धेन शूलं, हृदयेन शोकं,
आघातमद्याहमनुप्रयामि यामिचमालम्भमिवाध्वरेऽजः।

चाण्डालः। दारआ;

एऊ अम्हे चाण्डाला, चाण्डालउलम्मि जादपुव्वा,
जे अहिभवन्ति साऊं, ते पावा, तेभ चाण्डाला (२)।

दारकः। ता कीस मालेध आवुकं? (३)

चाण्डालः। दीहाओ, अत्त लाअणिओगो क्खु अवल्ल जादि, ण ऊ अम्हे (४)।

दारकः ॥ वावादेध मं, मुञ्चध आवुकं (५)॥

---

(१) अरे, अरे चाण्डालाः, कुत्र मम पितरं नयत।

(२) दारक;

न खलु वयं चण्डालाश्चाण्डालकुले जातपूर्व्वाः;
येऽभिभवन्ति साधुं, ते पापास्ते च चाण्डालाः।

(३) तत्कथं मारयत पितरं?

(४) हे दीर्घायुः, अत्र राजनियोगः खलु अपराध्यति, न खलु वयं।

(५) व्यापादयत मां, मुञ्चत पितरं।

चाण्डालः। दीर्घायुरो एवं भणन्ते, चिरं मे जीव (१)।

चारु ॥ सास्रं पुत्रं कण्ठे गृहीत्वा ॥

इदं तत्खेदसर्म्मस्रं, समसाद्यदरिद्रयोः,
अचन्दनमनौशीरं, हृदयस्यानुलेपनं।

॥ अंसेन बिभ्रदित्यादि पुनः पठति अवलोक्य सगतं॥

॥ अमी हि वस्त्राञ्जलिरङ्गवल्गा इत्यादि पुनः पठति॥

विदू। भो भद्दमुहा, मुंचेध पिअवअस्सं चारुदत्तं, मं वावादेध (२)।

चारु ॥ भ्रांतं पापं हृदा; सगतं॥ अद्यावगच्छामि सम स्थितेत्यादि पठति ॥ प्रकाशं॥

॥ एताः पुनर्हर्म्यगतास्त्रियोमामित्यादि पुनः पठति॥

चाण्डालः। ओअलध, अज्जा, ओअलध।

किं प्रेक्षध? अप्पुलिअं अजअवणेण प्पणट्ठजीवाअं,
कूवम्मि क्खुडिदपाअं कंचणकलअं व डुव्वन्तं (३)।

चारु ॥ सकरुणं अग्निविमलमयूखेत्यादि पठति॥

---

(१) हे दीर्घायुरेवं भणन्, चिरं मे जीव।

(२) भो भद्रमुखा, मुञ्चत प्रियवयस्यं, मां व्यापादयत।

(३) अपसरत आर्य्याः।

किं पश्यत? सत्पुरुषं अयशोवशेन प्रनष्टजीवार्त्तं,
कूपे खण्डितपार्श्वं काञ्चनकलसमिव मज्जन्तं।

Digitized by Google

अपरः। अरे पुनरपि घोषय (१)।

चाण्डालः ॥ तथा करोति ॥

चारु। प्राप्तोऽहं व्यसनक्रतां दशामनार्य्यां,
यच्चेदं फलमपि जीवितावसानं;
एषा च व्यथयति घोषणा मनोमे,
श्रोतव्यं यदिदमयी तया हतेति।

॥ ततः प्रविशति प्रासादखोपरुद्धः स्थावरकः। घोषणामाकर्ण्य; सवैक्लव्यं॥ कधं, अपावे चारुदत्ते वावादीअदि। हगे णिअलेण आमिणा वन्धिदे। भोदु; आक्रन्दामि। सुणाध, अज्जा, सुणाध। अत्थि दाणिं मए पावेण पवहणपडिवत्तेण पुप्फकरं उअजिसुज्जाणं वअन्तएण णीदा, तदो मम आमिणा मं ण कामेमित्ति कदुअ, वाउपाअवलक्कारेण मालिदा, ण उण एदिणा अज्जेण। कधं, विदूलदाए ण कोवि सुणादि। ता किं करेमि? अत्ताणअं पातेमि॥ विचिन्त्य॥ जदि एवं करेमि, तदा अज्ज चारुदत्ते ण वावादीअदि। भोदु, इमादो पाआद वालआपदोलिकादो एदिणा जिअलगवक्खेण अत्ताणअं णिक्खिवामि। बलं हगे उअलदे, ण उण एदे कुलउत्तविहगाणं वाअपादवे अज्ज चारुदत्ते। एवं जदि विवज्जामि लद्धे मए पलोए॥ इत्यात्मानं पातयित्वा॥ ही ण उवलद्धम्हि, भग्गो

(१) अरे पुनरपि घोषय।

मे उंडणिअडे; ता चाण्डालघोसं समप्पेमामि ॥ दृष्ट्वोपसृत्य ॥ हंहो चाण्डाल, अन्तरं, अन्तरं (१)।

चाण्डालौ। अले के अन्तलअं मग्गेदि? (२)

चेटः॥ शृण्वन्तु, इति पूर्व्वोक्तं पठति॥

चारु। अये।

कोऽयमेवंविधे काले कालपाशस्थिते मयि,
अनाकृष्टिहते शस्त्रे, द्रोणमेघदवोदितः।

भो श्रुतं भवद्भिः

---

(१) कथमपापश्चारुदत्तोव्यापाद्यते अहंनिगडेन स्वामिना बद्धः। भवतु, आक्रन्दामि। शृणुत, आर्य्याः, शृणुत। अस्मि दानीं मया पापेन प्रवहणपरिवर्त्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता, ततोमम स्वामिना मां न कामयसे इति श्रुत्वा, वाऊपाशबलात्कारेण मारिता, न पुनरेतेनार्य्येण। कथं, विदूरतया न कोऽपि शृणोति। तत्किं करोमि? आत्मानं पातयामि, यद्येवं करोमि, तदा आर्य्यचारुदत्तोन व्यापाद्यते। भवतु, अस्याः प्रासादवालायप्रतोलिकातः एतेन जीर्णगवाक्षेणात्मानं निक्षिपामि। वरं अहमुपरतो, न पुनरेषकुलपुत्रविहगानां वासपादपः आर्य्यचारुदत्तः। एवं यदि विपद्ये लभ्यो मया परलोकः। आश्चर्य्यं न उपरतोऽस्मि; भग्नोमेदण्डनिगडः; तच्चाण्डालघोषं समन्वेषयामि। हंहो चाण्डालाः।

(२) अरे कः अन्तरं याचते?

Digitized by Google

न भीतोमारणादस्मि, केवलं दूषितं यशः,
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमोभवेत्।

अन्यच्च। तेनास्मत्कृतवैरेण क्षुद्रेणात्यल्पबुद्धिना,
शरेणैव विषाक्तेन दूषितेनापि दूषितः।

चाण्डालौ। थावलअ, अवि सच्चं भणासि? (१)

चेटः। सच्चं; हगेवि मा कस्सवि कधइस्सशित्ति पासाद बालग्गपदोलिकाए दण्डणिअलेण वन्धिअ, णिखित्ते (२)।

प्रविश्य ॥ शकारः ॥ सहर्षं॥

मंसेण तिक्खाविलकेण भत्ते, शाकेण शूपेण समच्छकेण,
भुत्तं मए अत्तणअस्सु गेहे शालिशकूलेण गुलोदणेण।

॥ कर्णं दत्वा ॥ भिन्नखसखंखणाए चाण्डालवायाए शलअं जोए, जधा अ एशे उरकालिदे वज्झडिंडिमशद्दे पडहा णअ शुणीअदि, तधा तक्केमि; दलिद्दचालुदत्ताके वज्झट्ठाणं णीअदित्ति। ता पेक्खिस्सं। शत्तुविणाशेण महन्ते हलअशं पडिदोशे होदि। शूदं च मए जेवि किल शत्तुं वावादयंतं पेक्खदि, तश्श अणश्शि जंमन्तले अक्खिलोगे ण होदि। मए क्खु विष गन्दिगअपविट्ठेण विअ कीडएण किमि अंतलं मग्गमाणेण

---

(१) स्थावरक, अपि सत्यं भणसि?

(२) सत्यं; अहमपि मा कस्यापि कथयिष्यसीति प्रासाद वालाग्रप्रतोलिकादण्डनिगडेन बद्ध्वा, निक्षिप्तः।

Digitized by Google

उप्पाडिदे, ताह दरिद्दचारुदत्ताह विणासे अम्हदं अत्तणके लिकाए पाआदवालसमापदोलिआह अहिरुहिअ, अत्तणो पडिक्कमं पेक्खामि ॥ तथा कृत्वा दृष्ट्वा च ॥ ही एदाह दरिद्दचारुदत्ताह वअस्सणीअमाणाह एअंवट्टे जणसम्मद्दे; जं वेलं अम्हाणिअं पवडे वडमाणुअंणे वज्झं णीअदि, तं वेलं कीदिसं भवे ॥ निरीक्ष्य ॥ कधं, ऐसे ग्रे एववलद्दकविअ मंडिदे दक्खिणदिसं णीअदि। अध किंणिमित्तं मम केलिकाए पाआदवालसमाप दोलिकाए समीवे घोषणा णिवडिदा, णिवाडिदा अ। विलोक्य॥ कधं; चावडके चेडेवि णत्थि; दुध मा खाम तेण दद्दागदुअ मन्तभेदे कडे भवीअदि। ता जाव णं अप्पे आमि (१) ॥ इति अवतीर्य्यापसर्पति ॥

---

(१) मांसेन तिक्ताम्लेन भक्तं, शाकेन सूपेन समस्यकेन,
भुक्तं मया आत्मनएव गेहे शाल्यन्न कुलेन गुडोदनेन।

भिन्नकांस्यवत्स्वंखणायाः चाण्डालवाचाया: स्वरसंयोगः, यथा च एष उद्घोतोबध्यडिण्डिमशब्दः पटहानाञ्च श्रूयते, तथा तर्कयामि, दरिद्रचारुदत्तकोबध्यस्थानं नीयते इति। तत्रेच्छिये। अचुविनाशेन मम महान् हृदयस्य परितोषो भवति। श्रुतञ्च मया योहि किल अचुं व्यापाद्यमानं पश्यति, तस्यान्यस्मिन् जन्मान्तरे अचिरेणोन भवति। मया खलु विषयस्त्रिगर्भप्रविष्टेन कीटकेन किमपि अन्तरं मृग्यमाणेन चत्पादितं, तस्य दरिद्र

चेटः ॥ हद्धा ॥ भट्टालका, एशे मे आगडे (१)।

चाण्डालौ। ओसलध, देव्व मग्गं, दाणं ढक्केध, होध तुएहीआ;
अविणअ तिक्खविसाणं दुट्ठवइल्ले दूदो एदि (२)।

शकारः। अले, अले, अन्तलमन्तलं देध ॥ उपसृत्य ॥
पुत्तका थावडका, चेडा, एहि गच्छ्ह (३)।

चारुदत्तस्य विनाशं सम्प्रतं आत्मीयायां प्रासादवालाग्र प्रतोलिकायां अधिरुह्यात्मनः पराक्रमं पश्यामि। वितर्के एतस्य दरिद्रचारुदत्तस्य वध्यमानस्य एष दृङ्नोजनसम्मदो; यस्यां वेलायां अस्माद्दृशः प्रवरोवरमानुषोबध्यं नीयते, तस्यां वेलायां कीदृशं भवेत्। कथमेष स नववलीवर्द्दइव मण्डितोदक्षिणां दिशं नीयते। अथ किं निमित्तं मदीयायाः प्रासादवालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता, निवारिता च। कथं स्थावरकस्येटोऽपि नास्ति; दृष्ट मा नाम तेन दूतोगत्वा मन्त्रभेदः कृतोभविष्यति। तत् त्वावदेनमन्वेषयामि।

(१) भट्टारक, एष स आगतः।

(२) अपसरत, दत्त मार्गं, द्वारं पिधत्त, भवत तुष्णीकाः;
अविनयतीक्ष्णविषाणो दुष्टवलीवर्द्दइतएति।

(३) अरे, अरे, अन्तरमन्तरं देहि। पुत्रक स्थावरक, चेटक, एहि गच्छावः।

चेटः। ही, अणज्ज, वसन्तसेणिअं मालिअ ण परितुट्ठेसि; सम्पदं पणइजणकप्पादपं अज्जचारुदत्तं मालइदुं ववसिदेसि (१)।

प्रकारः। ण हि लदणकुम्भसरिसे हगे दुत्थिअं वावादेहि (२)।

सर्वे। अहो, तुए मालिदा; ण अज्ज चारुदत्तेण (३)।

प्रकारः। के एवं भणादि (४)।

सर्वे ॥ चेटमुद्दिश्य ॥ णं एसो साऊ (५)।

प्रकारः ॥ अपवार्य्य सभयं ॥ अविदमादिके, अविदमादिके! कधं थावरुअ चेडे सुट्ठु ण मए गज्जदे। एसे क्खु मम अक्कज्जस्स सक्खी ॥ विचिन्त्य ॥ एवं दाव कलदूसं ॥ प्रकाशं ॥ अलिअं, भट्टालका, हो, एसे चेले गुरुवत्तोलिआए मए गहिदे पिट्ठिदे मालिदे, वद्धेअ, ता किदवेले एसे, जं भणादि,

---

(१) वितर्के; अनार्य्य, वसन्तसेनां मारयित्वा न परितुष्टोऽसि; साम्प्रतं प्रणयिजनकल्पपादपं आर्य्यचारुदत्तं मारयितुं व्यवसितोऽसि।

(२) नहि रत्नकुम्भसदृशः अहं स्त्रियं व्यापादयामि।

(३) अहो, त्वया मारिता, न चारुदत्तेन।

(४) कएवं भणति।

(५) ननु एष साधुः।

Digitized by Google

किं सर्व्वं सत्यं? ॥ अपवारितकेन चेटस्य कटकं प्रयच्छति ॥ खैरकं पुत्तका थावडक चेडा, एदं गेण्हिअ अन्नधा भणाहि (१)।

चेटः ॥ गृहीला ॥ पेक्खध, भट्टारका, हो सुवण्णेण मं पलोभेदि (२)।

अकारः ॥ कटकमाछिद्य ॥ एसे मे सुवण्णके जस्स कारणा मए वद्धे ॥ सक्रोधं ॥ हंहो, चण्डाला, मए क्खु एसे सुवण्ण भण्डाले णिउत्ते, सुवण्णचोरअंते मारिदे पिट्टिदे। ता जदि ण पतिआअध, ता पिट्ठि दाव पेक्खध (३)।

चाण्डालौ ॥ दृष्ट्वा ॥ सोहणं भणादि। विडम्बे चेडे किं ण पत्तवदि (४)।

---

(१) हन्त, कथं स्थावरक चेटः सुष्ठु न मया संयतः। एष खलु मम अकार्य्यस्य साची। एवं तावत् करिष्यामि। अलीकं, भट्टारका; अहो, एष चेटः सुवर्णचोरिकायामया गृहीतस्ताडितः मारितोबद्धश्च, तत्कृतवैरएष, यत् भणति, किं सर्व्वं सत्यं? पुचक स्थावरक चेट, एतद्गृहीला अन्यथा भण।

(२) पश्यत, भट्टारकाः, अहो सुवर्णेन मां प्रलोभयति।

(३) एतत् तत्सुवर्णकं यस्य कारणाय मया बद्धः। हंहो, चण्डाला, मया खलु एष सुवर्णभाण्डारे नियुक्तः, सुवर्णं चोरयन् मारितस्ताडितः। तत् यदि न प्रत्ययध्वं, तदा पृष्ठं तावत्पश्यत।

(४) शोभनं भणति। विलम्बस्व चेटः किं न प्रतपति।

Digitized by Google

चेटः। ही मादिके! दुट्ठगोदासभावेजं अज्जं कंपि ण पत्तिआदअदि॥ सकरुणं॥ अज्ज चारुदत्त, एत्तिके मे विहवे (१)।

॥ इति पादयोः पतति ॥

चारु ॥ सकरुणं॥

उत्तिष्ठ, भोः पतितसाधुजनानुकम्पिन्,
निःकारणोपगतबान्धवधर्मशील;
यत्नः कृतोऽपि सुमहन्मम मोचणाय,
दैवं न संवदति, किं न कृतं त्वयाद्य।

चाण्डालौ। भट्टके, पिट्टिअ एदं चेडअं णिक्कालेहि (२)।

अकारः। णिअल रे॥ इति निर्व्यासयति॥ अले चाण्डाला, किं विलंबधं; मालेध एदं (३)।

चाण्डालौ। यदि तुवलअसि ता अयंजेव्व मालेहि (४)।

रोहः। अले चाण्डाला, मं मारेध, मुंचध आवुकं (५)।

---

(१) हन्त! दुष्टगोदासभावोयत् सत्यं कमपि न प्रत्याय्यते। आर्य्यचारुदत्त, एतावान् मे विभवइति।

(२) भट्टक, ताडयित्वा एनं चेटं निष्कालय।

(३) निःसर रे। अरे चाण्डालाः, किं विलम्बध्वं; मारयतैनं।

(४) यदि त्वरयसे तदा स्वयमेव मारय।

(५) चाण्डालाः, मां मारयत, मुञ्चत पितरं।

Digitized by Google

अकारः। अपुत्तं जेव्व एदं मालेध (१)।

चारु। सर्व्वमस्य मूर्खस्य मक्षाय्यते। तद्गच्छ पुत्र मातुः समीपं।

रोहः। किं मए गदेण कादव्वं (२)।

चारु। आश्रमं वत्स गन्तव्यं गृहीत्वाद्यैव मातरं;
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि।

॥ तद्वयस्य गृहीत्वैनं व्रज ॥

विदू। भो वअस्स, एव्वं तुए जाणिदं, तुए विणा अहं पाणादं धारेमित्ति (३)।

चारु। वयस्य स्वाधीनजीवितस्य न युज्यते तव प्राण परित्यागः।

विदू ॥ स्वगतं॥ जुत्तं णेदं। तधावि ण सक्कणोमि पिअ वयस्सविरहिदे पाणादं धारेदुंत्ति; ता वंहणीए दारअं समप्पिअ पाणपरिचाएण अत्तणोपिअवअस्सअणुगमिस्सं ॥ प्रकाशं॥ भो वअस्स, पराणेमि एदं लहुअं (४)।

---

(१) सपुत्रमेव एनं मारयत।

(२) किं मया गतेन कर्त्तव्यं।

(३) भोवयस्य, एवं त्वया ज्ञातं, त्वया विनाहं प्राणान् धारयामीति।

(४) युक्तं नेदं। तथापि न शक्नोमि प्रियवयस्यविरहितः प्राणान्धर्त्तुं इति;तत् ब्राह्मण्यै दारकं समर्प्य प्राणपरित्यागेन प्रियवयस्यमनु गमिष्यामि। भो वयस्य परानयामि एतं लघुं।

Digitized by Google

॥ इति सकंठग्रहं पादयोः पतति ॥ दारकोऽपि रुदन् पतति ॥

प्रकारः। अले णं भणामि मपुत्तकं चारुदत्तकं वावा देधत्ति (१)।

चारु ॥ भयं नाटयति ॥

चाण्डालौ। अले णहि अम्हाणं ईदिसी आआणत्ती, जधा मपुत्तं चारुदत्तं वावादेधत्ति; ता णिक्कम ले दालआ (२)।

॥ इति निष्क्रामतः ॥

चाण्डालौ। इमं तदअं घोसणत्थाणं, ताडेध डिण्डिमं (३)।

॥ पुनर्घोषयत ॥

प्रकारः ॥ स्वगतं ॥ कधं एदे ण पत्तिआअंति पौरा: ॥ प्रकाशं ॥ हंदो चारुदत्ता, वदुवदुका, ण पत्तिआअंदि एदे पौरजणे; ता अत्तणकेलिकाए जीहाए भणाहि, मए वसन्तसेणिआ मारिदेत्ति (४)।

---

(१) अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतेति।

(२) अरे न अस्माकमीदृशी राजाज्ञप्तिः, यथा सपुत्रं चारुदत्तं व्यापादयतेति; तस्मात् निष्क्राम रे दारक।

(३) इदं तदीयं घोषणास्थानं, ताडयत डिण्डिमं।

(४) कथमेते न प्रत्ययन्ते पौराः। अरे चारुदत्त, वटुक वटुक, न प्रत्ययते एष पौरजनः; तदात्मीयया जिह्वया भण, मया वसन्तसेनिका मारितेति।

Digitized by Google

चारु ॥ तूष्णीमास्ते॥

अकारः। अले चण्डालगोहे, ण भणादि चारुदत्त वुडुचके। ता, भणावेध दूनिणा जर्जरवंशखण्डेन शृंखलेन ताडिअ (१)।

चाण्डालः॥ प्रहारमुद्यम्य॥ भो चारुदत्त भणाहि (२)।

चारु ॥ सकरुणं॥

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसोऽस्ति मे विषादः;
एकोमां दहति जनापवादवह्नि
र्वक्तव्यं यदिह मया हता प्रियेति।

अकारः ॥ पुनस्तथैव॥

चारु॥ भो भो पौराः; मया खलु नृशंसेनेत्यादि पुनः पठति॥

अकारः। वावादिदा? (३)

चारु। एवमस्तु।

चाण्डा। अले, तव वद्धवालिआ (४)।

---

(१) अरे चाण्डाल गोह, न भणति चारुदत्तवृद्ध वटुकः। तद्गृणयत अनेन जर्जरवंशखण्डेन शृंखलेन ताडयिला।

(२) भो चारुदत्त भण।

(३) व्यापादिता।

४) अरे, तव वध्यपालिका।

Digitized by Google

द्वितीयः। अले, तव (१)।

प्रथमः। अले, लेखअं कलेम्ह (२)।

॥ इति बहुविधं लेखकं कृत्वा ॥

प्रथमः। अले जदि मम केलिका वद्धुवालिआ, ता चिट्ठदु दाव मुहुत्तअं (३)।

द्वितीयः। किं णिमित्तं (४)।

प्रथमः। अले, भणिदेहि पिदुणा अअं गच्छन्तेण, यथा, पुत्त वीरअ, जदि तुह वज्झवाली होदि, मा सहसत्ति वावादी अहि वज्झं (५)।

द्वितीयः। अले, किं णिमित्तं (६)।

---

(१) अरे, तव।

(२) अरे, लेखं कुर्मः।

(३) अरे यदि मम भद्रीयबध्यपालिका, तदा तिष्ठतु तावत् मुहूर्त्तं।

(४) किं निमित्तं।

(५) अरे भणितोऽसि पित्रा स्वर्गं गच्छता, यथा, पुत्र वीरक, यदि तव बध्यपालीभवति, मा सहसैव व्यापादयसि बध्यं।

(६) अरे, किं निमित्तं।

Digitized by Google

प्रथमः। कदावि कोवि साधू अत्थं दट्ठूअ वज्झं मोआवेदि; कदावि रण्णो पुत्ती भोदि तेण वद्धावेण सव्ववज्झाणं मोक्खो होदि; कदावि हत्थी बन्धं खण्डेदि तेण सम्भमेण वज्झो मुत्तो होदि; कदावि रायपडिवत्तो होदि तेन सव्ववज्झाणं मोक्खो होदि(१)

द्वितीयः। किं किं रायपडिवत्तो होदि (२)।

चाण्डा। अले, वज्झथूवाडिआए लेखअं कलेम्ह (३)।

द्वितीयः। अले, सिग्घं मालेध चारुदत्तकं(४)।

॥ इत्युक्त्वा चेटं गृहीत्वा एकान्ते स्थितः॥

चाण्डा। अज्ज चारुदत्त, रायणिओओ खु अवरज्झदि, ण खु अम्हे चाण्डाल; ता सुमलेहि जं सुमलिदव्वं(५)।

---

(१) कदापि कोऽपि साधुरर्थं दत्वा वध्यं मोचयति; कदापि राज्ञः पुत्रोभवति तेन वृद्धिमहोत्सवेन सर्व्ववध्यानां मोचोभवति; कदापि हस्ती बन्धं खण्डयति तेन सम्भ्रमेण वध्योमुक्तोभवति; कदापि राजपरिवर्त्तोभवति तेन सर्व्व वध्यानां मोचोभवति।

(२) किं किं राजपरिवर्त्तोभवति।

(३) अरे, वधपालिकायालेखं कुर्म्मः।

(४) अरे, शीघ्रं मारयत चारुदत्तं।

(५) आर्य्य चारुदत्त राजनियोगः खलु अपराध्यति, न खलु वयं चाण्डालाः; तत्स्मर यत् स्मर्त्तव्यं।

Digitized by Google

चारु। प्रभवति यदि धर्मोदूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात्कथञ्चित्;
सुरपतिभवनस्था यच्च तच्च स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव।

भो, क्व तावन्मया गन्तव्यं।

चाण्डा ॥ अयतोदञ्चयित्वा ॥ अले, एदं दीशदि दक्खिण मशाणं, जं पेक्खिअ वल्ला झत्ति पाणादं मुञ्चति; पेक्ख;

अद्धकलेवरपडिवत्तं कट्टन्ति दीहगोमाओ,
अद्धं वि भूखलग्गं वेअं विअ अट्टहासअन्ति (१)।

चारु। हा! हतोऽस्मि मन्दभाग्यः ॥ इति सावेगमुपविशति ॥

अकारः। ण दाव गमिश्शं चारुदत्तकं वावादअन्तं दाव पेक्खामि ॥ परिक्रम्य ॥ दृष्ट्वा ॥ कधं उवविट्ठे (२)।

चाण्डालः। चारुदत्त, किं भीदेशि? (३)

---

(१) अरे इदं दृश्यतेदक्षिणमशानं यत्रेच्छ वधाझटिति प्राणान् मुञ्चन्ति पश्य;

अर्द्धकलेवरप्रतिदृत्तं कर्षन्ति दीर्घगोमायवः,
अर्द्धमपि भूखलग्नं वेत्रमिवाट्टहासयन्ति।

(२) न तावद्गमिष्यामि चारुदत्तकं व्यापाद्यमानं तावत्पश्यामि। कथमुपविष्टः।

(३) चारुदत्त, किं भीतोऽसि?

Digitized by Google

चारु ॥ सहसोत्थाय ॥ मूर्ख!

न भीरुर्मरणादस्मि केवलं दूषितं यशः।

॥ इत्यादि पुनः पठति ॥

चाण्डा। अज्ज चारुदत्त, गगणदले पडिवसंता चंद सुज्जा विपत्तिं लहन्ति; किं पुण अणामलणभीरुआ माणवा वा; लोए कोवि उट्ठिदोपलहदि, कोवि पडिदोवि उट्ठेदि। उट्ठन्त पडन्ताह वसणपाडिआ अवस्स उण अत्थि। एदाइं हिअए कदुअ सन्धालेहि अत्ताणअं॥ चाण्डालं प्रति॥ एदं चउत्थघोषणा ट्ठाणं, ता उग्घोसम्ह (१)।

॥ पुनस्तथैवोद्घोषयति ॥

चारु। हा प्रिये वसन्तसेने ॥ अग्गिग्गकलमयूखेत्यादि पठति॥ ततः प्रविशति ससंभ्रमा वसन्तसेना भिक्षुश्च।

भिक्षुः। ही माणहे! पत्थाणपडिच्छन्तिं गमच्छाहि अ वसन्त

---

(१) आर्य्य चारुदत्त, गगणतले प्रतिवसन्तौ चन्द्रसूर्य्यौ विपत्तिं लभेते; किं पुनर्जनामरणभीरुकामानवा वा; लोके कोऽप्युत्थितः पतति, कोऽपि पतितोऽप्युत्तिष्ठते। उत्तिष्ठतः पतनञ्च वसनपातिका अवश्य पुनरस्ति। एतानि हृदये कृत्वा संधारयात्मानं। एतत् चतुर्थं घोषणास्थानं, उद्घोषयाम।

णेणिअं णयन्ते अणुगिहिदम्हि पव्वज्जाए; उवासिके, कहिं तुमं णदस्सं? (१)

वसं। अज्ज चारुदत्तस्सेव्व गेहं; तस्स दंसणेण मअलां च्छणस्स विअ कुमुदिणिं आणंदेहि मं (२)।

भिक्षुः ॥ स्वगतं॥ कदरेण मग्गेण पविशामि ॥ विचिन्त्य ॥ लाअमग्गेणज्जेव्व पविशामि। उवासिके, एहि इमं लाअमग्गं ॥ आकर्ण्य॥ किं णु ख्रु एशे लाअमग्गे महन्ते कलअले सुणीअदि (३)।

वसं॥ अवतोनिरूप्य॥ कधं, पुरदोमहाजणसमूहो; अज्ज, जाणाहि दाव किंणेदंत्ति। विषमभरक्कंता विअ वसुन्धराए आवासोसदा उज्जइणी वट्टदि (४)।

---

(१) आर्य्ये! प्रस्थानपरिश्रान्तां समाश्वास्य वसन्तसेनिकां नयन् अनुगृहीतोऽस्मि प्रव्रज्यया; उपासिके, कुत्र त्वां नेष्यामि?

(२) आर्य्य चारुदत्तस्यैव गेहं; तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीं आनन्दय मां।

(३) कतरेण मार्गेण प्रविशामि। राजमार्गेणैव प्रविशामि। उपासिके, एहि इमं राजमार्गं। किं नु खलु एष राजमार्गे महान् कलकलः श्रूयते।

(४) कथं, पुरतोमहान् जनसमूहः; आर्य्य, जानीहि तावत् किं नेदमिति। विषमभराक्रान्तादेव वसुन्धरा एक वासोन्नता उज्जयिनी वर्त्तते।

Digitized by Google

चाण्डा। दूमं अ पच्छिमं घोसणट्ठाणं; ता ताडेध डिंडिमं, उग्घोसेध घोषणं ॥ तथा कृत्वा॥ भो चारुदत्त, पडिलद्धं जेव्व माधवीअसि (१)।

चारु ॥भगवत्योदेवताः॥

भिक्षुः॥ श्रुत्वा सभ्रमं॥ उवासिके, तुमं किल चारुदत्तेण मालिदाअसित्ति, चारुदत्तो मालिदुं णीअदि (२)।

वसं ॥ सभ्रमं॥ हद्धी, हद्धी; कधं, मम मन्दभाइणीए कदे अज्ज चारुदत्तो वावादीअदि। भो तुरिदं, भो तुरिदं, आदेसेहि मग्गं (३)।

भिक्षुः। तुवलदु, तुवलदु, बुद्धोवासिआ, अज्ज चारुदत्तं जीअन्तं समस्सासिदुं। अज्जा, अन्तलमन्तलं देध (४)।

वसं ॥ अन्तलमन्तलं॥ (५)

---

(१) दृष्टश्च पश्चिमं घोषणास्थानं; तत्ताडयत डिण्डिमं, उद्घोषयत घोषणां। भो चारुदत्त, प्रति शीघ्रमेव त्वं मार्य्यसे।

(२) उपासिके, त्वं किल चारुदत्तेन मारितासीति, चारुदत्तोमारयितुं नीयते।

(३) हा धिक्, हा धिक्; कथं, मम मन्दभागिन्याः कृते आर्य्य चारुदत्तोव्यापाद्यते। भो त्वरितं, भो त्वरितं, आदिश मार्गं।

(४) त्वरतां, त्वरतां, बुद्धोपासिका, आर्य्यचारुदत्तं जीवन्तं समाश्वासितुं। आर्य्या, अन्तरमन्तरं दत्त।

(५) अन्तरमन्तरं।

Digitized by Google

चाण्डा। अज्ज चारुदत्त, सामिणिओओ अवरज्झदि, ता सुमलेहि जं सुमलिदव्वं (१)।

चारु। किं वज्झना ॥ प्रभवतीत्यादिश्लोकं पठति ॥

चाण्डा ॥ खड्गमाकृष्य ॥ अज्ज चारुदत्ता, उत्ताणे भविअ, समं चिट्ठ; एक्कपहारेण मारिअ तुमं सग्गं णेम्ह (२)।

॥ तथा तिष्ठति ॥

चाण्डा॥ प्रहर्त्तुमीहते खड्गपतनं हस्ताद्भिनयन् ॥ ही, कधं

आकड्ढिदे असोअं मुट्ठीए मुट्ठिणा गहीदेवि,
धरणीए कीस पडिदे दारुणके अग्गिसण्णिहे खग्गे।

जधा एदं संवुत्तं तधा तक्केमि, ण विवज्जदि अज्ज चारुदत्तत्ति। भअवदि वसुवासिणि, पसीद, पसीद; अवि णाम चारुदत्तस्स मोक्खोभवे तदो अणुगिहिदं तुए चाण्डाल उलंभवे (३)।

---

(१) आर्य्य चारुदत्त स्वामिनियोगः अपराध्यति, तत् स्मर यत् स्मर्त्तव्यं।

(२) आर्य्य चारुदत्त, उत्तानोभूत्वा, समं तिष्ठ; एक प्रहारेण मारयित्वा त्वां स्वर्गं नयामः।

(३) आकृष्टः सरोषं मुष्टामुष्टिना गृहीतोऽपि,
धरण्यां किमर्थं पतितो दारुणकोऽग्निसन्निभः खड्गः।

यथा एतत्सम्वृत्तं तथा तर्कयामि, न विपद्यते आर्य्यचारुदत्तइति। भगवति वसुवासिनि, प्रसीद, प्रसीद; अपि नाम

अपरः। जधाणत्तमणुचिट्ठन्ह (१)।

प्रथमः। भोदु, एव्वं कलेन्ह (२)।

इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः।

चारु ॥ प्रभवतीत्यादि पुनः पठति॥

भिक्षुः। वसन्तसेना च॥दृष्ट्वा॥ अज्जा, मा दाव; अज्जा, एषा अहं मन्दभाइणी जस्सा कारणादो एसो वावादीअदि (३)।

चाण्डा ॥ दृष्ट्वा॥

तुलिदं का उण एसा अंसपलम्बेण चिउलभारेण,

मा मेत्ति वाहरन्ती, उच्छिदहत्था दुदो एदि (४)।

वसं। अज्ज चारुदत्त, किं णेदंत्ति ॥ उरसि पतति (५)॥

भिक्षुः। अज्ज चारुदत्तस्स किंणेदमिति॥ पादयोः पतति (६)॥

चारुदत्तस्य मोक्षोभवेत्तदानुगृहीतं त्वया चण्डालकुलंभवेत्।

(१) यथाज्ञप्तमनुतिष्ठावः।

(२) भवतु एवं कुर्व्वः।

(३) आर्य्या, मा तावत्; आर्य्या, एषा अहं मन्दभागिनी यस्याः कारणादेष व्यापाद्यते।

(४) त्वरितं का पुनरेषा अंसपतता चिकुरभारेण,

मामेति व्याहरन्ती, उत्थितहस्ता द्रुतएति।

(५) आर्य्य चारुदत्त, किं नेदमिति।

(६) आर्य्य चारुदत्तस्य, किं नेदमिति।

Digitized by Google

चाण्डा ॥ सभयमुपसृत्य ॥ कधं, वसन्तसेणा; णं क्खु अम्हेहिं साहु ण वावादिदे (१)।

भिक्षुः ॥ उत्थाय ॥ अले, जीवदि चारुदत्ते (२)।

चाण्डा। जीवदि वस्सरसदं (३)।

वसं ॥ सहर्षं ॥ पच्चुज्जीविदम्हि (४)।

चाण्डा। ता जाव एदं वुत्तं राइणो जण्णवाडगदस्स णिवेदेम्ह (५)।

॥ इति निष्क्रामतः ॥

शकारः ॥ वसन्तसेनां दृष्ट्वा सचासं ॥ हो मादिके! केण गब्भदासी जीवाविदा? उक्कन्ता मे पाणा! भोदु, पलाइश्शं (६)।

॥ इति पलायते ॥

---

(१) कथं, वसन्तसेना ननु खलु अस्माभिः साधुर्न व्यापादितः।

(२) अरे जीवति चारुदत्तः।

(३) जीवति वर्षशतं।

(४) प्रत्युज्जीवितास्मि।

(५) यावदेतं वृत्तान्तं राज्ञोयज्ञवाटगतस्य निवेदयावः।

(६) विस्मयं; केन गर्भदासी जीवनं प्रापिता? उत्क्रान्ता मे प्राणा, भवतु पलायिष्ये।

Digitized by Google

चाण्डा ॥ उपसृत्य ॥ अले, णं अह्माणं दंदिआ लाआणत्ती, जेण सा वावादिदा तं मालेध, ता लद्धिअशालअंजेव्व अणेसन्ना (१)।

॥ इति निष्क्रान्तौ ॥

चारु ॥सविस्मयं॥ केयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि,
अनावृष्टिहते शस्ये सम्यग्वृष्टिरिवागता।

अवलोक्य च।

वसन्तसेना; किमियं द्वितीया समागता, सैव दिवः किमित्थं, भ्रान्तं मनः पश्यति वा ममैनां, वसन्तसेना न मृताथ सैव।

अथवा।

किं नु स्वर्गात्पुनः प्राप्ता, मम जीवातुकाम्यया
तस्यारूपानुरूपेण किमुतान्येयमागता।

वसं ॥ सासं उत्थाय पादयोर्निपत्य ॥ अज्ज चारुदत्त, साज्जेवाहं पावा, जाए कारणादोदूअं तुए असरिसी अवत्था पाविदा (२)।

॥ नेपथ्ये॥ अचरिअं, अचरिअं, जीवदि वसन्तसेणा (३)।

---

(१) ननु अस्माकमीदृशी राजाज्ञप्तिः, येन सा व्यापादिता तं मारयत। तत् राष्ट्रियशालमेवान्वेषयावः।

(२) आर्य्य चारुदत्त, सैवाहं पापा, यस्याः कारणादियं त्वया असदृशी अवस्था प्राप्ता।

(३) आश्चर्य्यं, आश्चर्य्यं, जीवति वसन्तसेना।

Digitized by Google

॥ इति सर्वे पठन्ति ॥

चारु ॥ आकर्ण्य सहर्षोत्थाय; सस्पर्शसुखनिमीलिताक्ष एव हर्षगद्गदाक्षरं ॥ प्रिये, वसन्तसेना त्वं?

वसं। सा जेव्वाहं मन्दभाआ (१)।

चारु ॥ निरूप्य सहर्षं ॥ कथं वसन्तसेनैव ॥ सानन्दं ॥

कुतोवाप्याम्बुधाराभिः क्षपयन्ती पयोधरौ,
मयि मृत्युवशं प्राप्ते विद्येव समुपागता।

प्रिये, वसन्तसेने।

त्वदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितं मे,
अहो प्रभावः प्रियसङ्गमस्य, मृतोऽपि कोनाम पुनर्द्विजेत।

अपिच। प्रिये, पश्य;

रक्तं तदेव वरवस्त्रमियञ्च माला,
कान्तागमेन हि वरस्य यथा विभाति;
एते च वध्यपटहध्वनयस्तथैव
जाताविवाहपटहध्वनिभिः समानाः।

वसं। अदिदक्खिणदाए किं णेदं ववसिदं अज्जेण (२)।

चारु। प्रिये, त्वं किल मया हतेति।

पूर्वानुबद्धवैरेण घृणा प्रभविष्णुना,
नरके पतता तेन मनागस्मि निपातितः।

---

(१) सैवाहं मन्दभाग्या।

(२) अति दक्षिणतया किं नेदं व्यवसितमार्येण।

Digitized by Google

वसं ॥ कर्णौ पिधाय ॥ ग्राम्यं, पापं; तेनास्मि राजश्यालेन व्यापादिता (१)।

चारु ॥ भिक्षुं दृष्ट्वा ॥ अयमपि कः?

वसं। तेन अनार्य्येण व्यापादिता, एतेन आर्य्येण जीवा विदस्मि (२)।

चारु। कष्टमकारणबन्धुः।

भिक्षु। न प्रत्यभिजानाति मामार्य्यः? अहं खे आर्य्यस्य चरणसंवाहचिन्तया संवाहको; द्यूतकरैर्गृहीतः, एतया उपा

---

(१) ग्राम्यं, पापं; तेनास्मि राजश्यालेन व्यापादिता।

(२) तेनानार्य्येण व्यापादिता, एतेन आर्य्येण जीवं प्रापितास्मि।

(३) न प्रत्यभिजानाति मामार्य्यः? अहं स आर्य्यस्य चरणसंवाहचिन्तया संवाहको; द्यूतकरैर्गृहीतः, एतया उपा

नेपथ्ये। कलकलः।

जयति वृषभकेतुर्दग्धयज्ञस्य हन्ता;
तदनु जयति भेत्ता षण्मुखः क्रौञ्चभानुः;
तदनु जयति शक्तां भ्रूभ्रकैलासकेतु
र्विनिहितवरवैराचार्य्यकोगां विशालां।

प्रविश्य सहसा शर्विलकः।

शर्वि। हत्वा तं कुनपमहं हि पालकं भो
राज्ये हुतमभिषिच्य चार्य्यकं तं;
तस्याज्ञां शिरसि निधाय शेषभूतां
मोक्ष्येऽहं व्यसनगतं च चारुदत्तं।
हत्वा रिपुं तं बलमत्सहीनं,
धीरान् समाश्वस्य पुनः प्रकर्षान्,
प्राप्तं समयं वसुधाधिराज्यं,
राज्यं बलारेरिव शत्रुराज्यं।

॥ अयतोनिरूप्य ॥ भविष्यत्तेन भवितव्यं।

सिकया आर्य्यस्यात्मीयदृति अलङ्कारपणनिष्क्रीतोऽस्मि। तेन च द्यूतनिर्व्वेदेन शाक्यश्रमणकः सम्वृत्तोऽस्मि। एषापि आर्य्या प्रवहणविपर्य्यासेन पुष्पकरण्डकजीर्णोद्यानं गता, तेन चार्य्येण च मां वज्र मन्यसे दृति वाक्यपाशवलात्कारेण मारिता, मया दृष्टा।

यचायं जनपदसमवायः अपि नामायं वारभ्रः,
क्षितिपतेरार्यकस्यार्यचारुदत्तस्य जीवितेन सफलः स्यात्।
त्वरिततरमुपसृत्य ॥ अपयात आत्मानः ॥ दृष्ट्वा सहर्षं॥ अपि म्रियते चारुदत्तः सह वसन्तसेनया, संपूर्णाः खलु स्वामिनो मनोरथाः।

दिष्ट्या भो व्यवसनमहार्णवादपारा
दुत्तीर्णं गुणधृतया सुशीलवत्या;
तावेव प्रियतमया चिरान्विरीच्छे
ज्योत्स्नाढ्यं शशिनमिवापरागमुक्तं।

तत्कृतमहापातकः कथमिवैनं उपसर्प्पामि। अथवा। सर्व्वचार्ज्जवं शोभते ॥ प्रकाशं उपसृत्य बद्धाञ्जलिः॥ आर्य्य चारुदत्त।

चारु। ननु कोभवान्?

शर्व्वि। येन ते भवनं भित्त्वा न्यासापहरणं कृतं,
सोऽहं कृतमहापापस्त्वामेव शरणं गतः।

चारु। सखे मैवं। त्वयासौ प्रणयः कृतइति कण्ठे गृह्णाति।

शर्व्वि। अन्यच्च, अन्यच्च;

आर्य्यकेणार्य्यवृत्तेन कुलं मानञ्च रक्षता,
पशुवद्यज्ञवाटस्थोदुरात्मा पालकोहतः।

चारु। किं?

शर्व्वि। त्वद्यानं यस्मुमारुह्य गतस्त्वां शरणं पुरा,
पशुवदितते यज्ञे हतस्तेनाद्य पालकः।

Digitized by Google

चारु। अर्य्यिके, योऽयं चारुदत्तेन धेनुवाहनीय निष्क्रारणं भूतागारे बन्धने बद्धः आर्य्यकनामा त्वया मोचितः?

अर्य्यि ॥ यदाह तत्रभवान् ॥

चारु। प्रियं नः प्रियं।

अर्य्यि। प्रतिष्ठितमाचेण तव सुहृदा आर्य्यकेण उज्जयिन्यां वेणातटे कुमारवत्यां राज्यमतिसृष्टं। तन्मतिमान्यतां प्रथमः सुहृत्प्रणयः॥ परिक्रम्य॥ अरे रे आभीरतामयं पापो राद्रियग्रठः।

॥ नेपथ्ये ॥ यथाज्ञापयति।

अर्य्यि। आर्य्य, नन्वस्मदार्य्यको राजा विज्ञापयति; दृढं मया युष्मदर्थेपार्जितं तदुपयुज्यतां।

चारु। अस्मदर्थेपार्जितं राज्यं।

॥ नेपथ्ये ॥ अरे रे राद्रिय ग्रामक। एष्येहि खलावित्व यस्य फलमनुभव।

॥ ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बद्धः शकारः ॥

शकारः। हीमादिके!

एवं दूरमतिक्रान्ते, उद्दामे विभ गर्हणे,
आणीदे क्खु हगे वद्धे ऊडे अणोवदुक्खे (१)।

॥ दिशोऽवलोक्य ॥

---

(१) विस्मयं। एवं दूरमतिक्रान्ते, उद्दामदव गर्हणैः,
आनीतः खल्वहं बद्धः कुक्कुरोन्यवदुष्करः।

समन्ततो उपस्थितो मे राष्ट्रियबन्धः। तत्किमिदानीं शरणः शरणं प्रव्रजामि ॥ विचिन्त्य ॥ भोतु; तमेवाभ्युपपन्नशरणरक्षणं गच्छामि ॥ इत्युपसृत्य ॥ अज्ज चारुदत्त, परिचाअह परिचाअहि ॥ इति पादयोः पतति ॥ (१)

नेपथ्ये। अज्ज चारुदत्त, मुञ्च, मुञ्च; वावादेन्द एदं (२)।

प्रकारः ॥ चारुदत्तं प्रति ॥ भो अशरणशरणे परिचाअ एहि (३)।

चारु ॥ सानुक्रोशं ॥ अहह अभयमभयं प्रदानमत्र।

मर्दि ॥ सावेगं ॥ आः! अपनीयतामयं ॥ चारुदत्तः पश्यति ॥ चारुदत्तं प्रति ॥ न मुच्यते; किमस्य पापस्यानुक्रोशं तामिति?

आकर्षतु सुवध्यैनं, श्वभिः संखाद्यतामथ,
शूले वा तिष्ठतामेष, पाच्यतां क्रकचेन वा।

चारु। किमहं वक्ष्यामि तत्क्रियते?

मर्दि ॥ कोऽत्र सन्देहः ॥

---

(१) समन्ततउपस्थितः मे राष्ट्रियबन्धः। तत्किमिदानीं शरणः शरणं प्रव्रजामि। भवतु; तमेवाभ्युपपन्नशरणरक्षणं गच्छामि। आर्य्य चारुदत्त, परिचायस्व, परिचायस्व।

(२) आर्य्य चारुदत्त, मुञ्च, मुञ्च; व्यापादयामहं।

(३) भो अशरणशरण, परिचायस्व।

शकारः। भट्टारआ चारुदत्त, शरणागदेम्हि; ता पडित्ताएहि; जं तुए शलिअं तं कलेहि; पुणो ण ईदिशं करिश्शं (१)।

॥नेपथ्ये,पौरा॥ वावादेध,किंणिमित्तं पातकी जीवावीअदि (२)।

वसं ॥ वध्यमालां चारुदत्तस्य कंठादपनीय शकार स्योपरि क्षिपति॥

शकारः। गर्भदासीधीदे पशीद; ण पुणो मालदृशं, ता पडित्ताआहि (३)।

अर्व्वि। अरे रे अपनयत; आर्य्यचारुदत्ताआप्यतां, किमस्य पापस्यानुष्ठीयता।

चारु। किमहं यद्ब्रवीमि तत्क्रियते?

अर्व्वि। कोऽत्र सन्देहः।

चारु। सत्यं?

अर्व्वि। सत्यं।

चारु। यद्येवं; शीघ्रमयं—

अर्व्वि। किं; हन्यतां—

---

(१) भट्टारक चारुदत्त शरणागतोऽस्मि, तत्परित्राय स्व; यत्तव सदृशं तत्कुरु; पुनर्न ईदृशं करिष्यामि।

(२) व्यापाद्यत किंनिमित्तं पातकी जीव्यते।

(३) गर्भदासीपुत्रि प्रसीद, न पुनर्मारयिष्यामि, तत्परित्रायस्व।

Digitized by Google

चारु। नहि, नहि; मुच्यतां।

अर्व्वि। किमर्थं?

चारु। अयं खलु कृतापराधः शरणमुपेत्य पादयोः पतितः शस्त्रेण न हन्तव्यः।

अर्व्वि। एवं तर्हि स्वभिः खाद्यतां।

चारु। नहि, उपकारहतस्तु कर्त्तव्यः।

अर्व्वि। अहो आर्य्यस्य! किं करोसि; वदलार्य्यः।

चारु। तन्मुच्यतां।

अर्व्वि। इति मुक्तः।

अकारः। हीमादिके! पत्युज्जीविदेहि (१)॥ इति पुरुषैः सह निष्क्रान्तः॥

नेपथ्ये ॥ कलकलः। पुनर्नेपथ्ये॥ एसा अज्ज चारुदत्तस्स वहुआ अज्जा धूदा, पदे वसनञ्चले विलग्गन्तं दारअमाखिवन्ती, वाहभरिदणअणेहिं अणेहिं णिवारिज्जमाणा, पज्जलिदे पावए पविसदि (२)।

---

(१) विस्रब्धे! प्रत्युज्जीवितास्मि ॥ इतः परं नीलकण्ठे नापूरि॥

(२) एषा आर्य्य चारुदत्तस्य वधूरार्य्या धूता, पदे वस्त्राञ्चले विलगन्तं दारकमाक्षिपन्ती, वाष्पभरितनयनैर्जनैर्निवार्य्यमाणा, प्रज्वलिते पावके प्रविशति।

Digitized by Google

अर्य्ये ॥ आकर्ण्य नेपथ्याभिमुखमवलोक्य ॥ कथं; चन्द्रनकः, चन्द्रनक, किमेतत्?

॥ प्रविश्य चन्द्रनकः ॥ किं ण पेक्खदि अय्यो, महाराअप्पासादं दक्खिणेण महन्तोजणसंभद्दो वट्टदि ॥ इत्येवादि पुनः पठति ॥ कधिदं अ मए तीए, जधा, अय्ये मा साहसं करेहि, जीवदि अय्यचारुदत्तोत्ति; परंतु दुक्खवावुडदाए को सुणेदि को पत्तियाएदि (१)।

चारु ॥ सोद्वेगं ॥ हा प्रिये जीवत्यपि मयि किमेतद्व्यवसितं।

॥ ऊर्द्धमवलोक्य दीर्घं निश्वस्य च ॥

न महीतलक्षितिधराणि भवच्चरितानि चारुचरिते वदपि,
उचित तथापि परलोकसुखं न पतिव्रते तव विहाय पतिं।

॥ इति मोहमुपगतः ॥

अर्य्ये। अहो प्रमादः;

त्वराया: सर्पणस्य मोहमार्गोऽय यामतः,
हा धिक् प्रयत्नवैफल्यं दृश्यते सर्म्पतोमुखं।

---

(१) किं ण पेक्खति अर्य्यो, महाराजप्रसादं दक्षिणेन महान् जनसंमर्द्दोवर्त्तते। कथितञ्च मया तस्यै, यथा, आर्य्ये मा साहसं कुरुष्व, जीवति आर्य्यचारुदत्तइति; परन्तु दुःख व्याप्ततया कः श्रद्दधाति कः प्रत्ययते।

Digitized by Google

वसं। समस्सासिदु अज्जो; तत्थ गदुअ, जीवावेदु अज्जं; अण्णधा अधीरत्तणेण अणत्थो सम्भावीअदि (१)।

चारु॥ समाश्वस्य सहर्षोत्थाय॥ हा प्रिये, क्वासि; देहि मे प्रतिवचनं।

चंद। दद्दो दद्दो अज्जो (२)।

॥ इति सर्वे परिक्रामन्ति॥

ततः प्रविशति यथा निर्दिष्टा धूता चेलाञ्चलमाकर्षन् विदूषकेणानुगम्यमानो रोहसेनो रदनिका च।

धूता॥ सासं॥ जाद मुञ्चेहि मं; मा विग्घं करेहि; भीआमि अज्जउत्तस्स अमङ्गलाकण्णादो (३)।

॥ इत्युत्थायाञ्चलमाक्षिप्य पावकाभिमुखं परिक्रामति॥

रोह। दाव अज्जए पडिवालेसु मं, तुए विणा ण सक्कोमि जीविदं धारेदुं (४)।

---

(१) समाश्वसितु आर्य्यः, तत्र गत्वा जीवयतु आर्य्यां; अन्यथा अधीरत्वेनानर्थः सम्भाव्यते।

(२) दत्त दत्त आर्य्यः।

(३) तात मुञ्च मां; मा विघ्नं कुरुष्व, बिभेमि आर्य्यस्य मङ्गलाकर्णनात्।

(४) हा आर्य्ये प्रतिपालय मां, त्वया विना न शक्नोमि जीवितं धर्त्तुं।

Digitized by Google

॥ इति त्वरितमुपसृत्य पुनरञ्चलं गृह्णाति ॥

विदू। भोदीएदाव बम्हणीए भिण्णत्तणेण चिदाधिरोहणं पावमुदाहरन्ति रिसीओ (१)।

धूता। वरं पावाचरणे, ण उण अय्यउत्तस्स अमङ्गला कलणं (२)।

अय्ये ॥ पुरोऽवलोक्य ॥ आसन्नऋतवश्चार्य्यो नत्त्व र्य्यतां।

चारु ॥ त्वरितं परिक्रामति ॥

धूता। रअणिए, अवलम्ब दारअं, जाव अहं समीहिदं करेमि (३)।

चेटी ॥ सकरुणं॥ अहंवि यधोवदेसिणिच्छि भट्टिणीए(४)।

धूता ॥ विदूषकमवलोक्य॥ अय्यो दाव अवलंबेदु (५)।

---

(१) भवत्यास्तावत् ब्राह्मणाभिन्नत्वेन चितारोहणं पाप मुदाहरन्ति ऋषयः।

(२) वरं पापाचरणं, न पुनरार्य्यपुत्रस्यामङ्गलाकर्णनं।

(३) रदनिके, अवलम्बस्व दारकं, यावदहं समीहितं करोमि।

(४) अहमपि यथोपदेशिन्यस्मि भट्टिन्याः।

(५) आर्य्यस्तावदवलम्बताम्।

Digitized by Google

विदू ॥ सावेगं॥ समीहितसिद्धौ प्रवृत्तेण, बम्हणो अग्गदो कादव्वो, अदो भोदीए अहं अग्गणी होमि (१)।

धूता। कहं पच्चादिट्ठम्हि दुवेहिं ॥ बालकमालिङ्ग्य ॥ जाद, तुमं जेव्व पज्जाधावेहि अत्ताणं अम्हाणं तिखोदअ दाणाअ अदिक्कन्ते किं मणोरहेहिं ॥ सनिःश्वासं ॥ ण ङ अज्जउत्तो तुमं पज्जवधाविस्सदि (२)।

चारु ॥ आकर्ण्य सहसोपसृत्य ॥ अहमेव पर्य्यवस्थापयामि वालिअमिति ॥ बालकं बाहुभ्यामुत्थाप्य वक्षसालिङ्गति ॥

धूता ॥ विलोक्य ॥ अम्महे; अज्जउत्तस्स जेव्व सरसंजोओ ॥ पुनर्निपुणं निरूप्य सहर्षं ॥ दिट्ठिआ अज्जउत्तोज्जेव्व एसो, पिअं मे पिअं मे (३)।

बालकः ॥ विलोक्य सहर्षं ॥ अम्मो आवुत्त, मं परिरक्ख

---

(१) समीहितसिद्धौ प्रवृत्तेन, ब्राह्मणोऽग्रे कर्त्तव्यः, अतो भवत्या अग्रणीर्भवामि।

(२) कथं प्रत्यादिष्टास्मि द्वाभ्यां; तात, त्वमेव पर्य्यवस्थापयात्मानं अस्माकं तिखोदकदानाय अतिक्रान्तं किं मनोरथैः। न खलु आर्य्यपुत्रस्त्वां पर्य्यवस्थापयिष्यति।

(३) आश्चर्य्यं; आर्य्यपुत्रस्येव स्वरसंयोगः। दिष्ट्या आर्य्य पुत्रएवैषः, प्रियं मे प्रियं मे।

Digitized by Google

जदि ॥ धूतां प्रति ॥ अज्जए वधावीअसि, आवुत्तजेव्व मं पज्ज वधावेदि (१)।

॥ इति प्रत्यालिङ्गति ॥

चारु। धूतां प्रति।

हा प्रेयसि, प्रेयसि विद्यमाने कोयं कठोरोव्यवसायआसीत्;
अम्भोजिनीलोचनमुद्गणं किं भानावनस्तंगमिते करोति।

धूता। अज्जउत्त, अदोजेव्व सा अचेतणत्ति चुम्बीअदि (२)।

विदू ॥ दृष्ट्वा सहर्षं ॥ ही भोः एदेहिं जेव्व अच्छीहिं पिअवअस्सो पेक्खीअदि; अहोसदीए पहावो, जदो जलनप्पवेसव्यवसाएण जेव्व पिअसमागमं पाविदा ॥ चारुदत्तं प्रति ॥ जेदु, जेदु, पिअवअस्सो (३)।

चारु। एहि मैत्रेय ॥ इत्यालिङ्गति ॥

चेटी। अहो संविधाणअं; अज्ज वन्दामि (४)।

---

(१) आर्य्ये; पिता मां परिष्वजति; आर्य्ये वर्द्धसे, जनक एव मां पर्य्यवस्थापयति।

(२) आर्य्यपुत्र, अतएव सा अचेतनेति चुम्ब्यते।

(३) आर्य्ये; एताभ्यामेवाक्षिभ्यां प्रियवयस्यः प्रेक्ष्यते; अहोसत्याः प्रभावो, यतोज्वलनप्रवेशव्यवसायेनैव प्रियसमागमं प्रापिता। जयतु, जयतु, प्रियवयस्यः।

(४) अहो संविधानं; आर्य्य वन्दे।

Digitized by Google

॥ इति चारुदत्तस्य पादयोः पतति ॥

चारु॥ पृष्ठे करं दत्वा॥ रदनिके, उत्तिष्ठ॥ इत्युत्थापयति॥

धूता ॥ वसन्तसेनां दृष्ट्वा ॥ दिष्ट्या, कुशलिनी वहिणिआ (१)।

वसं। अज्जा कुशलिनी संवुत्तम्हि (२)।

॥ इत्यन्योन्यमालिंगतः ॥

शर्वि। दिष्ट्या जीवितसुहृद्वर्गआर्य्यः।

चारु। युष्मत्प्रसादेन। *

शर्वि। आर्य्ये वसन्तसेने परितुष्टोराजा भवतीं बन्धु शब्देनानुगृह्णाति।

वसं। अज्ज कदत्थम्हि (२)।

शर्वि॥ वसन्तसेनावगुण्ठ्य चारुदत्तं प्रति॥ आर्य्य किमस्य भिक्षोः क्रियतां।

चारु। भिक्षो किं तव बहुमतं।

---

(१) दिष्ट्या कुशलिनी भगिनी।

(२) अधुना, कुशलिनी संवृत्तास्मि।

* यत्सूर्य्योदयभयतः कविनोचितपाचमेलनं न कृतं,
सुन्दरयुक्तिभिररचयदाचंदनकोक्तिनीलकण्ठस्तत्।

(३) आर्य्य कृतार्थास्मि संवृत्ता।

Digitized by Google

भिक्षुः। दृढमिदमनित्यत्वं प्रेक्ष्य, द्विगुणतरोमम प्रव्रज्या यावद्धमानः सम्वृत्तः (१)।

चारु। सखे, दृढोऽस्य निश्चयः। तत्पृथिव्यां सर्व्वविहारेषु कुलपतिरयं क्रियतां।

शर्विः। यथाह आर्य्यः।

भिक्षुः। प्रियं नः।

शर्विः। स्थावरकस्य किं क्रियतां।

चारु। सुदत्त अदासीभवतु। ते चाण्डालाः सर्व्वचाण्डालानामधिपतयोभवन्तु। चन्दनकः पृथिवीदण्डपाशकोभवतु; तस्य राष्ट्रियग्यालस्य यथैव क्रिया पूर्व्वं वर्त्तमाना तथैवास्तु।

शर्विः। एवं यथाह आर्य्यः। तदुच्यतां किं ते भूयः प्रियं करोमि।

चारु। अतः परं प्रियमस्ति।

लब्धा चारित्र्यगृद्धिश्चरणनिपतितः प्रचुरप्येष मुक्तः,
प्रोत्खातारातिमूलः प्रियसुहृदचलामार्य्यकः प्राप्ति राजा;
प्राप्ता भूयः प्रियेयं, प्रियसुहृदि भवान् संगतोमे, च, यस्मो
लब्धं किं चातिरिक्तं यदपरमधुना प्रार्थयेऽहं भवन्तं।

---

(१) दृढमीदृशमनित्यत्वं प्रेक्ष्य, द्विगुणतरोमम प्रव्रज्या यावद्धमानः सम्वृत्तः।

Digitized by Google

कांश्चिद्दूषयति प्रपूरयति वा, कांश्चिन्नयत्युन्नतिं,
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान्,
अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय
नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तोविधिः।

तथापीदमस्तु।

चौरिण्यः सन्तु गावो, भवतु वसुमती सर्व्वसंपन्नशस्या,
पर्जन्यः कालवर्षी, सकलजनमनोनन्दिनोवान्तुवाताः,
मोदन्तां जन्मभाजः सततमभिमताब्राह्मणाः सन्तु सन्तः,
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवोधर्म्मनिष्ठाश्च भूपाः।

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ संहारोनाम दशमोऽङ्कः ॥

समाप्तोऽयं ग्रन्थः।

Digitized by Google

Digitized by Google

ERRATA.

Page	19	*For time,*		*read times.*
,,	29	,, *intentionally,*	,,	*unintentionally.*
,,	108	,, *staure,*	,,	*stature.*
,,	125	,, *Bhima,*	,,	*Bhíma.*
,,	122	,, *Chamar,*	,,	*Chamár.*

Digitized by Google